Barcode : 99999990294041
Title - Anandmala
Author - Traivikramaryadasa
Language - sanskrit
Pages - 176
Publication Year - 1970
Barcode EAN.UCC-13



ĀNANDAMĀLĀ

A Commentary on

Sri Sangrahabhashya of

Sri Madhwacharya

by

Traivikramaryadasa

★

Edited with a glossary

and foot-notes by

Bannanje Govindacharya

★

(Under the financial assistance by Ministry of Education and Youth Services, Government of India)

1970

Daśapramati Prakāśana Samiti

UDIPI

आनन्दमाला

[श्रीमदानन्दतीर्थभगवत्पादविरचितस्य संग्रहभाष्यस्य टीका]

★

धर्मिक्रमार्यदासः

★

यन्त्रालोपदोषाहृत्य गोविन्दाचार्येण संशोधिता,
टिप्पन्या च संयोजिता, सम्पादिता च

★

आरतीयवेन्द्राधिगमगम्भार्यवगाह्याख्येन प्रकाशिता

1970

दशमप्रतिमकाञ्चनसमितिः
रजतपीठपुरम् (उडुपी)

Ānandamālā

© All rights reserved

First Edition, 1970 (1000)

Edited by

Bannanje Govindacharya

Udipi-3

Published by

Dasapramati Prakāśana Samiti

Udipi

Cover design by

R K De'gar

Printed at

Manipal Power Press

Manipal, S India

Dedicated
to the Holy Feet
of



Sri Visvesha Thirtha Swamiji of
Sri Pejavar Mutt

INTRODUCTION

Life is a process, being imprisoned always craves for liberation At times we come in contact with great souls appointed to enlighten the suffering lot, to show the suitable path to liberation Good souls do descend to earth with abundance of spiritual energy, far superior to any other energy, to shape up things in accordance with the divine will When in operation these souls radiate unintelligible powers that suppress the bad and enliven the good qualities without notice Perhaps, after a long, we in Udipi were fortunate enough to smell a similar atmosphere, during the paryayam period of Sri Vivesha Tirtha Swamiji of Sri Pejavar Mutt At one could feel the entire atmosphere was rather spiritually charged through his intensely active engagements in spiritual discourses and incessantly conscious attachment with Lord Krishna He attracted many a good soul, helped them thrive in the right path Indeed, a sunflower cannot but open its petals when the sun is in the rise

Thus the Pravachan went on Various types of people — teachers, office bearers etc etc assembled to have this rare opportunity of listening to Swamiji with great enthusiasm Some of us took notes, posed questions foreign to traditional philosophy and some times childish questions (as we could descern later) also Swamiji was kind enough to give patient hearing, reply with affirmity and convince us, the mostly non-vedantic students His impressive teaching make us realize that the philosophy of Sri Madhwa is based on very fundamental truths of creation

Meanwhile our dear friend Sri Bannanje happened to find a rare manuscript of ĀNANDAMĀLĀ, a commentary on Sangraha Bhashya i e Anu Bhashya in the Ms library of Sri Palimar Mutt We started copying it

This is a masterpiece by Trivikramarya Dasa, probably a grandson of Sri Trivikrama Pandita of Tattwa Dipika-fame and the son of Sri Narayana Pandita, the renowned author of *Sri Madhwa Vijaya*

To edit such a treatise, a work of this class, a single Ms , wornout and brittle, with elisions here and there was not enough So we were in search of other Mss In this, Sri Vishvothama Thirtha Swamiji of Sri Sode Vadiraja Muth came to help us He gladly provided us with a manuscript from the Muth's library We are grateful to Swamiji for his timely help

Again Sri Bannanje went to Mysore and carefully studied the Ms preserved there in the Oriental Research Institute With the help of these three Mss this well-edited version of Anandamala is finally ready to reach the hands of lovers of philosophy

This precious work, we feel blessed and proud to dedicate to the holy feet of H H Sri Viswesha Tirtha Swamiji of Sri Pejavar Mutt

Finally we can never forget to thank Manipal Power Press for their splendid cooperation and excellent printing

5—11—1970
UDIPI

PRESIDENT
Dasapramati Prakasana Samithi

EDITOR'S NOTE

Some seven hundred years ago a storm arose in the belt of Indian philosophy to cleanse the spiritual path and remove the fetters of the good souls This was Madhwa the great (1238 — 1317 A D)

A combination of spiritual and physical perfectness he was A beau ideal of Herculean strength, a manifest of wisdom and benignity His sermons aroused good souls all over the world for centuries after centuries

This philosophical monarch had left some immortal imprints on earth for us He composed 39 treatises[1] of uncomparable scholarship His works were chiselled by wisdom He spoke as none else in the history of Indian philosophy ever spoke minimum words with maximum contents It was an exposition of real bliss (आनन्दतीर्थ) which the good souls were and are craving for

Sangraha Bhashya or *Sarva Shastrartha Sangraha* as known otherwise, is a breaf gloss by Sri Madhwa on Sri Badarayana's Brahma Meemamsa Sootra It is a microcosm containing macrocosm within as Sri Madhwa Vijaya puts it अनन्तोऽर्थ प्रकटितस्त्वयाऽणौ भाष्यसग्रहे (15 82)

---

1 It is generally believed that Sri Madhwa had composed only 37 treatises But I, while searching for old Mss happened to trace other two important works of Sri Madhwa *Tithi Nirnaya* and *Njasa Paddhathi* Now the identity of authorship is undoubtedly proved But this is not the proper place to go into the details

Known so far there are five commentaries on this great work Among these the commentary by Sri Raghavendra Thirtha (तत्त्वमञ्जरी) is already printed It is quite popular among the students of philosophy

The other four preserved in the Mysore Oriental Library are (2) श्रीमद्ब्रह्मसूत्राणुभाष्यार्थं author unknown (C 1338, ps 12), (3) अणुभाष्यविवरणम् by Srinivasa Thirtha, a disciple of Yadupathi Acharya[2] (C 2124 ps 17), (4) अणुभाष्यविवृति by Ānanda Thirtharya Sutha of Kagalur[3] (C 2245, ps 13), and (5) Ānanda Mala All of these are Devanagari paper Mss

Among these four the first three commentaries are quite ordinary Nothing new, nothing original is disclosed No new light is shed on the text The pale and stale good old method is followed But Ānanda Mala is something remarkable, something outstanding

The author did not reveal his name This much is evident through the colophon[4] and the Mangala Sloka[5]

---

2 It is stated in conclusive Sloka and colophon

अणुभाष्य मया श्रीनिवासेन विवृत गुरो ।
यादवार्यसन्नाम्न कृपामालम्ब्य लेशत ।
यदुपतिशिष्यश्रीनिवासविरचिताणुभाष्यविवरणम् ।

3 Thus says the conclusive statement

कागलूरकुलाग्रण्यानन्दतीर्थार्यसूनुना ।
विवृतिस्त्वणुभाष्यस्य रचिताऽस्तु सता मुदे ।

4 त्रैविक्रमार्यदासवृतावानन्दमालायाम् — etc

5 त्रिविक्रमार्यान् परमान् गुरून् मे
नारायणार्यांश्च गुरून नमामि ।

Here गुरु means father and परमगुरु grandfather Cp Madhwa

that he was a grandson of Sri Trivikrama Panditha (त्रैविन्नमार्यदास) and son of Sri Narayana Panditha The Style of the composition has much resemblance to that of his grand father, Sri Trivikrama Panditha

The title Ānanda Mālā is an epithet to this work It is a type of composition possible not through sheer scholarship but through the spirit of devotion and dedication and the grace of great Guru Sri Madhwa vouchsafed this Likucha family such a grace Sri Trivikrama Panditha had the opportunity of having a philosophical dialectics with Sri Madhwa for 15 days that gave him the vision of real philosophy So blessed was this family Sri Madhwa's blessings worked in this gloss also

The devotional approach of the author towards the divine guru is evident almost in every page To mention a few

नहि बहुविशेषज्ञचूळामणिं सर्वज्ञभास्करमन्तरेणैतादृशभाष्यानुभाष्यविरचने चतुरतरचेताश्चतुर्दशभुवनेष्वस्ति । (p 27)

ब्रह्मसूत्रार्थसारान्वेषणेन तद्व्याख्यानमुख्याधिकारस्तु मुख्यप्राणस्यैवेति हि किञ्चिदवोचाम । (p 30)

इहापि हि मुख्याधिकारिणो देवादय एव भगवन्त श्रूयन्ते। अस्माकं तु तदनुगृहीत एव क्वचिदधिकारलेश आशास्यते । नतु स्वयमेवाधिकार । (p 30)

This commentary reveals a new world Through the light shed by this work the depth of the text, we feel, deepened

---

Vijaya गुरूस्तान् त्रिविन्नमार्यान् प्रणमामि वर्यान् । Narayana Panditha also called himself as त्रैविन्नमार्य in the colophon of *Naya Manjari* त्रैविन्नमार्यकृतौ नयमञ्जर्याम् etc

and the width widened Rare interpretations and meanings are given to the text which we can nowhere find No commentary has done more justice to the text than this does Such a precious stone, adorable in the chest, was till now hidden in darkness !

His skill in textual interpretations are clearly seen in अन्तरधिकरण (ps 28-29), गुहाधिकरण (ps 38-39) etc etc

This work of superexcellence is also the oldest *available commentary and the nearest to Sri Madhwa* But the later commentators had unfortunately not come accross this glossary Had they, the whole method of their interpreting the text would have changed The only commentator happened to witness this work was Sri Jagannatha Yathi of Sri Vyasaraya Muth He quotes some passages from Ānanda Māla in his *Bhashya Dipika*

There is one more revealing fact worth-noting to the research students Current reading of the Sangraha Bhashya is a bit variant But Ānanda Mālā follows the ancient reading, a reading found in the oldest scripture of Sarva Moola written by Sri Hrishikesha Thirtha, the first disciple of Sri Madhwa

The first mention of this work is perhaps by Dr B N K Sharma in his scholarly thesis "A History of the Dwaitha School of Vedantha and its Literature" He writes thus

> "A son (?) and disciple of Narayana Panditha-charya, who describes himself merely as 'Trivikramāryadasa'—a disciple and 'slave' of the son of Trivikrama, wrote a gloss on the Anu-Bhashya, entitled Ānandamālā, of which a devanagari Ms is preserved in the Mys O L A passage from it is quoted in Jagannatha Thirtha's Bhashya dipika (p 1097) dismissing

the explanation given by Vadiraja of the passage सच्चिदानन्द आत्मेति with the remarks that his explanation is opposed to that of the Ānandamāla The S K (p 20) wrongly attributes this work to Padmanabha Thirtha Internal evidence leaves no room for doubt that the author was a disciple of Narayana Panditha He has not, however, chosen to reveal his name

The commentary which is the earliest known on the Anubhashya is full and informing His ornate style leaves a family resemblance to that of Trivikrama and his son In him, too, we meet with the same gushing rhaprodies of admiration for Madhwa The following passage is a typical example

नहि बहुविशेषज्ञचूळामणिं सर्वज्ञभास्करमन्तरेण एतादृशभाष्यानुभाष्यरचने चतुरतरचेताश्चतुर्दशभुवनेष्वस्ति । किम्पुनरेकेनैव वाक्येन पदेनाक्षरेण वा तत्तदधिकरणार्थसंग्रहभाषणे कुशलमतिर्नास्तीति । यदभिप्रेतार्थस्य अशाशमपि लेशत एव वय वक्तु सम्प्रति यथामति यतामहे । नचास्माक तत्प्रतिपादनपाटवमपटुधियाम् । यद्यप्यस्मदाचार्यांग्नय मध्वसूर्य सन्दर्शितार्थान् तत्प्रसादैकबलमवलम्व्य कथञ्चित् प्रायश प्रकाशयितु शक्नुवन्ति । तथाऽपि न खलु वय खद्योतसमद्योतत्वादेतद्द्योतितानपि तानशाशेन च प्रकाशयितु शक्नुम । किन्तर्हि? मनोवाग्भिस्तद्भाष्यभावावतंनलौल्यादेवायमस्मत्साहविजृम्भ ।

The other short works of Trivikramaryadasa have been brought to my notice by my friend Sri K T Pandurangi They are (2) a gloss on Madhwa's Kathopanishad Bhashya and (3)

another on the Māndūka Bhashya Both are available in complete Devanagari Mss with Sri Gurjali Srinivasacharya of Malkhed Their identity of authorship is established by the style, the introductory statements and colophon"

(Vol 1, P 290 291)

Tulu Mss of these commentaries on the Upanishad Bhashyas are also available in the Ms library of Sri Sode Vadiraja Muth, Udipi I wish both the works be published soon

I had three Mss before me while editing this work Apart from the Devanagari paper Ms (refered as ग पुस्तक here) of the Mysore Oriental Library I had been able to procure two Tulu palm leaf Mss in Udipi itself One is from Sri Palimar Muth (refered as क पुस्तक), and the other from Sri Sode Vadiraja Muth (ख पुस्तक)

I am always grateful to these Institutions for their co-operation for the great cause

— *Bannanje Govindacharya*



The historical house of Sri Trivikrama Panditha, grandfather of the author, in Kasaragod, now in Kerala State The great works like *Tattwadipika, Madhwa Vijaya* and *Ananda Mālā* were probably composed under this roof Except some modifications — roofing with Mangalore Tiles, lime plastering etc. etc, the old house remains the same in its basic structure as it was in the time of *Sri Madhwa* This old house, a pilgrim centre to the *Mādhwas* is known as *Karu Matha* There is an image of *Sri Lavmi Narayana* vouchsafed by *Sri Madhwa* to *Sri Trivikrama Pandita*, his beloved disciple, which is still being worshipped with great reverence, though the house is now occupied by some non-mādhwas



श्रीमदानन्दतीर्थभगवत्पादविरचितं

सग्रहभाष्यं च

सर्वशास्त्रार्थसग्रहः

ॐ ॥ [1] विष्णुरेव विजिज्ञास्य सर्वकर्ताऽऽगमोदित ।
समन्वयादीक्षतेश्च पूर्णानन्दोऽन्तर खवत् ॥ १

प्रणेता ज्योतिरित्याद्यं प्रसिद्धंरन्यवस्तुषु ।
उच्यते विष्णुरेवैक सर्वं सर्वगुणत्वत ॥ २

० ० ० ० ० ०

सर्वगोऽत्ता नियन्ता च दृश्यत्वाद्युज्जित सदा ।
विश्वजीवान्तरत्वाद्यैर्लिङ्गं सर्वैर्युत स हि ॥ ३

० ० ० ० ० ०

सर्वाश्रय पूर्णगुण सोऽक्षर सन् हृदब्जग ।
सूर्यादिभासक प्राणप्रेरको दैवतैरपि ।
ज्ञेयो न वेदं शूद्राद्यं कम्पकोऽन्यश्च जीवत ॥ ४

पतित्वादिगुणैर्युक्तस्तदन्यत्र च वाचकं ।
मुख्यत सवशब्दैश्च वाच्य एको जनार्दन ॥ ५

० ० ० ० ० ०

---

1 प्रचलितपाठेऽस्माऽग्रौ --

"नारायण गुणै सर्वैरदोषं दोषवर्जितम् ।
ज्ञेय गम्य गुरुश्चापि नत्वा सूत्राय उच्यते ॥'

इति भाष्याद्यपद्य पठ्यते । मूलकोशेषु तु न क्वापि । न व्याचख्यौ चाऽनन्दमाला वृत् । तत्त्वमञ्जर्याद्या अन्या सर्वा अपि व्याख्या इद पद्य सग्रहभाष्यव्याख्याद्य पद्यमिति परिजगृहु ।

अव्यक्त कर्मवाच्यैश्च[1] वाच्य एकोऽमितात्मक ।
अवान्तर कारण च प्रकृति शून्यमेव च ॥ ६

इत्याद्यन्यत्रनियतैरपि मुख्यतयोदित ।
शब्दैरतोऽनन्तगुणो यच्छब्दा योगवृत्तय ॥ ७

॥ ० ॥ प्रथमोऽध्याय ॥ ० ॥

—०—

श्रौतस्मृतिविरुद्धत्वात् स्मृतयो न गुणान् हरे ।
निषेद्धु शक्नुयुर्वेदा नित्यस्वान्मानमुत्तमम् ॥ ८

[2]देवतावचनान्नाऽपो वदन्तीत्यादिना वच ।
नायुक्तवाद्यसम्भव कारण दृश्यते क्वचित् ॥ ९

असज्जीवप्रधानादिशब्दा ब्रह्मैव नापरम् ।
वदन्ति कारणत्वेन क्वापि पूर्णगुणो हरि ।
स्वात्मात् सर्वकर्तृत्वानायुक्त तद् वदेच्छ्रुति ॥ १०

० ० ० ० ० ०

भ्रान्तिमूलतया सर्वसमयानामयुक्तित ।
न तद्विरोधाद् वचन वैदिक शङ्कचता व्रजेत् ॥ ११

० ० ० ० ० ०

---

1 अयमेव हृषीकेशतीर्थसम्मत पाठ । 'कर्मवाक्यैश्च इत्यानन्दमालापाठ इति भाति । पेजावरमठीयप्राचीनकोशे तु तथैव पाठ ।

2 अय मूलकोशपाठ । आनन्दमालासम्मतश्च ।
'देवतावचनादापो वदन्तीत्यादिक वच
इति तु व्याख्यानान्तरसम्मत प्रचलितपाठ ।

आकाशादि समस्तं च तज्जं तेनैव लीयते ।
सोऽनुत्पत्तिलयः कर्ता जीवस्तद्वशगः सदा ।
तदाभासो हरिः सर्वरूपेष्वपि समः सदा ॥ १२

० ० ० ० ० ०

मुख्यप्राणश्चेन्द्रियाणि देहश्चैव तदुद्भवाः[1] ।
मुख्यप्राणवशे सर्वं स विष्णोर्वशगः सदा ॥ १३

सर्वदोषोज्झितस्तस्माद् भगवान् पुरुषोत्तमः ।
उक्ता गुणाश्चाविरुद्धास्तस्य वेदेन सर्वया[2] ॥ १४

॥ ० ॥ द्वितीयोऽध्यायः ॥ ० ॥

—०—

शुभेन कर्मणा स्वर्गं निरयं च विकर्मणा ।
मिथ्याज्ञानेन च[3] तमो ज्ञानेनैव परं पदम् ।
याति तस्माद् विरक्तः सन् ज्ञानमेव समाश्रयेत् ॥ १५

० ० ० ० ० ०

सर्वाधिष्ठात्रेरकश्च सर्वरूपेष्वभेदवान् ।
सर्वदेशेषु कालेषु स एकः परमेश्वरः ।
तद्भक्तितारतम्येन तारतम्यं यिमुक्तिगम् ॥ १६

० ० ० ० ० ०

सच्चिदानन्द आत्मेति मानुषैस्तु[4] सुरेश्वरैः ।
यथाक्रमं बहुगुणैर्ब्रह्मणा त्वखिलैर्गुणैः ॥ १७

---

1 "तदुद्भव." इति प्रचलितपाठ. ।
2 "सर्वदा" इति प्रचलितपाठ ।
3 "मिथ्याज्ञानेन तु" इति क्वचित् कोशे ।
4 "मानुषैश्च" इतिप्रचलितपाठः ।

उपास्य सर्ववेदैश्च सर्वैरपि यथाबलम् ।
ज्ञेयो विष्णुर्विशेषस्तु ज्ञाने स्यादुत्तरोत्तरम् ॥ १८

० ० ० ० ० ०

सर्वेऽपि पुरुषार्था स्युर्ज्ञानादेव न संशय ।
न लिप्यते ज्ञानवांश्च सर्वदोषैरपि क्वचित् ॥ १९

गुणदोषं सुखस्यापि वृद्धिह्रासौ विमुक्तिगौ ।
नृणां सुराणां मुक्तौ तु सुखं वक्ष्ये यथाक्रमम् ॥ २०

॥ ० ॥ तृतीयोऽध्याय ॥ ० ॥

—०—

विष्णुर्ब्रह्म तथाऽऽदातेत्येव नित्यमुपासनम् ।
कार्यमापद्यपि ब्रह्म तेन यात्यपरोक्षताम् ॥ २१

प्रारब्धकर्मणोऽन्यस्य ज्ञानेन स्यात्[1] परिक्षय ।
अनिष्टस्योभयस्यापि सर्वस्याऽस्य भोगत ॥ २२

० ० ० ० ० ०

उत्तरेपूत्तरेष्वेव[2] यावद् वायु विमुक्तिगा. ।
प्रविश्य भुञ्जते भोगास्तदन्तर्बहिरेव वा ॥ २३

वायुर्विष्णु प्रविश्यैव भोगश्चैवोत्तरोत्तरम् ।
उत्क्रम्य मानुषा मुक्ति यान्ति देहक्षयात् सुरा ॥ २४

० ० ० ० ० ०

अर्चिरादि पथा वायु प्राप्य तेन जनार्दनम् ।
यान्त्युत्तमा नरोच्चाद्या ब्रह्मलोकात् सहाम्बुना ॥ २५

० ० ० ० ० ०

---

1 "ज्ञानादेव इति प्रचलितपाठ ।
2 "उत्तरेपूत्तरेष्वेवम्' इति प्रचलितपाठ ।

यथासङ्कल्पभोगाश्च चिदानन्दशरीरिण ।
जगत्सृष्टयादिविषय महासामर्थ्यमप्युत ॥ २६

यथेष्टशक्तिमन्तश्च विना स्वाभाविकोत्तमान् ।
अनन्यवशगाश्चैव वृद्धिह्रासविवर्जिता ।
दुःखादिरहिता नित्य मोदन्तेऽविरत सुखम् ॥ २७

॥ ० ॥ चतुर्थोऽध्याय ॥ ० ॥

—०—

पूर्णप्रज्ञेन मुनिना सर्वशास्त्रार्थसंग्रह ।
कृतोऽप्य प्रीयता तेन परमात्मा रमापति ॥ २८

नमो नमोऽज्ञेयदोषदूरपूर्णगुणात्मने ।
विरिञ्चशर्वपूर्वेड्यवन्द्याय श्रीवराय ते ॥ २९

इति श्रीमदानन्दतीर्थभगवत्पादकृत
[1] सर्वशास्त्रार्थसंग्रह समाप्त

---

1 अस्यैव च क्वचित् 'अणुभाष्यम्', 'अणुवेदान्त', 'भाष्यसंग्रह' 'संग्रहभाष्यम्' इति च व्यपदेश । "अनन्तोऽर्थ प्रकटितस्त्वयाऽणौ भाष्यसंग्रहे" (म०वि० १५ ८२) इति नारायणपण्डिताचार्या । संग्रहभाष्यमिति चाऽऽनन्द-मानाल्ये ।

ॐ ॥ स्वानन्दसंविन्मय[1]मङ्गलाङ्ग
निर्दोषमात्मानमनन्तरूपम् ।
ब्रह्मैकवेद्य[2] सकलोदयार्क्त
विष्णु स्मराम सतत रमेशम् ॥ १

स्वानन्दतीर्थार्यसदागमान्त-
विद्यामहाचार्यतमान् मुनीन्द्रान् ।
निरस्तदुस्तर्कदुरागमौघान्
वन्दे मुहुर्व्यासपदाश्रयाश्च ॥ २

ॐ ॥ विजानतामवित्तस्य मध्वस्य जगतीगुरो ।
पूर्वाचार्यमहिष्ठानामिय प्रणतिमालिका ॥

स्वानन्देत्यादि प्रतिपाद्य परिचित्य प्रणमति । स्वयमेवाऽऽनन्द ः स्विति दु खा-
सम्भिन्नश्च । प्रथमेन प्रथमाध्याय द्वितीयेन च विशेषणेन द्वितीय विवृणोति ।
उपपद्यते चानन्तनामत्वमनन्तरूपत्वात् । सच्चिदानन्द आत्मेति साधनाध्याय-
मारसग्रह । निर्दोषमिति सत्पदार्थं । "सत्त्व नाम निर्दोषत्वम्" इति तृतीयस्य
तृतीये तत्त्वदीपिका । वाङ्मनसदेवता रमा । स्वरूपानन्देन रमन्त इति मुक्ताश्च
रमा । रतिमानरूपत्वाच्च । तदिद फलाध्यायनिष्कर्षं । ब्रह्मेति वेदा उच्यन्ते ।
वेद्या अप्युच्यते । एवेति केवल मुख्यतया च । अन्येऽपि यथायोगमर्था । वेद्यमिति
प्रतिपाद्य च । केवल वेदैरेव मख्यतया च वेद्यमा विलक्षणत्वादिना वेदित वित्तं
च । सकलेभ्य उर्वी सकला च शक्ति । विष्णुमिति व्याख्यानव्याख्येययोरैक्याय्यं-
माह ॥ १ ॥
सूत्रकार भाष्यकार च द्वितीयेन प्रणमति—स्वानन्दतीर्थस्य अयं आर्यो
वा स्वामी गुर्वी । वेदान्तसूत्रप्रणयनाद् वेदान्तविद्यामहाचार्यतम । व्यास
इति पदस्य वाच्यतयाऽऽश्रय । अयच स्वानन्दतीर्थायेव सदागमान्त-

---

१ "सच्चिन्मय—" ग २ "—वन्द्यम्" ख

अशेषवेदान्तकृतान्तसार-
व्याख्याविहारान् हरिभक्तिसिन्धून् ।
त्रिविक्रमार्यान् परमान् गुरून् मे
नारायणार्यांश्च गुरून् नमामि ॥ ३

स्वानन्दतीर्थं परतत्त्वसूत्र-
भाष्यानुभाष्ये बहुविस्तृतार्थे ।
क्षुद्रंश्च तत्सग्रहभावभाषे
स्वल्पाक्षरे स्वल्पमतेर्ग्रहार्थम् ॥ ४

अनन्तमुख्यार्थमनन्तमध्व-
गुरुस्तमाचार्यवरप्रसादात् ।
अत्यल्पधीस्तं विवृणोमि शक्त्या
तत्पादसेवननित्यसिद्धये ॥ ५

विद्यामहाचार्यतमान् । "मौन निदिध्यासनम् । मौनयुक्तो मुनि" इति पूर्वाचार्या । वेदव्यासचरणशरणाश्च ॥ २ ॥

पूर्वार्धविशेषणद्वय विशेष्यद्वयस्यापि यथासम्भवम् । वृतान्तसार सिद्धान्तनिष्कर्षं । हरिभक्त्या स्यन्दनात् चित्तद्रवणात् सिन्धव ॥ ३ ॥

भाष्यानुभाष्ये इति । भाष्य कृत्वाऽनुभाष्य च करिष्यमित्यर्थं । स्वल्पमतेरपि ग्रहार्थम् । नह्यल्पमतिरेवाशाधिकृत । अनन्तमुख्यार्थमित्यनुपदमेव वक्ष्यमाणत्वात् । अनल्पमतिरेव मुख्यतोऽधिकृत । उक्त चैतत् "बालमङ्कमपि योधयद् भृशम्" इति ॥ ४ ॥

अनन्ता मुख्यार्था यत्र । "अनन्तोऽयं प्रकटित" इति सवादात् । अनन्तो भगवानेव च मुख्यार्थो यत्र । अनन्तमध्येत्युत्तरवाक्यसवादात् । अनन्ता इति बहुव ।" सहस्रार्थंम्य भाष्यस्य" इतिवत् । आचार्योऽपि वर । प्रमादोऽपि वर । प्रमादात्तनवत्या यथाशक्ति च । तदपि न शक्तिरस्तीति । किन्तु? तत्पादसमेवननित्यसिद्धये । शिष्यतिर्वृद्धिरेव सिद्धि ॥ ५ ॥

[1] "ॐ अथातो ब्रह्मजिज्ञासा" (१ १ १) इति सूत्रार्थमाह – "विष्णुरेव विजिज्ञास्यः" इति । तदर्थं ब्रुवाणो मध्वदेवोऽनेनैव भाष्यवाक्येन स्वात्मनोऽभीष्टदेवता प्रणम्य [2] प्रसादयन्नभिष्टुवन् ध्यायति [1] । तद्वाक्यस्य तदुपलक्षणार्थत्वात् । जिज्ञासाप्रतिज्ञावाक्येनैव [2] तत्पूर्वभाविन प्रणामाद्यर्था उपलक्ष्यन्ते; [3] सग्रहाधिकारत्वादित्यर्थः । मङ्गलाचरणाय [3] च प्रणामाद्यर्था इष्यन्ते । स हि परममङ्गलच्चिदानन्दरूपो [4] विष्णु सर्वेषामपीष्टदेवता [5] भवति । [4] प्रणममन्ते [6] "नमो नम" इति करिष्यमाणो भगवानाचार्य इति सिद्धम् [7] । प्रयोजनान्तरा-

---

1 'अनोकृतमासुरम्' इति प्रमाणसिद्धमोङ्कार पठित्वा सूत्र पठति – ॐ अथातो ब्रह्मजिज्ञासा । अत एव न्यायविवरणम् – "स्वयम्प्रकाशत्वान्न जिज्ञास्यतेति प्राप्ते अथातो ब्रह्मजिज्ञासेत्याह" इति । सन्न्यायरत्नावली च – "ओङ्कारस्तु स्तवत्यनोकृत ब्रह्मेत्यादिवचनात् प्रत्यधिकरणमावर्तमानत्वात् पृथगुच्चारितो वेदितव्यो नाम्नाथशब्दवत् सूत्रोपनिबद्ध" इति । नयचन्द्रिका च – "ओङ्कार पृथगेवोच्चार्यते । नाथशब्दवत् सूत्रे निबद्ध" इति ।

2 प्रणम्येति शारीरम्, अभिष्टुवन्निति शाब्दम्, ध्यायतीति मानसमिति त्रिविध मङ्गलमाह ।

3 भाष्यसग्रहस्यैवाऽरब्धत्वात् । विस्तरानवसरात् । अविस्तरमपि सविस्तार हि सग्रह ।

4 सग्रहभाष्यस्यान्ते "नमोनमोऽशेषदोषदूरपूर्णगुणात्मने" इति मङ्गलश्लोकेन प्रणामरूप च मङ्गल मुखत सिद्धम् ।

---

१ "प्रसादयन्नभिष्टूय साधयति" ग
२ "जिज्ञासावाक्येनैव" ख
३ "–चरणेन" ग
४ "इष्यन्ते । परमानन्दरूपो–" क
"इष्यन्ते । सहि परमानन्दरूपो–" ख
"इष्यन्ते । स हि परममङ्गल परमानन्द–" घ
५ "सर्वेषामिष्टदेवता' क
६ "प्रणामस्त्वन्ते" क ख
७ "करिष्यमाणेन सिद्धम्" क
"करिष्यमाणेनान्यसिद्धम्" ख
'करिष्यमाणे.. सिद्धम्"–घ

दृष्टेः। अत्र हि वाक्यस्य विष्णोरेव जिज्ञास्यत्वसाधकत्वेन तत्परत्वात् स्तुति-[1] रूपत्वमपि सम्भवति। एतदपि विस्पष्टं[2] "यन्त्राय" इति यदयति[3]। जिज्ञासाया[4] वस्तुनिर्णयद्वारेण ध्यानार्थत्वात्, ध्येयस्यैव जिज्ञास्यत्वाच्च ध्येयो विष्णुरिति च तत्रैवाऽवेदितम्। [5]विष्णोरेव व्याप्यत्वेन सूत्रकर्तुः स्वगुरुत्वादय-मेव तत्परतायाश्च भवति। विष्णुरेव सूत्रार्थत्वेन जिज्ञास्यः सर्वैवेदार्थत्वा-दिति[6] वार्त्तयापि निर्दिष्टमेव स्यात्[7]।

अनेनैवाधिकारिविषयादयश्च सूचिता भवन्ति। जिज्ञासुर्विष्णुभक्तोऽधिकारी[8]। जिज्ञास्यो विष्णुर्विषयः[9]। तस्य तदज्ञानादिदोषापगमस्तज्ज्ञानादिगुण-साधनश्च परम्[10]। सम्बन्धो जिज्ञास्यजिज्ञासयसक्षण इति।

---

1 "विरिञ्चनारायणाभ्यां यन्त्राय श्रीवराय ते" इत्युत्तरश्लोकार्धेन वक्ष्यति। अभिवादने स्तुतौ च हि यन्त्रयति विदन्ति।

2 व्याप्यत्वेन सूत्रकर्तुर्विष्णोरेव स्वगुरुत्वादित्यर्थः। तेन विष्णुरेव व्याप्यत्वेन विजिज्ञास्य. सूत्रकर्तृत्वेन च विजिज्ञास्य इति तत्परतावादश्च भवति।

3 तेन वस्तुनिर्देशमुखेन च मङ्गलम् सिद्धम्।

4 "अध्ययनमात्रवत." इति वदताधिकारस्य पुनिनार्थवचनमिदम्। "भक्तेश्च विष्णुनिष्ठाया अध्ययनवत एव प्रायेण सम्भवात्" इति हि तत्रत्तदीयता। "ज्ञानाधिकारी सम्प्रोक्तो विष्णुपादैकमश्रय." इति च भाष्ये।

5 परमिति ज्ञानात् परम्। तेन ब्रह्मादलक्ष्यः। तेन च ब्रह्मशब्दश्च मुख्यतया परम्।

सूत्राणां [1] त्रिविधमपि प्रामाण्यमेवशब्देनावधारणात् साधितं भवति । अन्यथा तदयोगात् ॥ ० ॥

तत्र प्रथमतः प्रणवार्थमुक्त्वा सूत्रार्थं व्याख्याति । तन्मूलत्वात् तेषाम् । [2] बल-प्राणनादि [1] गुणैर्व्याप्तत्वं स्वविषयस्य [2] वदन् विष्णुशब्द ओत इति तद्गुण-व्याप्तिं सूचयत [3] ओङ्कारस्याभिसन्धिं वक्ति । एवं विजिज्ञास्य [4] पदमपि विष्णोः सकलवेदपदैकगम्यत्वं प्रतिज्ञाय तद्गुणपूर्तिं व्यञ्जयत् त्रि [5] वेदसाराक्ष-रैकरूपत्वेन [3] तद्गुणाधिक्यविधिपरस्य तारस्याभिसन्धिमभिधत्ते । "सपकारण-कारमेव ब्रूयात्" [4] इति श्रुतावपि सविष्णुज्ञानमेव सहिताध्ययनविधेस्तत्सारस्य च तारस्यायं विष्णुशब्दो वक्ति । षणकारयोर्विष्णुनामत्वं तु [6] भगवतैवानु-भाषितम् – "उपसर्गत्वतो वेस्तु [5] –" (अनुव्या० १.४.४१.) इत्मादौ ।

---

1 तयाह्यनुव्याख्यानम् – "आप्तवाक्यतया तेन श्रुतिमूलतया तथा । युक्ति-मूलतया चैव प्रामाण्य त्रिविध महत्" इति । वक्ष्यति हि "प्रमाणान्तरबाध बाधित्वा तमेवार्थमवधारयति" इति ।

2 "णकारो बल पकार प्राण आत्मा" इत्मैतरेयोवचन विप्लृ व्याप्ताविति धातुपाठ च सङ्गमय्यार्थमाह – बलप्राणनादिगुणैर्व्याप्तत्वमिति ।

3 "तेनेय त्रयी विद्या वर्तते" इति श्रुत्या प्रणवस्य त्र्यक्षरता विवक्षित्वेद-मुदितम् – त्रिवेदेति ।

4 "सपकारमेव ब्रूयात्", "सणकारमेव ब्रूयात्", (महैतरेय० २. ८. ६.) इति श्रुतिवचनद्वयमर्थतोऽनूदित भवति ।

5 "उपसर्गत्वतो वेस्तु ताच्छील्यार्थादुनस्तथा । णकारश्च पकारश्च नाम-रूपतया मतौ" इति ह्यनुव्याख्याने ।

---

१ "–प्राणादि–" ख. २ "–त्व विषयस्य" ख.
३ "सूचयदोङ्कार–" ग ४ "एव जिज्ञास्य–" क ख.
५ "व्यञ्जयति । वेदसा–" क. ख. ग
६ "–नामत्व भगवतैवा–" क. ग.

"सर्वैश्च वेदैः परमो हि देवो जिज्ञास्यः[1] –" (चतुर्वेदशिखा० [1]) इति च श्रुतौ जिज्ञासाविषयस्यैव सर्ववेदार्थत्वाभ्युपगमाज्जिज्ञास्यपदमपि वेदार्थसार-मोङ्कारार्थं वक्तीति च गम्यते । अतः[2] प्रणवार्थत्वेनापि विष्णुरेव विशिष्टो जिज्ञास्यः । एवशब्दस्तत्र प्रमाणान्तरबाध बाधित्वा तमेवार्थमवधारयति ।

एवं प्रणवार्थभूतो विष्णुरेवायात'शब्दाभ्यामपि यथोक्तगुणविस्तरो [2] ब्रह्मशब्देन विषयीक्रियमाणो [3] मनुष्येषु तेभ्यो वा विशिष्टैर्मोक्षाधिकारिभिर्विशेषेण वा जिज्ञास्यो विधीयते[3] भगवत्तमेन नत्वन्य इति तद्ब्राप्यभावः ।

कुत एतदिति चेत्, "[4]त ब्रह्मेत्याचक्षते" (देवमी०), "एतमेव ब्रह्मेत्याचक्षते" (महैतरेय० ३ २.३.) इति सूत्रे[4] वेदे चासकृत् तस्यैव मुख्यब्रह्मत्वविधे

---

1 भाष्ये (३ ३.५) उदाहृता श्रुतिरियम् – "सर्वैश्च वेदै परमो हि देवो जिज्ञास्योऽसौ नाल्पवेदै प्रसिद्धचेत् । तस्मादेन सर्ववेदानधीत्य विचार्य च ज्ञातुमिच्छेन्मुमुक्षु" इति ।

2 "अकार सर्ववागात्मा परब्रह्माभिधायक । तयो प्राणात्मको प्रोक्तौ व्याप्तिस्थितिविधायकौ" इत्युक्तगुणविस्तर । तयाच सर्वत्र व्याप्त नियामकतया सर्वगत च ब्रह्मेत्यथात पदयोरर्थ । तच्चात्र विष्णुरेवेति व्याख्यातम् । विष्णुशब्दस्यापि व्याप्त्यर्थत्वात् । पकारस्य च नियमना-परपर्यायप्राणनार्थं सर्ववस्तुष्वन्तर्यामीत्यर्थत्वात् ।

3 त्रिविधमुक्तजीवसङ्ग्रहार्थं द्विधा ममस्यते । मनुष्येषु विशिष्टैरिति मनुष्योत्तमा मोक्षयोग्येषु अधमाधिकारिण । तेभ्यो विशिष्टा इति मध्यमाधिकारिण ऋषिगन्धर्वा उत्तमाधिकारिणो देवाश्च सगृहीता । विशिष्टेष्वपि विशेषेण जिज्ञास्य इति विशिष्य देवा ।

4 सूत्र इति देवतामीमासान्तिमसूत्रे । तत्र "विष्णुरेव हि तच्छ्रुते" इति उपान्तिमसूत्रे प्रकृतस्यैव तमिति परामर्शात् । तथाच "विष्णुरेव" इति देवमीमासापदाभ्यामेव भाष्यारम्भेण ब्रह्मपदोदितो विष्णुरित्यत्र साऽपि युक्ति स्मारिता भवति ।

---

१ "सर्वैश्च वेदैर्जिज्ञास्य" ख ग २ "गम्यते । प्रणवा–"ख.

३ "जिज्ञास्योऽभिधीयते" क ग

४ "तमेत विष्णुमेव ब्रह्मेत्याचक्षते इति सूत्रे" क ख घ

सिद्धत्वात् । "विष्णुर्ब्रह्म" इतीहापि वक्ष्यमाणत्वाच्च । तथाच श्रुति –"पठेत् वेदानयार्यानधीयीताय विद्वांसं ब्रह्म विन्देत्[1]" (कौषारव०) इत्याद्विकाऽधिकारापादनपूर्वकमेव ब्रह्मविषया जिज्ञासा तत्फल च विद्यते ॥ ० ॥

अत्राऽहु –[2]प्राकृतस्यास्य ग्रन्थस्य निर्वृत्ति ([1]प्रति प्रकृतिरेव प्रधानपदादिता प्रभवेदिति सुवचम् ।) तस्मात् प्रधानमेव जिज्ञास्य प्रतिज्ञातव्यमिति । एतत्-परिहारश्चात्र प्रकटित[2] । विष्णुरेव विजिज्ञास्य,[3] नतु प्रधानमिति प्रतिज्ञाकरणात । उपपन्नश्चैवम्भाव[3] । यथा राज्ञो दर्शनसञ्जात[4] प्रसाद-मन्तरेण बन्धकस्य निगडस्य ज्ञानमात्रान्न तद्विमुक्तदृष्टा, एवमेव ब्रह्मणो दर्शन-सञ्जात प्रसादमन्तरेण बन्धकस्य प्रधानस्य ज्ञानमात्रान्न तद्विमुक्तियुक्ता । तस्मात् पूर्णपुरुष एव जिज्ञास्य सुष्ठु प्रतिज्ञेय । तथाच श्रुति –"आत्मा वा अरे द्रष्टव्य श्रोतव्यो मन्तव्यो निदिध्यासितव्य" (बृहदा० ४४५) इत्यादिका[4] ।

[5]नन्वेवमपि जीवात्मैव[5] जिज्ञास्य, न पर, तस्यापि विषयत्वादित्यत्रापि

---

1 इय कौषारवश्रुतिरिति भाष्ये (३४३) अधिकारनिर्णयनये स्थितम् ।
2 ब्रह्म विन्देदिति प्रधानेऽपि सावसरम् । तस्यापि ब्रह्मपदगदितत्वादिति जडविज्ञानवादी प्रथम शङ्कते ।
3 एवम्भाव विष्णोरेव विजिज्ञास्यत्वम् ।
4 दर्शनसञ्जातमिति स्थितिकथनम् । राज्ञ प्रसादमन्तरेणेतीयता पूर्यते । "यथा दृष्ट्या प्रसन्न सन् राजा बन्धापनोदकृत् । एव दृष्ट स भगवान् कुर्याद् बन्धविमोचनम् (११४१–२) इत्यनुव्याख्यानम् ।
5 जडमात्रवादी नास्तिको निरस्त । इदानी जीवतत्त्ववादी शङ्कते । नन्वात्मा वा इत्यनया श्रुत्या अनात्मप्रधानव्यावृत्तिरेव क्रियते । नतु जीवस्य । तेन जीवात्मैवाऽत्रेति । तदेतदाह–नन्वित्यादि ।

---

१ ( ) एतदन्तर्गतो भाग सर्वत्र कोशेषु गलित इति यथाप्रकृतोपयोग-मर्थपूरणाय निवेशित ।
२ 'प्रकृत ग
३ "–रेव जिज्ञास्य" ख ग
४ मन्तव्य इत्यादिका क ख
५ जीव एव' ख

विष्णुरेव[१] विजिज्ञास्यो न जीव इत्युत्तरम् । नहि जीवस्य जिज्ञास्यत्वं ब्रह्मत्वं च प्रमाणसिद्धम् । विपर्ययेणानुभवात् । सिद्धं च परमात्मनः । श्रुतिदृष्टेः । तदविषयत्व च [२] नास्माकं सिद्धम् [३] । तद्वादिनोऽपि हि तदङ्गीकारे सविशेषत्वप्रसङ्गः[1] । विषयत्वनिषेधमात्रास्युपगमे च [४] तद्विषयत्व दुर्वारम्[2] । तस्मादविषयत्वं नाम वाङ्मात्रम् । वन्ध्या सुतवतीतिवत् [३]।

किञ्च, किमय जीवो ब्रह्मव्यतिरिक्त उत नेति पृच्छामः । आद्येऽपसिद्धान्तः । अन्त्ये [५] स्वोक्तदोषः स्वपक्ष एवाऽपतति । नच तद्व्यतिरिक्त एव जीवो जिज्ञास्य इत्यन्यो [६] मन्यते [६] । तस्य प्रमाणान्तरसिद्धत्वात् । अमोचकशक्तित्वाच्च [७] । अहो तर्हि भेदवादे जीवस्य मोक्षदानादिकर्मण्यशक्तिः । ईश्वरस्य त्वविकारस्याक्रियस्य न किञ्चिदपि कर्माण्युपगन्तु शक्यम् । अभेदवादे जीवस्य ब्रह्मभाव. स्वयमेव फलम् । नच तद् दातव्यम् । दातृदेयाद्यभावात् ।

---

1 अविषयत्वधर्मेण धर्मित्वमिति सविशेषत्वम् । ज्ञानित्वमिवाज्ञानित्वमपि, मौनित्वमिवामौनित्वमपि, इभ्यत्वमिवानिभ्यत्वमपि हि धर्म एव ।

2 अङ्गीकृत च विषयत्वम् – "आश्रयत्वविषयत्वभागिनी निर्विशेषचितिरेव" इति वदद्भि ।

3 तथाहि तत्त्वदीपिका – "ब्रह्मणोऽविषयत्वमनपनोद्यैव प्रतिपादयति शास्त्रमिति च विरुद्धम् । वन्ध्यात्वमनपनोद्यैव मातुर्जात पुत्र इतिवत् ।"

4 अन्यो मायावादी न मन्यते । ननु ततोऽप्यन्य कोऽपि साहसिकस्तर्हि? तदप्यचारु । कुत ? तस्य प्रमाणान्तरसिद्धत्वादित्यादि ।

---

१ 'रेव जिज्ञा –" घ.

२ "–त्व तु नास्माकम्" क घ.

३ "श्रुतिसिद्धम्" क

४ "–गमे तद्विषय –" ख

५ "अन्ते" ग.

६ "मन्येत" ख.

७ "अमोचकत्वाच्च" ग.

तस्माच्चेतनैक्य[1]मेव जिज्ञास्यमिति वय ब्रूम इति चेत्, मैवम् । तत् किं तद्वतो भिन्नमभिन्न वेत्यादि[2]विकल्पासहत्वात् । स च विकल्पस्तत्त्वदीपिका[3]चार्यैर्विस्पष्ट व्याख्यात —

"तत् किं तद्वतो भिन्नम्? उताभिन्नम्? भिन्न चेत्[4] सत्य मिथ्या वा? सत्यत्वेऽद्वैतहानि । मिथ्यात्वे भेदसत्यता स्यात् । अभिन्न चेत्[5] जीवत्वे ब्रह्मत्वेऽपि स्वयम्प्रकाशत्वेन[6] नित्यसिद्धमिति नोपदेष्टव्यम्" (तत्त्वदी० पृ ६ प ७-९) इति ।

अपिच, दातृदेयाद्यनङ्गीकारे सम्बन्धोऽपि न सम्भवति । प्रतिपाद्यप्रतिपादकलक्षण सम्बन्ध इति चेत्[7] तर्हि तद्भेदोऽङ्गीकर्तव्य[1] । कुत पुनर्भेदान्तरनिवारणम्[8]?

नचाय भेदस्तदैक्यवद् विकल्पासह । विशेषेण गतिसिद्धेः । [2]नचेश्वरस्याक्रियत्व कर्तृत्वनिवारकम् । किन्तु कार्यत्वनिवारकमेव । श्रुत्यादिभिस्तथा दर्शनात् ।

---

1 यद्यप्यविषयत्वात् प्रतिपाद्यत्वमपि न समस्तीति पुरस्तात् प्रास्तावि । तथाऽप्यभ्युपगम्येद दोषान्तरमुच्यते — तर्हि तद्भेद इति । ससृष्टि सर्वाऽपि हि भेदन गर्भिणी भवति । यदि तु सोऽभ्युपगम्येत प्रतिपाद्यस्य च प्रतिपादकस्य च, किमिति न प्रतिपत्तु? एवमन्येषामपि ।

2 अक्रियत्वमित्यक्रियमाणत्वमेव । युज्यते तत्सर्वकर्तुरित्याह — नचेत्यादि । अत एव "सर्वकर्ता न क्रियते" इत्याहाऽचार्य । न विक्रियते च । तेन उपादानत्वं निरस्ता । न निमित्तता ।

---

१ 'चैतन्यैक्य —" ग

२ "तद्वतो भिन्नमित्यादि" क ख घ

३ "तत्त्वप्रदीपिका —" ग

४ 'भिन्नत्वे सत्यम्" ख

५ "अभिन्नत्वे जीवत्वे" क.

६ "प्रकाशमानत्वेन ' ग

७ "लक्षण म इति चेत्" क.

८ 'निराकरणम्" ग.

अविकारत्वं [१] च प्रकृत्यादिवत् परिणामादिराहित्यमेव । तस्माद् भेदवादिनामेव दातृदेयादिसम्भवान्मोक्षसिद्धिरित्यभिप्रायेण "विष्णुरेव" इति भिन्नार्थावधारणम् । स्वयमेव भगवान् भेदं [२] विस्पष्ट [३] वक्ष्यति—"अन्यश्च जीवत." इति । "पृथगुपदेशात्" (२.३.२८.) इत्यादिना भगवत्तमश्च । "तथा जीवेश्वरौ भिन्नौ सर्वदैव विलक्षणौ" इति च श्रुतिः [1] । अतः परममङ्गलो [2] मुख्येष्टदेवो भगवान् [४] विष्णुरेवेष्टफलदातृत्वाज्जिज्ञास्य इत्यधिकरणस्यार्थ. [५]

॥ ० ॥ १ ॥ ० ॥

जिज्ञास्यस्य ब्रह्मण. [६] स्वरूपलक्षणविवक्षया "जन्माद्यस्य यत." (१.१.२.) इति सूत्रार्थं वक्ति—"सर्वकर्ता" इति । "यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत् प्रयन्त्यभिसंविशन्ति । तद् विजिज्ञासस्व । तद् ब्रह्म"

---

1 विष्णुतत्त्वविनिर्णयोदाहृता श्रुतिरियम्—

"यथा पक्षी च सूत्र च नानावृक्षरसा यथा ।
यथा नद्य समुद्राश्च शुद्धोदलवणे यथा ।
यथा चोरापहार्यौ च यथा पुविषयावपि ।
तथा जीवेश्वरौ भिन्नौ सर्वदैव विलक्षणौ" इति ।

परमोपनिषदियम् । विष्णुदासार्यस्तु महोपनिषदित्याह । एतद्वचनोदाहरणेन यदीद भेदे मान तर्हि तत्त्वमसीत्यभेदेऽपि समानमिति शङ्काऽपि निर्मूलिता ।

2 परममङ्गल इत्यथशब्दस्यैवार्थान्तरम् । एतदपि विष्णुपदेनैव मङ्गलाचरणाद् भाषितप्रायम् । मुख्येष्टदेव इति कार्यतावादापनोदार्थम् । विस्तृत चैतदनुव्याख्याने—"कार्यं साधनमिष्टस्य भगवानिष्टदेवता । मुख्येष्ट वा सुमनमा प्रेयस्तदिति च श्रुति" इति । तदेवाऽह—इष्टफलदत्वादिति । अत शब्दार्थोऽयम् । एतदपीष्टफलदत्वेन विशेषेण विशिष्टो जिज्ञास्य इति भाषितमेव ।

---

१ "अविकारित्वम्" ग
२ "स्वयमेव भेदम्" ख
३ "भेद स्पष्टम्" ग
४ "—देवो विष्णु—" क ख ग
५ "इत्यधिकरणार्थं स्यात्" ग
६ "अस्य ब्रह्मण" ग

तस्माच्चेतनैक्य[1]मेव जिज्ञास्यमिति वयं ब्रूम इति चेत्, मैवम् । तत् किं तद्वतो भिन्नमभिन्न वेत्यादि[2]विकल्पासहत्वात् । स च विकल्पस्तत्त्वदीपिका[3]चार्यैर्विस्पष्ट व्याख्यातः—

"तत् किं तद्वतो भिन्नम्? उताभिन्नम्? भिन्नं चेत्[4] सत्य मिथ्या वा? सत्यत्वेऽद्वैतहानिः । मिथ्यात्वे भेदसत्यता स्यात् । अभिन्न चेत्[5] जीवत्वे ब्रह्मत्वेऽपि स्वयम्प्रकाशत्वेन[6] नित्यसिद्धमिति नोपदेष्टव्यम्" (तत्त्वदी० पृ ६ प ७-९) इति ।

अपिच, दातृदेयाद्यनङ्गीकारे सम्बन्धोऽपि न सम्भवति । प्रतिपाद्यप्रतिपादकलक्षण. सम्बन्ध इति चेत्[7] तर्हि तद्भेदोऽङ्गीकर्तव्यः[1] । कुतः पुनर्भेदान्तरनिवारणम्[8]?

नचाय भेदस्तदैक्यवद् विकल्पासहः । विशेषेण गतिसिद्धेः । [2]नचेश्वरस्याक्रियत्व कर्तृत्वनिवारकम् । किन्तु कार्यत्वनिवारकमेव । श्रुत्यादिभिस्तथा दर्शनात् ।

---

1 यद्यप्यविषयत्वात् प्रतिपाद्यत्वमपि न समस्तीति पुरस्तात् प्रास्तावि । तथाऽप्यभ्युपगम्येद दोषान्तरमुच्यते—तर्हि तद्भेद इति । ससृष्टि सर्वाऽपि हि भेदेन गर्भिणी भवति । यदि तु सोऽभ्युपगम्येत प्रतिपाद्यस्य च प्रतिपादकस्य च, किमिति न प्रतिपत्तु? एवमन्येषामपि ।

2 अनियत्वमित्यक्रियमाणत्वमेव । युज्यते तत्सर्वकर्तुरित्याह—नचेत्यादि । अत एव "सर्वकर्ता न म्रियते" इत्याहाऽचार्य. । न विक्रियते च । तेन उपादानतैव निरस्ता । न निमित्तता ।

---

१ "चैतन्यैक्य—" ग

२ "तद्वतो भिन्नमित्यादि" क ख घ.

३ "तत्त्वप्रदीपिका—" ग

४ "भिन्नत्वे सत्यम्" ख.

५ "अभिन्नत्वे जीवत्वे" क.

६ "प्रकाशमानत्वेन" ग.

७ "लक्षण. स इति चेत्" क.

८ "निराकरणम्" ग

अविकारित्वं [1] च प्रकृत्यादिवत् परिणामादिराहित्यमेव । तस्माद् भेदवादिनामेव दातृदेयादिसम्भवान्मोक्षसिद्धिरित्यभिप्रायेण "विष्णुरेव" इति भिन्नार्थविधारणम् । स्वयमेव भगवान् भेद [2] विस्पष्ट [3] वक्ष्यति—"अन्यश्च जीवत." इति । "पृथगुपदेशात्" (२.३.२८.) इत्यादिना भगवत्तमश्च । "तया जीवेश्वरौ भिन्नौ सर्वदैव विलक्षणौ" इति च श्रुतिः [1] । अतः परममङ्गलो [2] मुख्येष्टदेवो भगवान् [4] विष्णुरेवेष्टफलदातृत्वाज्जिज्ञास्य इत्यधिकरणस्यार्थः [5] ॥ ० ॥ १ ॥ ० ॥

जिज्ञास्यस्य ब्रह्मण. [6] स्वरूपलक्षणविवक्षया "जन्माद्यस्य यत" (१.१.२.) इति सूत्रार्थं वक्ति—"सर्वकर्ता" इति । "यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत् प्रयन्त्यभिसविशन्ति । तद् विजिज्ञासस्व । तद् ब्रह्म"

---

1 विष्णुतत्त्वविनिर्णयोदाहृता श्रुतिरियम्—

"यथा पक्षी च मूत्र च नानावृक्षरसा यथा ।
यथा नद्य समुद्राश्च शुद्धोदलवणे यथा ।
यथा चोरापहार्यौ च यथा पुविषयावपि ।
तथा जीवेश्वरौ भिन्नौ सर्वदैव विलक्षणौ" इति ।

परमोपनिषदियम् । विष्णुदासार्यस्तु महोपनिषदित्याह । एतद्वचनोदाहरणेन यदीद भेदे मान तर्हि तत्त्वमसीत्यभेदेऽपि समानमिति शङ्काऽपि निर्मूलिता ।

2 परममङ्गल इत्यत्रशब्दस्यैवार्थान्तरम् । एतदपि विष्णुपदेनैव मङ्गलाचरणाद् भाषितप्रायम् । मुख्येष्टदेव इति कार्यतावादापनोदार्थम् । विस्तृत चैतदनुव्याख्याने—"कार्यं साधनमिष्टस्य भगवानिष्टदेवता । मुख्येष्ट वा सुमनसा प्रेयस्तदिति च श्रुति" इति । तदेवाह—इष्टफलदत्वादिति । अत शब्दार्थोऽयम् । एतदपीष्टफलदत्वेन विशेषेण विशिष्टो जिज्ञास्य इति भाषितमेव ।

---

१ "अविकारित्वम्" ग. २ "स्वयमेव भेदम्" स
३ "भेद स्पष्टम्" ग ४ "—देवो विष्णु—" ब स ग
५ "इत्यधिकरणार्थं स्यात्" ग ६ "अस्य ब्रह्मण" ग

(तैत्तिरी० ३.१.१.) इत्यादि[1]श्रुतेर्विष्णुरेव सर्वस्यास्य[2] जगतो जन्म-मोक्षादेः[1] सर्वस्य च कर्ता । अत एवासौ वेदैर्विचारणीयः[2] ॥ ० ॥ २ ॥ ० ॥

अथ प्रत्यक्षादिग्राह्यत्वे तावतैव परिपूर्तेनं जिज्ञास्यत्वनियम[3] इति शङ्का-निवृत्तये "शास्त्रयोनित्वात्" (१.१ ३) इति सूत्र व्याख्याति – "आगमोदितः" इति । मोक्षादिकर्तुरीश्वरस्य प्रत्यक्षायोग्यत्वात्, अनुमानेन च[3] सप्रतिसाधनेन दुस्साधनत्वात्[4], निर्दोषवाक्यात्मकैरागमैरेव ग्राह्यत्वमेष्टव्यम् । "नेन्द्रियाणि नानुमान वेदा ह्येवंन वेदयन्ति"[4] (भाल्लवेय०) इत्यादिश्रुतेश्च । नचाऽगमस्य प्रामाण्य नास्तीति वक्तुं युक्तम् । तन्निषेधकवाक्य[5]स्यापि तदभावप्रसक्तेः । तस्मात् सर्वथाऽपि नाऽगमप्रामाण्यनिषेधः शक्यः । युज्यते च तस्य प्रामाण्यं[6] निर्दोषत्वात्[5] । तच्च भगवान् वक्ष्यति – "वेदा नित्यत्वान्मानमुत्तमम्" इति ।

---

1 मोक्ष इति बन्धान्मोक्ष । तेन कर्तेति युज्यते । यदि परममपि पद विवक्ष्यते तदा कर्तेति दाता ।

2 मतो विष्णुरेव सर्वकर्ता, अत स एव विजिज्ञास्य इति समस्तान्वय ।

3 वेदैर्विचारणीयत्वनियम इत्यर्थ ।

4 इय भाल्लवेयश्रुतिरिति तत्त्वनिर्णये स्थितम् ।

5 निर्दोष हि वाक्यमागम. । अत एवैतावन्तमर्थमभिसूचयितु तत्पदमुपादत्त भगवानागमोदित इति । अन्यथा शास्त्रोदितो वेदोदित इत्याद्यवक्ष्यत् । उक्त च – "प्रत्यक्षवच्च प्रामाण्य स्वत एवाऽगमस्य हि" इति ।

---

१ "इति श्रुतेर्विष्णु –" क.

२ "सर्वथाऽस्य" ग.

३ "– मानेन सप्रति –" क.

४ "दुस्साधत्वात्" ख. घ.

५ "तन्निषेधवावय –" ख. घ.

६ "च प्रामाण्यम्" ख

अत.[1] केवलागमगम्यत्वादीश्वरोऽवश्य जिज्ञास्य. प्रत्यक्षादि ॥ ० ॥ ३ ॥ ० ॥

यदि[2] तद्वच्छास्त्रैकगम्यस्तदन्योऽपि स्यात्, तर्हि[1] स वाऽय वा जिज्ञास्य इति विकल्प. स्यादित्याशङ्का परिहरन् "तत्तु समन्वयात्" (१.१ ४.) इति सूत्र व्याख्याति—"समन्वयात्" इति । विष्णुरेव समन्वयादागमोदित, नान्य इत्यन्वय । अय भाव । [3]सोऽय भगवानेक एव [2] तत्तद्वाक्यपदादीना सुमुख्यान्वयात्[3] सर्वकर्तृत्वेन वेदेषूदित, तथैवेतिहासपुराणादिष्वपि[4] स एवोदित । कुत.? तत्तच्छब्दप्रवृत्तिहेतूना[5] गुणाना तस्मिन्नेव सम्यक्

---

1 निर्दोषताया अप्यागमपदार्थत्वादागमा इति सदागमा । सर्व वाक्य साव-धारणमित्यागमोदित इति सदागमैकविज्ञेय । अथवा यत आगमोदित एव सर्वकर्ता यतश्च विष्णुरेव सर्वकर्ताऽऽगमोदितोऽत स विष्णुरेव विजिज्ञास्य इति मूलान्वय । इदेतदुक्तम्—अत केवलागमेत्यादि ।

2 धर्माधर्मादिर्नाकनरकादेश्च शास्त्रैकगम्यत्वात् तद्वदिति । परममुख्य-तत्परत्वेनैतत्पर्यं । अवान्तर हि तत्परत्व धर्मादिषु । एकशब्दो वा मुख्या-र्थोऽपि व्याख्येय । परममुख्यवृत्त्या मोक्षदत्वेन वा शास्त्रगम्य इति ।

3 भगवानेव सर्वैरपि पदै सर्वैरपि वेदैरुच्यते इति प्रथमा प्रतिज्ञा । कुत ? समन्वयात्, पदादीना परस्पर सुमुख्यान्वयात् । तथाऽपि स एवेति कुत ? शब्दार्थाना तस्मिन्नेव सम्यगन्वयात् । तदपि कुत ? समन्वयादेव । उपक्रमादितात्पर्यलिङ्गादिति । उक्त हि भाष्ये—"अन्वय उपपत्त्यादि-लिङ्गम्" इति । अपिच श्रुत्यन्तरसमन्वयात् समाख्यातश्चैतत् सिद्धयति । यथा "आत्मा वा इदमग्र आसीत्" इति श्रुति "नारायणो वा इदमग्र आसीत्" इति श्रुत्या नारायणपर इति निर्णीयते । तथाच समन्वयादित्येकेनैव भाष्यपदेन त्रिविक्रमपदेन पूर्वदेवा इव पूर्वपक्षा सर्वेऽपि प्रतिक्षिप्ता भवन्ति।

---

१ "तदा स वा" ग
२ "भगवानेव" व
३ "सम् मुख्यान्वयात्" ग
४ "—हामपुराणेऽपि" ख
५ "—प्रवृत्तिनिमित्तानाम्" क

सम्बन्धात् । तदिद विचार्यमाणे सत्युपक्रमादितात्पर्यलिङ्गादवगम्यते । निर्णीत-श्रुत्युन्तरसाह्राय्याच्च । अतो न विष्णोरन्यो मोक्षदत्वेन शास्त्रगम्योऽस्ति । येनोक्तविकल्पाशङ्कावकाशः [1] । "नान्य.[1]—" (पुरुष० १७.) इति श्रुति-प्रतिषेधबलाच्च तदभावोऽवसीयते ॥ ० ॥ ४ ॥ ० ॥

ननु नाय सर्वशब्दसमन्वय· परमात्मनि समस्ति [2] । अशब्दत्वश्रुतिभिस्तथा-त्वावधारणात [2] । लक्षणमेव हि [3] तद्व्यवहारो निर्वोढव्यो विद्वद्भिरिति पूर्वपक्ष प्रतिक्षिपन् [4] "ईक्षतेर्नाशब्दम्" (१.१ ५.) इत्येतदधि[5]करण विवृणोति—"ईक्षतेश्च" इति । अत्र चशब्दः नाशब्दमिति [3] सूत्रावयवार्थ-ग्राहक [6] । ईक्षतेश्च आगमोदित एव विष्णुर्भगवान् । तथाहि—यत्तत् समन्वय-गम्यत्वेन प्रतिज्ञात सर्वोत्कृष्ट विष्ण्वाख्यं ब्रह्म तत् तावन्नाशब्दम् । कुतः? "पुरुषमीक्षते" (षट्प्रश्न० ५.५) इत्यादावीक्षणीयत्वप्रतीते. । नच वचन विनाऽऽगमगम्यस्य प्रत्यक्षगम्यस्येवेक्षणीयत्व सम्भवति । यथा धर्मादेः । तस्मा-दीक्षणीयत्वान्यथानुपपत्त्या किं तदिति प्रश्नपरिहारान्यथानुपपत्त्या च शब्दोदित-मेव तदेष्टव्यमित्यर्थः ।

---

1 'तमेव विद्वानमृत इह भवति नान्य पन्था अयनाय विद्यते" इति तैत्तिरी-याणाम् । "तमेव विदित्वाऽति मृत्युमेति नान्य पन्था विद्यतेऽयनाय" इति च श्वेताश्वताराणा पाठ ।

2 समस्ति सम्भवति ।

3 आगमोदित इत्यनुक्तार्थश्चकार । तेन नाशब्दमिति सूत्रावयव सुगृहीतार्थो भवति ।

---

१ "येनोक्तशङ्कावकाश" ख

२ "तथाऽवधारणात्" ग

३ "लक्षणयैव तद्वचव—" क

४ "प्रतिक्षिपत" ग

५ "इत्यधिकरणम्" ग

६ "सूत्रावयवग्राहक" ख

युक्त्याविभिर्वाच्यत्वदर्शनादिति वा ईक्षतिशब्दार्थः । अविषयस्य [१] कथं वाच्यत्वं युक्तितो दृश्यमिति चेत्, अविषयत्वमेव कथं दृष्टम्? व्याहृतिदर्शनात् । "श्रोतव्यो मन्तव्यः" (बृहदा०४.४.५.) इत्यादौ च [२] वागादिविषयत्व-दर्शनात् । अशब्दत्वश्रुतयस्त्वप्रसिद्धत्वादेवावाच्यत्वं वदन्ति "अशब्दम्—" (कठ. ३.१५.) इतीति सुवचत्वात् । नचावाच्यस्य लक्षणा युज्यते । अदृष्टत्वात् । नच निर्विशेषत्वान्नायं दोष इति वाच्यम् । निर्विशेषत्वविशेषस्यानपायात् । [१] नच निर्विशेषं नाम [३] शून्यादन्यद् भवितुमर्हति । अन्योन्यलक्षणसाम्यात् । अस्माकं तु सविशेषानन्तगुणत्वाद् ब्रह्मणः सर्वशब्दवाच्यत्वं सुग्रहमित्यन-वद्यम् ॥ ० ॥

"गौणश्चेन्नात्मशब्दात्" (१.१.६.) इत्यादीनि च [४] सूत्राण्यनेनैव वाक्येन व्याख्यातानि भवन्ति । तत् कथम्? अशब्दत्वं निराकुर्वंश्चशब्दो गौणत्वमपि निराकर्तुमलम् । समुच्चयवाचकत्वात् [2] । ईक्षतिशब्दस्त्वात्मशब्दार्थमुप-

---

1 यदि निर्विशेषत्व प्रामाणिकम्, न तर्हि निर्विशेषत्वं विशेषो दोषः । निर्विशेषत्वमनपह्नायैव हि धर्मान्तरनिवारण निर्विशेषत्व नाम । नहि राज्ञः सभाया न भणितव्यमित्याज्ञा स्वेनैव व्याहन्यते । स्यादेवम्, यदि निर्विशेषत्व प्रामाणिकम् । न भो. । शून्यसमानयोगक्षेमस्य तस्य शोभनादन्यत्र धारणविरहणात् । तदेतदाह—नचेत्यादि ।

2 अयमर्थः । ईक्षतेश्चेति चकार आगमोदितश्च इत्यप्यन्वेति । आगमोदित इत्यशब्दत्व निराकरोति । चशब्दाद् गौणत्वमपि । तयाच न केवलमाग-मोदित इत्यशब्द इति विन्त्यगौणश्च । कुतः? ईक्षतेः । आत्मशब्देनेक्षणादि-गुणवाततत्वदर्शनात् । स हि सादादीक्षते । अथ च "जानथ आत्मानम्" इत्यात्मशब्देन ततश्चागौणत्वेन स ह्यागमोदित इति वर्णवान्तरम् ।

---

१ "अप्रमेयस्य" ग.
२ "इत्यादौ वागादि—ख.
३ "निर्विशेषत्व नाम" क ग.
४ "इत्यादीनि सूत्रा—" ख.

सक्षय[1]तीत्युपपत्ते [1] । तद्वत् तन्निष्ठमोक्षोपदेशादीच्च [2] ।

अथवा, अस्मिन्नधि[3]करणे "ईक्षते" इति प्रथम हेतु[4]मुक्त्वा यदाब्देन आत्मशब्दादीनि [5] हेत्वन्तराणि समुच्चिनोति । हेतुमतस्तु [6] प्रागेव "आगमोदित" इति वचनात् सिद्धे ॥ ० ॥

नचैतावता येनकेनचित् पदेन यत्किञ्चित् सग्राह्यमित्यतिप्र[7]सङ्ग । ईदृशमेवानेन सग्राह्य नान्यादृशमिति विशेषकल्पते । नहि वयमिह [8] यत्किञ्चदसूत्रितमभाषितमवेदयेदितमयुक्तियुक्त चाभिप्रेत [9] मूम । नापि सर्वयाऽप्यशक्यम्[10] । किन्तु लोकतो वेदतो वा रूढमेव हि वयतु शक्य नाम । तदेवेष्टमप्युक्त मूम [11] । तत्सम्बद्धमेव चोपलक्षित समुच्चित च सदृशमेव । अनयोरप्येतादृशशक्तिविषयत्वात् । परिगृहीतश्चाय न्याय सर्वत्रापि शाब्दिके [12] । सल्लक्षणेषु

---

1 ईक्षणादीनात्मनो धर्मान् वदन् धर्मिणमात्मानमुपलक्षयति तेन वाच्येन वाचकमात्मशब्द कटाक्षयतीत्युपपत्ते ।

---

१ "उपलक्षयत्युपपत्ते" ख ग घ

२ "तन्निष्ठस्य मोक्षादीच्च" क ख ग

३ "एतस्मिन्नधिकरणे" ग

४ "प्रथमहेतु–" ख ग

५ "आत्मशब्दादित्यादीनि" ख घ

६ "–मतस्तु आगमोदित" क ग

७ "सग्राह्यमिति प्रसङ्ग" ख

८ "न वयमिह" क ग

९ "–युक्तमभिप्रेतम्" क ग "अयुक्तिक चाभिप्रेतम्" ग

१० "नाप्यशक्यम्" ग

११ "–ष्टमपि वक्तु मूम" क

१२ "सर्वत्र शाब्दिके" ग

शास्त्रेषु सुलक्ष्यत्वात्[1] । लोकेऽप्येव [1]गृष्टिमदादित्यादौ वत्स चेत्यपि ग्राह्यम्[2] । न तावता वत्सतरमपी[3]त्यादि । अतोऽत्र नाति[4]प्रसङ्ग[4] ।

[2] अथायमाशय । ईक्षते, आत्मशब्दात्, तन्निष्ठमोक्षोपदेशात्, हेयत्वावचनात्,

---

1 "एकवारप्रसूता गौर्गृष्टि" इत्याभिधानम् ।

2 भाष्ये गदितमुपलक्षित समुच्चित च समुदितमधिकरणार्थसार सगृह्णाति — अथायमाशय इति । वस्तुतस्तु ईक्षतेरिति मुखत एव सर्वाण्यप्यधिकरण-सूत्राणि व्याचख्यौ भगवान् भाष्यकार । तथाहि — ईक्षते पुरुषमीक्षत इतीक्षणीयत्वश्रवणादिति प्रथमसूत्रार्थं । "गौणश्चेन्नात्मशब्दात्" (१ १ ६) इति द्वितीयमपि सूत्र व्याख्यातमीक्षतेरिति । "आत्मान परयेदित्यात्मत्वेनेक्षणश्रवणात् । ईक्षणीय आत्मनि बहुलमात्मशब्द-प्रयोगवीक्षणात् । "तन्निष्ठस्य मोक्षोपदेशात्" (१ १ ७) इति तृतीयम् । एतदप्याह — ईक्षते । तस्यात्मन ईक्षणादेव "यस्यानुविद्य प्रतिबुद्ध आत्मा" इति मोक्षोपदेशदर्शनात् । "हेयत्वावचनाच्च" (१ १ ८) इति चतुर्थम् । एतदप्युक्तम् — ईक्षते । "तमेवैक जानथ" इति तस्यैव केवल हेयप्रत्यनीकतयेक्षणीयत्वदर्शनात् । "स्वाप्ययात्" (१ १ ९) इति पञ्चमम् । इदमप्याह — ईक्षते । "आत्मन्येव विलापयति" इति स्वस्मि-न्नेवाप्ययदर्शनात् । "गतिसामान्यात्" (१ १ १०) इति षष्ठम् । इदन्तु सूत्र विष्णुरेव समन्वयात् सर्वागमोदित इति पुरैव निगदव्याख्यातम् । "श्रुतत्वाच्च" (१ १ ११) इति सप्तमम् । इदमप्युक्तम् — ईक्षतेरिति । श्रुतिभिरीक्षणीयत्वमेव हि श्रुतत्व नाम । एवमीक्षतेरिति त्र्यक्षरी साक्षादेव सप्तापि सूत्राणि व्याचक्षाणा "अनन्तोऽर्थं प्रकटित" इति वच प्रत्याययति । नच सूत्रपदाना तर्हि वैयर्थ्यं शङ्क्यम् । पञ्चरूपाद्यमितार्थ-विवक्षयाऽनन्तश्रुतिनिर्णायकतया च सार्थक्यात् । मन्तुरवबोधाय मग्रहण-मेव हि भाष्योद्दिष्ट । न तावता गतार्थता । नह्योङ्कारेण त्रयी गतार्था भवति।

---

१ "सुलभत्वात्" ग

२ 'चेत्यादि ग्राह्यम्" क ख

३ "वत्सान्तरमपीत्यादि" ग

४ "अतो नाति —" ख "अतो नात्याति —" ग

सङ्गोता [1] ऽन्यत्रापि [1] संगृह्यते । विषयोक्त्यैव संशयादेः सूपलक्ष्यत्वात् । एवमेवाधिकरणान्तरेष्वपि साष्टाङ्ग [2] एष नयः पृथक् [2] सर्वोऽपि सूच्यते, यत्राधिकरणार्थः पृथग् गृह्यते । सह गृह्यते चेन्नयोऽपि सहैव । अपिचास्मिंस्तत्त्वावादप्रमेये विष्णुरिति विशेष्यपदेन धर्मिण गृहीत्वा, विशेषणपदान्तरैः सिषाधयिषितानि धर्मान्तराणि तस्य प्रतिश्रुत्य, समन्वयादिति हेतुं प्रयुज्य, ईक्षतेरन्वयव्याप्त्या चकारादनीक्षतेर्व्यतिरेकव्याप्त्या च [3] (साध्य प्रसाध्य [4]) खवदि- [3] त्युदाहरणमुदाजहार । सिषाधयिषिताना धर्मान्तराणामतिबहुत्वात् पर्यायेण तत्तत्प्रतिज्ञानम् । नामहेत्वादेस्तु प्रायेण निर्विशेषत्वादपृथक्प्रयोगः । एवं तत्साधनधर्माणा साध्यधर्मिणि सम्यक् संयोगात् स्वपक्षसाधने कृते [4] परपक्षदूषणं द्वितीयेऽध्याये [5] करिष्यते । स्वपक्षदोषपरिहारश्च सूक्तिभि. [5] । अनेनैव

---

1 अन्यत्र सङ्गोता कथिताऽत्रापि सगृह्यते ।

2 ननु कानि तान्यङ्गानि, यैरष्टाङ्ग इत्युच्यते । उच्यते – विषयस्तावदादिम' । सशयो द्वितीय । पूर्वस्य चापरस्य च पक्षस्य त्रीणि त्रीण्यङ्गानि । पूर्वपक्षसमर्थनम्, सिद्धान्तयिष्यमाणनिराकरणम्, विपर्यये पर्यवसानमिति पूर्वपक्षस्य । सिद्धान्तसाधनम्, पूर्वपक्षबाधनम्, प्रयोजनोपसहारश्चेत्यपरपक्षस्येत्याहुत्याष्टाङ्गो नय उच्यते । पूर्वपक्षस्यैकीकरणेन, सिद्धान्तसाधनेनैव पूर्वपक्षबाधन च गतार्थं मन्यमाना पञ्चाङ्गमप्यधिकरणमाहु ।

3 खशब्दवदित्यर्थ । तद्यथा "कूट ख विदल व्योम" इति भूताकाशे प्रसिद्धमपि खमिति नाम "ख ब्रह्म" इति श्रौतप्रसिद्धया मुख्यवृत्त्या ब्रह्मपरमिति ज्ञायते तद्वदन्येऽपि लोकशब्दास्तत्तद्गुणसमन्वयादिति ।

4 ब्रह्मशब्दाभ्यासादिहेतूकृतधर्मणा साध्यधर्मिणि विष्णौ सम्यक् सयोगात् स्वपक्षस्य विष्णोरेवाऽनन्दमयादित्वस्य साधने कृत इत्यादि ।

5 करिष्यत इति वर्तते द्वितीयाध्याय एव ।

---

१ "सगृहीता" ग. २ "नय. सर्वोऽपि" ख.

३ "व्याप्त्या वा" घ.

४ ( ) एतदन्तर्गतो भाग कोशेषु गलित. । अर्थसङ्गत्याय यथासम्भव निवेशित ।

५ "द्वितीयाध्याये" ग.

स्वाप्ययात्, गतिसामान्यात्, श्रुतत्वाच्च न गौणो नाशब्दश्चायम्, तस्मात् परमात्मन्येव सर्वशब्दसमन्वयप्रतिज्ञाया नाणुरपि विरोधोऽस्तीति ॥०॥ ५॥०॥

अथास्मिन्नध्याये [1] तमेव समन्वय साधयति । तत्र प्रथमपादेऽन्यत्र प्रसिद्धानां नाम [2]शब्दाना साधयति [1] ।

"ब्रह्म पुच्छम् – [2]" (तैत्तिरीय० २.५.२.) इति श्रुतेर्मस्यकस्यचिदवयवमात्रत्वेन प्रतीते ब्रह्मणि [3] कथमानन्दमयादिशब्दानामवयविनि प्रसिद्धानां समन्वयः सिद्ध्यति? कुतश्चैतावन्मात्र [4]मसमग्रं मीमास्यमिति मन्दाशङ्का [5]परिहारायावयवमात्रातिरिक्त ब्रह्मेति वक्तुम् – "आनन्दमयोऽभ्यासात्" (१.१.१२.) इत्यधिकरण व्याख्याति – "पूर्णानन्दः" इति । अनेन च भाष्यपदेनास्मिन्नधिकरणे आनन्दमयो विषय इत्युक्तं भवति । तत्राय सशयः – किमयमानन्दमयो ब्रह्मादिः प्रकृतिर्विष्णुर्वेति । किं तावत् प्राप्तमिति विचार्यते । ब्रह्मशब्दादेव ब्रह्मादिः प्रकृतिर्वाऽऽनन्दमय इति पूर्वः पक्षः [6] । तत्र ब्रह्मशब्दस्य सोपचारत्वात्, अत्र परममुख्यार्थत्वाच्च [7] विष्णुरेवाऽऽनन्दमय इति सिद्धान्त इत्याद्यधिकरण [8]भङ्गी

---

1 साधयति समन्वयमिति वर्तते ।

2 "तस्माद् वा एतस्माद् विज्ञानमयात् । अन्योऽन्तर आत्माऽऽनन्दमय । तेनैष पूर्ण । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वय पुरुषविध । तस्य प्रियमेव शिर । मोदो दक्षिण पक्ष । प्रमोद उत्तर. पक्ष । आनन्द आत्मा । ब्रह्म पुच्छ प्रतिष्ठा" इति समग्राऽऽनुपूर्वी ।

---

१ "अस्मिन्नध्याये" ग

२ "प्रसिद्धनामशब्दानाम्" ग

३ "प्रतीतब्रह्मणि" ख "प्रतीतेर्ब्रह्मणि" ख.

४ "कुतश्चैतन्मात्र –" ख. ग घ.

५ "– मित्याशङ्कापरि –" ग.

६ "पूर्वपक्ष" क ख. ग.

७ "मुख्यत्वाच्च" ग

८ "ऽधिकरण –" ग

सङ्गृहीता[१] ऽन्यत्रापि[१] संगृह्यते । विषयोक्तयैव संज्ञादेः सूपलक्ष्यत्वात् । एवमेवाधिकरणान्तरेष्वपि साष्टाङ्ग[२] एष नयः पृथक् [२]सर्वोऽपि सूच्यते, यत्राधिकरणार्थः पृथग् गृह्यते । सह गृह्यते चेन्नयोऽपि सहैव । अपिचास्मिंस्तत्त्वादप्रमेये विष्णुरिति विशेष्यपदेन धर्मिणं गृहीत्वा, विशेषणपदान्तरैः सिषाधयिषितानि धर्मान्तराणि तस्य प्रतिश्रुत्य, समन्वयादिति हेतुं प्रयुज्य, ईक्षतेरन्वयव्याप्त्या चकारादनीक्षतेर्व्यतिरेकव्याप्त्या च[३] (साध्य प्रसाध्य[४]) खवदि-[३] त्युदाहरणमुदाजहार । सिषाधयिषितानां धर्मान्तराणामतिबहुत्वात् पर्यायेण तत्तत्प्रतिज्ञानम् । नामहेत्वादेस्तु प्रायेण निर्विशेषत्वादपृथक्प्रयोगः । एवं तत्साधनधर्माणां साध्यधर्मिणि सम्यक् संयोगात् स्वपक्षसाधने कृते[४] परपक्षदूषणं द्वितीयेऽध्याये[५] करिष्यते । स्वपक्षदोषपरिहारश्च सूक्तिभिः[५] । अनेनैव

---

1 अन्यत्र सङ्गीता कथिताऽत्रापि सगृह्यते ।

2 ननु कानि तान्यङ्गानि, यैरष्टाङ्ग इत्युच्यते । उच्यते -- विषयस्तावदादिमः । सशयो द्वितीय. । पूर्वस्य चापरस्य च पक्षस्य त्रीणि त्रीण्यङ्गानि । पूर्वपक्षसमर्थनम्, सिद्धान्तयिष्यमाणनिराकरणम्, विषयंये पर्यवसानमिति पूर्वपक्षस्य । सिद्धान्तसाधनम्, पूर्वपक्षबाधनम्, प्रयोजनोपसंहारश्चेत्यपरपक्षस्येत्याहुरष्टाङ्गो नय उच्यते । पूर्वपक्षस्यैवोत्थापनेन, सिद्धान्तसाधनेनैव पूर्वपक्षबाधन च गतार्थं मन्यमानाः पञ्चाङ्गमप्यधिकरणमाहु. ।

3 खशब्दवदित्यर्थः । तद्यथा "खं पुनः स विदल व्योम" इति भूताकाशे प्रसिद्धमपि खमिति नाम "स ब्रह्म" इति श्रौतप्रसिद्धया मुख्यवृत्त्या ब्रह्मपरमिति ज्ञायते तद्वदन्येऽपि सोक्तशब्दास्तत्तद्गुणमन्वयादिति ।

4 ब्रह्मशब्दाभ्यामादिहेतूक्तधर्मिणा साध्यधर्मिणि विष्णौ सम्यक् सयोगात् स्वपक्षस्य विष्णोरेवाऽनन्दमयादित्वस्य साधने कृत इत्यादि ।

5 करिष्यत इति वर्तते द्वितीयाध्याय एव ।

---

१ "सगृहीता" ग. २ "नय· सर्वोऽपि" ग.

३ "व्याप्त्या वा" घ.

४ ( ) एतदन्तर्गतो भाग. कोशेषु स्खलितः । अयंमाङ्कृत्याय मयाऽम्भव निवेशित. ।

५ "द्वितीयाध्याये" ग.

वादेन साक्षात् तत्त्वे निर्णीते सत्यन्त्याध्यायाभ्या साधन फल च प्रपञ्च्येते [1] इति भवति रमणीयम् । तस्मात् सोऽय समन्वयशब्दस्तास्ता सिद्धान्तयुक्तीर्वक्ति । तथाचावोचद् भगवानेव भाष्ये—"अन्वय उपपत्त्यादिलिङ्गम्" (१ १.४) इति । तैरेव च [2] तत्त्व निर्णीयते । "तै सम्यक् प्रविचारिते । मुख्यार्थो भगवान् विष्णु [1]—" (१ १ १२०) इति ह्यनुव्याख्यायाम् । एवञ्चास्मिन्नधिकरणे ब्रह्मशब्दाभ्यास समन्वयशब्दोक्त । उत्तरे तद्धर्मोपदेश इत्यादि वेदितव्यम् ॥०॥

अयमधिकरणार्थ —आनन्दमयादिप्रकरणेषु ब्रह्मशब्दस्याभ्यासाद्[3] विष्णुरेव पूर्णानन्द. पूर्णान्नादिश्च[2] । नचान्नादीना[4] विकारो मयडर्थो मन्तव्य । क्वचित् तदर्थस्यापि मयटो विष्णावर्थान्तरमेव सुघटमिष्टम् । निर्दिष्ट चैतद् विस्पष्ट प्राचुर्यापरपर्याय पूर्णत्व नाम[3] । यस्य खल्वानन्द " को ह्येव[4]—" (तैत्तिरीय० २ ७) इति सहेतुव्यपदेश विधीयते[5] प्रतिज्ञामात्रेणार्थसाधन-

---

1 "उपक्रमादिलिङ्गेभ्यो नान्या स्यादनुमा तत । त एवान्वयनामानस्तै सम्यक् प्रविचारिते । मुख्यार्थो भगवान् विष्णु सर्वशास्त्रस्य नापर" इत्यनुव्याख्यानवचन समन्वयाधिकरणगम् ।

2 ईक्षतेश्चेति चकार पूर्वत्रोत्तरत्र चान्वयी देहलीदीपसमानधर्मा । तेन पूर्णानन्द इत्यत्राप्याकृष्यते पूर्णानन्दश्चेति । तस्य चार्थ उच्यते—पूर्णान्नादिश्चेति ।

3 'विकारशब्दान्नेति चेन्न प्राचुर्यात्' (१ १ १३) इति द्वितीय सूत्रमनेन व्याकृतम् ।

4 "को ह्येवान्यात् क प्राण्याद् यदेष आकाश आनन्दो न स्यात्" इति समग्रा श्रुति ।

5 तथाहि सूत्रम्—"तद्धेतुव्यपदेशाच्च" (१ " नाल्प सुख भवेत्" इति वचनादिदमपि पूर्णा

---

१ 'प्रपञ्च्यते" क ग

२ "तैरव तत्त्वम्" ख

३ "—शब्दाभ्यासात्

४ "नचाऽनन्दादीनाम्

पटुनाऽपि [1] वेदेन । नहि निर्हेतुकमेव केवलं [2] केनचित् कल्प्यते । स तावत् प्रमाणतः पूर्णानन्दः । मन्त्रवर्णोपायस्य सत्यादेः 'आनन्दादिप्रकरणानां च सामान्यविशेषोक्तित्वात् । तद्गीयमानस्य च तवानन्दादेः पूर्णत्वं भवति पूर्वापरानुसन्धानेन [2] । महावाक्योपायत्वात् । नहि केवलाल्पवाक्योपायः पूर्णतामर्हति । नच तदितरः प्रकृतियिरिञ्च्यादिः पूर्णानन्द इति वक्तुं पार्यते । परतन्त्रत्वात्, परिच्छिन्नत्वाच्च [3] । विष्णोः स्वातन्त्र्यादिसद्भावात्, स्वकीयेषु ब्रह्मादिषु यथायोग्यानन्दपरिपूरणाच्च [3] पूर्णानन्दत्वं [4] सुयुक्तम् ।

शतशतांशादिभावेन सङ्ख्यया परिमाणेन च परिमिता [5] नन्देभ्यश्चतुर्मुखमुखेभ्यश्चित्प्रकृतेश्च परिच्छिन्नानन्दाया [6] वाङ्मनसागोचरत्वेनामितानन्दस्य विष्णोर्भेदव्यपदेशोऽपि [4] पूर्णानन्दपदवेदितः [7] । अमितस्यैव मुख्यतः पूर्णत्व- [8] सम्भवात् ।

---

1 "सत्यं ज्ञानमनन्तं ब्रह्म" इति वाक्यस्य ।

2 तथाच सूत्रम् – "मान्त्रवर्णिकमेव च गीयते" (१ १ १५.) । मन्त्रवर्णेऽनन्तपदेनैवाऽऽनन्दनिर्देशात् । पूर्णमेव ह्यनन्तम् । तेन पूर्णानन्दपदेनैव मान्त्रवर्णिकताऽपि निरूपिता । तथाचानुव्याख्यानम् – "अनन्तत्व सुनिर्णीत पूर्णानन्दो हि नाल्पके" इति ।

3 तथाच सूत्रम् – "नेतरोऽनुपपत्ते." । (१.१.१६.) परिच्छिन्नत्वादिति पूर्णपदवेदित हेतुमाह । परिच्छेदो ह्यपूर्णता । एव पूर्ण एव हि स्वतन्त्रो भवति । स्वकीयेषु स्वयोग्यमानन्द पूरयतीति पूर्णानन्द इति च गमनिकान्तरम् ।

4 तथाच सूत्रम् – "भेदव्यपदेशाच्च" (१.१.१७.) इति ।

---

१ "पटुना वेदेन" ब. २ "निर्हेतुकेन केवलम्" ग. घ.
३ "–मन्दपूर्णत्वाच्च" ग. ४ "–त्व युक्तम्" ग.
५ "च मुक्ता–" ब. ग. घ. ६ "परिच्छिन्नायाः" ब. ग. घ.
७ "–पदोदित." ग. घ. ८ "पूर्णानन्दत्व–" ब.

वादेन साक्षात् तत्त्वे निर्णीते सत्यन्त्याध्यायाभ्या साधन फल च प्रपञ्च्येते [1] इति भवति रमणीयम् । तस्मात् सोऽय समन्वयशब्दस्तात्पर्यः सिद्धान्तयुक्तीर्वक्ति । तथाचावोचद् भगवानेव भाष्ये—"अन्वय उपपत्त्यादिलिङ्गम्" (१.१.४.) इति । तेरेव च [2] तत्त्व निर्णीयते । "तै सम्यक् प्रविचारितै । मुख्यार्थो भगवान् विष्णु [1]—" (१ १ १२०.) इति ह्यनुव्याख्यायाम् । एवञ्चास्मिन्नधिकरणे ब्रह्मशब्दाभ्यास समन्वयशब्दोक्त । उत्तरे तद्धर्मोपदेश इत्यादि वेदितव्यम् ॥०॥

अयमधिकरणार्थ —आनन्दमयादिप्रकरणेषु ब्रह्मशब्दस्याभ्यासाद् [3] विष्णुरेव पूर्णानन्द' पूर्णान्नादिश्च [2] । नचान्नादीना [4] विकारो मयडर्थो मन्तव्यः । क्वचित् तदर्थस्यापि मयटो विष्णावर्थान्तरमेव सुघटमिष्टम् । निर्दिष्ट चैतद् विस्पष्ट प्राचुर्यापरपर्याय पूर्णत्व नाम [3] । यस्य खल्वानन्द." को ह्येव [4]—" (तैत्तिरीय० ३ ७) इति सहेतुव्यपदेश विधीयते [5] प्रतिज्ञामात्रेणार्थसाधन-

---

1 "उपक्रमादिलिङ्गेभ्यो नान्या स्यादनुमा तत । त एवान्वयनामानस्तै सम्यक् प्रविचारिते । मुख्यार्थो भगवान् विष्णु सर्वशास्त्रस्य नापर" इत्यनुव्याख्यानवचन समन्वयाधिकरणगम् ।

2 ईक्षतेश्चेति चकार पूर्वत्रोत्तरत्र चान्वयी देहलीदीपसमानधर्मा । तेन पूर्णानन्द इत्यत्राप्याकृष्यते पूर्णानन्दश्चेति । तस्य चार्थ उच्यते—पूर्णान्नादिश्चेति ।

3 "विकारशब्दान्नेति चेन प्राचुर्यात्" (१ १ १३) इति द्वितीय सूत्रमनेन व्याकृतम् ।

4 "को ह्येवान्यात् क प्राण्याद् यदेष आकाश आनन्दो न स्यात्" इति समग्रा श्रुति ।

5 तथाहि सूत्रम्—"तद्धेतुव्यपदेशाच्च" (१ १ १४) इति । "भूमा सुख नाल्पे सुख भवेत्" इति वचनादिदमपि पूर्णानन्दपदोदितम् ।

---

१ "प्रपञ्च्यते" क ग.

२ "तैरेव तत्त्वम्" ख.

३ "—शब्दाभ्यासात्" क ग.

४ "नचाऽनन्दादीनाम्" क ख घ

पटुनाऽपि [१] वेदेन । नहि निर्हेतुकमेव केवल [२] केनचित् कल्प्यते । स तावत् प्रमाणत. पूर्णानन्दः । मन्त्रवर्णवाक्यस्य सत्यादेः [1]आनन्दादिप्रकरणाना च सामान्यविशेषोक्तित्वात् । तद्गीयमानस्य च तदानन्दादेः पूर्णत्वं भवति पूर्वापरानुसन्धानेन [2] । महावाक्यार्थत्वात् । नहि केवलाल्पवाक्यार्थः पूर्णतामर्हति । नच तदितरः प्रकृतिविरिञ्चादिः पूर्णानन्द इति वक्तु पार्यते । परतन्त्रत्वात्, परिच्छिन्नत्वाच्च [3] । विष्णो. स्वातन्त्र्यादिसद्भावात्, स्वकीयेषु ब्रह्मादिषु यथायोग्यानन्दपरिपूरणाच्च [3] पूर्णानन्दत्वं [४] सुयुक्तम् ।

शतशताशादिभावेन सङ्ख्यया परिमाणेन च परिमिता [५]नन्देभ्यश्चतुर्मुखमुखेभ्यश्चित्प्रकृतेश्च परिच्छिन्नानन्दाया [६] वाङ्मनसागोचरत्वेनामितानन्दस्य विष्णोर्भेदव्यपदेशोऽपि [4] पूर्णानन्दपदवेदितः [७] । अमितस्यैव मुख्यतः पूर्णत्व-[८] सम्भवात् ।

---

1 "सत्य ज्ञानमनन्त ब्रह्म" इति वाक्यस्य ।

2 तथाच सूत्रम् – "मान्त्रवर्णिकमेव च गीयते" (१ १ १५.) । मन्त्रवर्णेऽनन्तपदेनैवाऽनन्दनिर्देशात् । पूर्णमेव ह्यनन्तम् । तेन पूर्णानन्दपदेनैव मान्त्रवर्णिकताऽपि निरूपिता । तथाचानुव्याख्यानम् – "अनन्तत्व सुनिर्णीत पूर्णानन्दो हि नाल्पके" इति ।

3 तथाच सूत्रम् – "नेतरोऽनुपपत्ते" । (१ १ १६) परिच्छिन्नत्वादिति पूर्णपदवेदित हेतुमाह । परिच्छेदो ह्यपूर्णता । एव पूर्ण एव हि स्वतन्त्रो भवति । स्वकीयेषु स्वयोग्यमानन्द पूरयतीति पूर्णानन्द इति च गमनिकान्तरम् ।

4 तथाच सूत्रम् – "भेदव्यपदेशाच्च" (१ १.१७.) इति ।

---

१ "पटुना वेदेन" क
२ "निर्हेतुकेन केवलम्" ख ग
३ "–नन्दपूर्णत्वाच्च" ग
४ "–त्व युक्तम्" ग
५ "च सुमिता –" क ख घ
६ "परिच्छिन्नाया" क. ख. घ.
७ "–पदोदित" ख ग
८ "पूर्णानन्दत्व –" क

नच तत्तदनुमानैरानन्दस्य विष्णोरूनत्व केनापि स्वापादम् । यथाकामतया तेषामाभासत्वात्[1] । किन्तु यथाश्रुतिसिद्धानेकविशेषाणामनपायात् पूर्णत्वमेव निर्णीत सुज्ञेयम्[1] ।

[2]स्वयोग्यतानुसारेण भक्तिज्ञानादिसाधनैं पूर्णं जीव स्वसमीप आदाय आ समन्तात नन्दयति भगवानिति च पूर्णानन्दो भाष्यते । स हि सहभोग मुक्ताय करोति । [3]सोऽयमवयविनि स्वस्मिन्नवयवेषु च स्वकीयेषु प्रत्येक ज्ञानादिगुणं पूर्ण एवाऽनन्दनामको विष्णु । स्वगतभेदराहित्यात् । एवञ्चैकस्यैवेश्वरस्या वयवावयविभाव सम्भवति, श्रुत्युपदिष्टत्वादित्यर्थ ।

एव तावत् सकलकविकुलतिलको भगवानानन्दतीर्थार्याचार्य[2]वर्य पूर्णानन्द-पदेनैवाऽनन्दमयाधिकरणपठितसूत्रा[3]र्थमखिलमपि सग्रहेण व्याचख्यौ । एवमेवोत्तरत्रापीति[4] ज्ञातव्यम् । तत्तदधिकरणार्थाना सग्रहस्यैवेह चिकीर्षि-तत्वात्[5] । कुत ? [4]स्वयमेवामुना सात्पर्यविस्तर भाष्यस्य कृतत्वात् ।

---

1 यत पूर्णानन्द इत्येवाऽगमोदित, अत नानुमानमपेक्ष्यते तत्त्ववादे । तथाच सूत्रम्—"कामाच्च नानुमानापेक्षा" (१।१।८) इति ।

2 पूर्णं जीवमानन्दयतीति व्युत्पत्त्या 'अस्मिन्नस्य च तद्योग शास्ति' (१।१।९) इति सूत्रमपि भाष्यारूढ दर्शयति—स्वयोग्यतेत्यादि ।

3 ननु पुच्छताभिधानादब्रह्मत्वमिति पूर्वपक्षयुक्ते का गति ? आह—साऽय-मिति । योऽय "आनन्दो ब्रह्म' इति श्रुतिगदित आनन्दनामा भगवान् स सर्वरूपेष्वपि पूर्ण एव । नहि तस्य वस्तुतोऽयवावयविभाव इति भाव ।

4 "ग्रन्थोऽयमपि बहुर्यो भाष्य चात्यर्थविस्तरम् । बहुज्ञा एव जानन्ति विशेषेणार्थमेतयो ' इत्यनुभाष्यपदानि मनसि निधायाऽह—स्वयमवेत्यादि।

---

१ "त्वात् यथाश्रुति—" क ख ग
२ "—तीर्थचार्य—" क
३ "—करणपरिपठितानेकसूत्रा—" ख
४ "—त्रापि ज्ञातव्यम्" ब
५ 'विवक्षितत्वात्" क

करिष्यमाणत्वाच्च सबह्वर्थमनुभाष्यस्यापि । नहि बहुविशेषगर्भचूळार्मणि सर्वज्ञभास्करमन्तरेणैतादृ[1]शभाष्यानुभाष्यविरचने चतुरतरचेताश्चतुर्दशभुवनेष्वस्ति । किम्पुनरेकेनैव वाक्येन पदेनाक्षरेण वा तत्तदधिकरणार्थसग्रहभाषण कुशलमतिर्नास्तीति[2] यदभिप्रेतामितार्थस्याशाशमपि लेशत एव वय ववतु सम्प्रति यथामति यतामहे । नचास्माक तत्प्रतिपादनपाटवमपटुधियाम् । [1]यद्यप्यस्मदाचार्यादयो [2] मध्वसूक्ति[3]सन्दर्शितार्थां[4]स्तत्प्रसादैकबलमवलम्ब्य कथञ्चित् प्रायश. प्रकाशयितु शक्नुवन्ति[5] । तथाऽपि न खलु वय खद्योतसमद्योतत्वादेतद्द्योतितानपि तानशाशेन च प्रकाशयितु शक्नुम । किं तर्हि ? मनोवाग्भिस्तद्भाव्यभावावर्तनलौल्यादेवायमस्मत्सग्राहविजृम्भ । तस्मादिहास्मास्तन्मन्तृन्[2] प्रणन्तृन्[6] महान्त. क्षन्तुमर्हन्ति ॥ ० ॥ ६ ॥ ० ॥

"अदृश्येऽनात्म्ये[3]—" (तैत्तिरीय० २७) इत्यानन्दमयस्यो[7]क्तमदृश्यत्व तु—"अन्त. प्रविष्ट कर्तारम्[8]—न विजानन्ति[4]—" (तै० आ० ३.११.२

---

1 भाष्य चेत्यनुभाष्ये सग्रहभाष्यमपि परिगृह्यते । तदेतदाह—किं पुनरिति । क्वचित् "अस्मदाचार्याग्नय मध्वसूर्यसन्दर्शितान्" इत्यादि पेठु । तत्र मध्व सूर्य इव । स्वाचार्या अग्नय इव स्वय तु खद्योत इवेत्यर्थप्रकाशनसामर्थ्ये तरतमभावो रूपकसार ।

2 तन्मन्तारो ये पूर्वाचार्यास्तान् प्रणन्तृनस्मान् ।

3 "अदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभय प्रतिष्टा विन्दते । अथ सोऽभय गतो भवति" इति भृगूपनिषत् ।

4 "अन्त. प्रविष्ट कर्तारमेतमन्तश्चन्द्रमसि मनसा चरन्तम् । सहैव सन्त न विजानन्ति दवा" इत्यानुपूर्वी ।

---

१ "—मन्तरेण तादृश—" ख
२ "—चार्याग्नयो—" ख घ "—चार्याश्रयात्" ग
३ 'मध्वसूर्यं—" ख घ ४ "—सन्दर्शितास्तत्प्रसा—" क
५ "शक्नुम ।" ग ६ "—हास्मान् मन्तृमहान्त" ङ
७ "इत्युक्तमदृश्यत्वम्" ख ८ "कर्तारमित्यन्तस्थस्य" ङ

इत्यन्तस्थस्य कस्यचिदुच्यते । सोऽन्तस्य इह विचार्यते । "इन्द्रो राजा–[1]" (तै० आ० ३.११.६.) [1]इत्यादिवचनाश्च विष्णुरिति पूर्वः पक्षः । अत्र स्वपक्ष द्योतयति–"अन्तस्तद्धर्मोपदेशात्" (१.१.२०) इत्यधिकरणम् । "अन्तरः" इति ।

अस्मिन् ग्रन्थे "इत्यधिकरणम्", "इति सूत्रम्" इति वाऽस्मद्वाक्यस्य व्याख्याति भगवानिति क्रियाभिसम्बन्धो बोद्धव्य । व्याख्यायते भगवतेति वा ।

अन्त स्थित्वा रमत इत्यन्तर. । तथाऽनु[2]व्याख्यातत्वात्[2] । चन्द्रेन्द्रादिषु स्वेच्छया वर्तमानः सर्वकर्ता विष्णुरेव । समुद्रान्तरत्वादित[3]द्धर्मव्यपदेशात्[3] । इन्द्रादेर्व्यधिकरणत्वेन भेदव्यपदेशोऽप्यर्थत सुगृहीत.[4] । व्यधिकरणत्वं हि भिन्नत्वे प्रमाणम् । अन्यशब्दपर्यायश्चायमन्तरशब्द प्रसिद्ध ।

यद्यप्येव विषमश्रुतावुपक्रमा दिभि सिद्धान्तः साधितो भवत्यधिकरणेषु । तत्र पुनर्वितर्कपाटनाय तत्तल्लिङ्गवैलोम्यप्रकटनेन [४]प्रतिपक्षोऽपि प्रतिक्षिप्त एव

---

1 "इन्द्रो राजा जगतो य ईशे सप्तहोता सप्तधा विवृत्त", "सप्त युञ्जन्ति रथमेकचक्रमेकोऽश्वो वहति सप्तनामा" इत्यादिवचनात् ।
2 "अन्त स्थित्वा रमणवृदन्तर समुदाहृत" इति ।
3 "अन्त समुद्रे मनसा चरन्तम्" इत्यादि । तेन चन्द्रादिष्वन्तर विष्णुरेव । यत स एव समुद्रान्तर श्रूयत इति साध्य च साधन चैकेनैव पदेनाऽह भगवान् भाष्यकार । एवमुत्तरसूत्रेऽपि ।
4 इन्द्राद्यन्तरत्वेन अन्तर्यामित्वेन श्रूयमाणत्वादिन्द्रादिभ्योऽन्तरः भिन्न इति द्वितीयसूत्रमपि व्याख्यातम् । तथाहि सूत्रम्–"भेदव्यपदेशाच्चान्य" (१ १ २१) इति ।

---

१ "इति वचना–" ग
२ "तथा व्याख्यातत्वात्" ग
३ "समुद्रेऽन्तर इत्यादि" ग
४ "स्वविपक्षोऽपि" ख

स्यात् । तयापि पुनर्मन्दातिशङ्काशङ्कोः शकलशः शातनेन स्वमतात्यन्तदाढर्यार्थं यथासाधितसिद्धान्तसारानुसाराणि [1] शतशः श्रुत्यन्तराण्युपन्यसनीयानीति युक्तमम् । तस्मात् तत्संग्रहोऽपि "आगमोदितः" इत्युक्त्यैव [2] सुकृतो लक्ष्यते । सूपपत्तिसाधितः स्वसिद्धान्तः सर्वोऽपि तैस्तैर्निर्णीतश्रुतिस्मृतिरूपैरप्यागमैरुदित इति [3] चार्थसम्भवात् । नचैतेऽस्माभिः सनियममु [4] पन्यस्यन्ते । मन्दधीत्वात्, ग्रन्थबाहुल्यभयाच्च । एवञ्च "अहं तत् तेजः—" (चतुर्वेदशिखा०), "सोऽभिध्याय—" (व्यासस्मृ०) इत्यादिभिर्विवक्षितधर्मद्वारेणान्तस्थो विष्णुरिति निर्णीयते [1] ॥ ० ॥ ७ ॥ ० ॥

अथ "आकाश इति होवाच" (छन्दोग० १.९.) इति श्रूयमाण आकाशः किं भूताख्य उत विष्ण्वाख्य इति विचार्यते । लौकिकप्रसिद्धेर्भूताख्य इति प्राप्तम् । अत आह—" आकाशस्तल्लिङ्गात्" (१.१.२२.) इति सूत्रम् । "खवत्" इति ।

---

1 तथाहि भाष्यम्—

"'सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्जादौ तासु वीर्यमवासृजत् ।
तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् ।
यस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ।
आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः' इति व्यासस्मृतेः ।
'अहं तत् तेजो रश्मीन्नारायण पुरुष जातमग्रतः ।
पुरुषात् प्रकृतिर्जगदण्डं (त्रिपुरुष मायाबीजं जायते)' इति च चतुर्वेदशिखायाम्" इति ।

---

१ "सिद्धान्तसाराणि—" क. ख. ग.
२ "इति सुकृतो—" क. ख. ग.
३ "इत्यर्थसम्भवात्" क.
४ "नचैते सनियममस्माभिरुप—" क. ग.

[1] इह तावदत आहेतिवाक्यस्य तदुपरि परिगृहीत सूत्रमाहेति सम्बन्धो न ग्राह्य । तद्व्याख्यानस्य तु [1]मनसाऽपि [2]कर्तुमसामर्थ्यात् । अनारब्धत्वाच्च । ब्रह्मसूत्रार्थसारान्वेषणेन तद्व्याख्यानमुख्या[3]धिकारस्तु मुख्यप्राणस्यैवेति हि किञ्चिदवोचाम । कथ तर्हि [4]तत्सम्बन्ध इति चेत् सूत्रादप्युपरिष्टादनूद्यमान तद्भाष्य यत् तदाहेत्येवास्माभि सोऽभिप्रेयते । एतद्व्याख्यानस्यैव[5] शक्त्यभावेऽपि कारणान्तरेण प्रारब्धत्वात् । इहापि हि [6]मुख्याधिकारिणो देवादय एव भगवन्त श्रूयन्ते । अस्माक तु तदनुगृहीत एव कश्चिदधिकारलेश आशास्यते । नतु स्वयमेवाधिकार । सूत्रग्रहण तु व्याचिख्यासयाऽनूद्यमानभाष्यस्य तदीयत्वज्ञापनायैव क्रियते । अत पूर्वपक्षपरिहारार्थमिद सूत्र व्याख्यानिद भाष्यमाहेति गृह्यते[7] । अनेकसूत्रग्रहणापेक्षयाऽधिकरणमाहे[8]त्युक्तेऽप्ययमेव न्याय ॥ ० ॥

---

1 अत आह खवदिति । आकाशस्तल्लिङ्गादिति सूत्रमिति स्ववाक्यस्य योजनाविशेष मनसि निधाय, पौन पुन्येन ग्रन्थगौरव श्रोतृश्रमुपीमधिरोहयितुमाह – इह तावदित्यादि । विस्पष्ट चैतत् तत्त्वदीपिकायामपि । तथाहि तद्वचनम् – "नतु वय कदाचिदपि सूत्रपद व्याख्यातुमिच्छाम, शक्नुमो वा' इति चतुर्थस्य द्वितीये । पुनश्चान्तर्भेदाधिकरणेऽप्युक्तम् – "अस्माक तु भाष्यार्थमात्रान्वेषणपरिखिन्नानामनवरत भाष्यानुवादेऽप्यध्यासितालस्यानामत आहेत्यभिसूत्र भाष्यानुकरणेऽपि प्रतिवाक्यमन्य एवाभिप्रायो निश्चेतव्य । अत पूर्वपक्षप्राप्ते परिहारार्थं सूत्रमुदाहृत्य तस्य भाष्यमाह भगवानाचार्य इति । सूत्रग्रहण पुनरत्र तद्भाष्यव्याचिख्यासितस्यागृहीतप्रतीकस्य सन्निधापकमिति भवति निरवद्यम्' इति ।

---

१ ' –नस्य मनसाऽपि" क
२ "कर्तुमशक्यत्वात्" क ग
३ "तद्व्याख्यानाधिकारस्तु" क
४ "तर्हि सम्बन्ध – ग
५ " –स्यैवाशक्यभावेऽपि" क
६ "इहापि मुख्या –" ख ग
७ "गृह्येत" ख
८ " –करणमित्यु –" घ

अत्रानूदितभाष्यस्यायं भावः—"यदेष आकाशः—" (तैत्ति० २.७.) इति प्रागुक्ताकाशो यथा विष्ण्वाख्यः प्रकरणबलात् सिद्धः, तद्वदयमपि विष्ण्वाख्य एव बोद्धव्यः[1] । परोवरीयस्त्वादितल्लिङ्गात् । नतु भूताख्यः । आ समन्तात् कं कामान् वा अश्नाति काशते वेत्याकाशो विष्णुरिति यौगिकरूढे रूढ्यन्तराद् बलिष्ठत्वात् । श्रुत्यन्तरानुकूलत्वाच्च नितराम् ।

अत्रायमपि न्यायः सुग्रहः—अनुमानस्यावयवा अपि प्रतिज्ञादयः पृथक् च प्रमाणत्वमर्हन्ति । प्रयोगप्रकारविशेषेण साधकत्वसम्भवात् । ततः किं स्यादिति चेत्, अनुमानस्यावयवेयत्ता[1]कल्पनमितरवादिकृतं व्ययं स्यात् । व्याप्ति-सद्भावनियमस्यैव प्रयोजकत्वादिति ॥ ० ॥ ८ ॥ ० ॥

"यद् देवान् प्राणयः—", "तद् वै त्वं प्राणो अभवः"[2] (तै० आ० ३.१४.) इति प्राणो नाम वायुर्हीत्यत आह—"अत एव प्राणः" (१.१.२३.) इति सूत्रम् । "प्रणेता" इति । देवप्रणेता प्राणश्च विष्णुरेव । श्रीलक्ष्मीपतित्वादितल्लिङ्गा-देव[3] ॥ ० ॥ ९ ॥ ० ॥

"ज्योतिर्हृदय आहितम्" (ऋ० ६.९.६.) इति श्रूयमाणं ज्योतिस्त्वग्निरेवेत्यत आह—"ज्योतिश्चरणाभिधानात्" (१.१.२४.), "छन्दोऽभिधानान्नेति चेन्न

---

1 अयायमपि भाष्यस्य भावः—यथा ख ब्रह्मेत्याकाशे प्रसिद्धमपि खमिति पदं ब्रह्मणि प्रयुक्तं तद्वदाकाशपदमपि । अर्थसाम्यात् । तथाहि खमिति सुखम् । आ समन्तात् कं सुखमश्नातीति च स एवार्थः । एतेन सूत्रे मुक्तः उक्तमुपलक्षणम् । तत्समानजातीयान्यन्यान्यपि पदान्यनेनैव पथा यथा-योग योजनीयानीति सूचितम् ।

2 "तद् वै त्व प्राणो अभवो महान् भोग प्रजापतेः । भुज करिष्यमाणो यद् देवान् प्राणयो नव" इत्यानुपूर्वी ।

3 "श्रीश्च ते लक्ष्मीश्च पत्न्यौ" (शुक्लयजु० ३१. २२.) इति श्रीलक्ष्मीपरिणेता भगवानेव "देवान् प्राणय." इत्युक्तदेवप्रणेताऽपीति स एव प्राणः ।

---

१ "—वयवनियमकल्पन—" ख.

तथा चेतोऽर्पणनिगदात् तथा हि दर्शनम्" (१.१.२५.) इत्यन्तभेदाधिकरणम्[1]। "ज्योति." इति। विष्णुरेव ज्योति। कर्णादीना विचरणाभिधानात्। "ज्योति-र्दीप्यते"[2] (छन्दोग० ३.१३.७) इत्यत्र ज्योतिषो गाय[1]त्युपक्रमाच्चेद विष्णुरछन्द एवेति चेत्, न। तच्च ज्योतिर्विष्णुरेवाग्निगायत्र्यादित[2]स्तच्छन्दैरुपक्रम्योच्यते, नान्यथा। युक्त्यादिभिस्तथा दर्शनात्। [3]एव [3]त्वभ्युपगम एव च

---

1 तथाहि तत्त्वदीपिका—"अस्मिन्नधिकरणे ज्योतिर्विचारोऽवान्तरोऽव-गन्तव्य। एक चेदमधिकरणम्। उत्तरानुबद्धत्वात् प्रथमविचारस्य। एतन्नान्तरीयत्वात् तस्य। अत एव चानुवर्तयति प्रथमविचारमुत्तरत्राग्नि-गायत्र्यादिभाष्ये" इति। "अधिभूताध्यात्माधिवेदगतानाम्" इति न्याय-विवरणमपि अस्यैकाधिकरणता पोषयति। अधिभूतमित्याकाश। अध्यात्म-मिति प्राण। अधिवेदमिति गायत्रीति ज्योतिर्विचारस्य गायत्र्युपसर्जन-त्वादवान्तरत्व स्फुटमेव। "नित्यत्वादेव शब्दस्य" इत्यनुव्याख्यानमपि गायत्रीपदमेव कटाक्षयति। तथाहि सन्यायरत्नावली—"द्योतकरणत्व-लिङ्गेन गायत्री ज्योति शब्दाभिधेया। नच तच्छब्देन विष्णुरभिधीयते। नित्यत्वेनानन्याधीनस्वभावत्वात् तस्या" इति। "शब्दस्य गायत्र्यादि-शब्दस्य" इति च नयचन्द्रिका। ज्योति शब्दस्यापि मुख्त समन्वयलोभात् पक्षान्तरमाश्रित्य तत्त्वप्रकाशिकादिप्रवृत्तिरिति वक्तव्यम्। अधिकरण-रचनाया पादादिवन्नियत्यभावात्।

2 "अथ यदत परो दिवो ज्योतिर्दीप्यते विश्वत पृष्ठेषु सर्वत पृष्ठेष्वनुत्तमे-षूत्तमेषु लोकेष्विद वाव तद् यदिदमस्मिन्नन्त पुरुषे ज्योति" इति च्छन्दो-गाना श्रुति। "गायत्री वा इद सर्वं भूत यदिद किञ्च" इति तत्प्रकरण-स्थाऽदिम वाक्यम्।

3 समन्वयादिति पूर्वभाष्येणैव गदितप्राय "भूतादिपादव्यपदेशोपपत्तेश्चैवम्" (१ १ २६) "उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात्" (१ १ २७.) इति सूत्रद्वयमेतदधिकरणगमित्याह—एव त्वित्यादि।

---

१ "गायतीत्युपक्रमात्" ख

२ "त्यादिशब्दवाच्यो विष्णुस्तच्छ—" घ

३ "एव चाभ्युप—" क ग

भूतादिचतुष्पादत्वव्यपदेश उपपद्यते । उपदेशभेदस्त्वपेक्षाभेदादुपपद्यते घस्त्वेकत्वेऽपि ॥०॥१०१।०॥

अतीतप्राणाधिकरणे प्रणेतृपदेन प्राणो विष्णुरित्युक्तम् । अत्रापि स एव स इति तेनैव सुवचम् । शब्दादिसाम्यात् । तस्मादत्र न पृथग् व्याचख्यौ । अयमिह योजनाविशेष. – "प्राणस्तथाऽनुगमात्" (१.१.२८) इत्यधिकरणम् । चक्षुरादिप्रणेता च [1] प्राणो विष्णुरेव । तच्छब्दादेस्तथाऽनुगमात् । अपिच "प्राणस्य प्राण." (तलवकार० १ २.) इति वचनान्मुख्यप्राणप्रणेता च [2] स एव । नच तस्यापि प्राणोऽनुक्तोऽप्यत्याशङ्क्येत [3] । "अप्राणो हि –" (आयर्वण० २.१.२.) इति प्रतिषिद्धत्वात् । [1] यद्यपि देवाः शिष्यादिष्वेनं प्रणयन्तीति तदुक्तिः । तथाऽपि प्रथमतः स्वयमेवायं स्वात्मानं वायावुपदेशेन प्रणयति वायुर्देवेष्विति तेषामस्वातन्त्र्यादविरोधः । नच तेषा तत्प्रणयनं नाम नियमनम् । उपदेशमात्रत्वात् । तस्मात् "प्राणो वा अहम् [4] –" (ऐतरेय०

---

[1] नन्वय देवै शिष्यादिषु प्रणीत । न प्रणेता । नैवम् । प्रणीतश्चाय भवति । प्रणेता च भवति । यत स्वयमात्मान वायौ प्रणयति । तेन न पर चक्षुरादे । प्राणस्यापि प्रणेता । इन्द्रप्रणेता विष्णुरेवेन्द्रे स्थित्वा "प्राणो वा अहमस्म्यूपे । प्राणस्त्व प्राण सर्वाणि भूतानि" इत्याद्याह । यत म एव सर्वभूतप्रणेता च । यतश्च अन्त स्थित्वा प्रणेतरि नियन्तरि, शास्तरीति यावत्, शब्दाना मुख्या प्रवृत्तिस्तेन सर्वान्तर सर्वप्रणेता नारायण एव सर्वपदाभिधेय इत्यधिकरणसार । एतेन "न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन्" (१.१ २९), "शास्त्रदृष्ट्या तूपदेशो वामदेववत्" (१ १ ३०) इति सूत्रे अपि सगृहीते । "जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात्" (१ १ ३१) इति चरममपि सूत्रमनेन वर्णितागयम् । यतोऽन्त प्रणेतृतयोपासनस्य शास्त्रेषु विहितत्वादुपासाभेदेनैवोपपत्तौ न तावता जीवमुख्यप्राणौ प्राणाविति ।

---

१ "–प्रणेता प्राणो–" ब
२ "–प्रणेताऽपि म एव" ब
३ "–क्तोऽप्यस्तीत्याशङ्क्येत" ग
४ "अहमस्मि इत्या–" ख

२ १.२) इत्यादाविन्द्राद्यन्तर्यामी विष्णुरेव साक्षात् प्रणयनस्वातन्त्र्यात् प्राण [1]इत्युपदिश्यते । नतु मुख्यप्राणो नेन्द्रादिश्चेति सिद्धम् ॥ ० ॥ ११ ॥ ० ॥

पादोक्तमर्थं निगमयति – "इत्याद्यैः प्रसिद्धैरन्यवस्तुषु । उच्यते विष्णुरेवैकः सर्वैः सर्वगुणत्वत." इति । इत्युक्ता ज्योतिरन्ता आद्या येषामनुक्त-शब्दाना त इत्याद्या , तैः । [1]स्वात्मनोऽन्यवस्तुषु प्रकृत्यादिजडाजडेषु वाचकत्वेन लोकत प्रसिद्धैरपि एको विष्णुरेव मुख्यत उच्यते । वैदिकप्रसिद्धै । तथाऽपि "देवाना नामधा[2] –" (ऋ०स० १० ८२ ३) इत्येव श्रवणाद् देवादिषु प्रसिद्धै सूर्यसोमवरुणादिशब्दैरेवोच्यते, नहि घटपटादिशब्दैरिति न मन्तव्यम् । "नामानि सर्वाणि यमाविशन्ति[3] –" (भाल्लवेय०) इत्यादेरविशेषेण सर्ववस्तुषु [2]प्रसिद्धै सर्वैरपि शब्दैरुच्यत इति वक्तु "सर्वै" इति विशेषणम् । नचैतदौपचारिकम् । ततच्छब्दप्रवृत्तिनिमित्ताना गुणाना सर्वेषामपि विष्णौ विद्यमानत्वात् । तदाह – "सर्वगुणत्वत" इति । अतो मुख्यत एव सर्वशब्द-मुख्यार्थत्व विष्णोरित्यर्थ ॥ ० ॥ ० ॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचितस्य
श्रीब्रह्मसूत्रसग्रहभाष्यस्य टीकाया
शैविक्रमार्यदासकृतावानन्दमालाया
॥ प्रथमाध्यायस्य प्रथम पाद ॥

---

1 परमात्मन । "सु सुखम् । तदादत्त इति स्वात्मा परम ' इति तत्त्वदीपिका। "स्वात्मना चोत्तरयो" (२ ३ २१) इति चोपरि सूत्रम् । 'त वा एत मभिवदन्ति स्वात्मेति । एष ह्यानन्दमदत्ते ' इति च श्रुति ।

2 "यो न पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा। यो देवाना नामधा एक एव त स प्रश्न भुवना यन्त्यन्या" इति विश्वकर्मसूक्ते मन्त्र। शुक्लयजुर्वेदे च सप्तदशेऽध्याये ।

3 "नामानि सर्वाणि यमाविशन्ति त वै विष्णु परममुदाहरन्ति" इतीय भाल्लवेयश्रुतिरिति भाष्ये (१ १ १) स्थितम् ।

---

१ 'प्राण उपदिश्यते' क घ २ "सर्ववस्तुप्रसिद्धै" क ग.

॥ प्रथमाध्यायस्य द्वितीयः पादः ॥

ॐ॥ लिङ्गात्मकाना शब्दानामन्यवस्तुषु प्रसिद्धाना विष्णौ प्रवृत्ति यवत्प्रस्मिन् पादे ।

"—ब्रह्म ततमम्[1]—" (ऐत०आर० २.४.३.) इति विष्णुः सर्वगत. प्रागुक्तः। "—आदित्यो रस.[2]" (ऐत० आर० ३.२.३.) इत्यादावन्यः प्रतीयते । अत आह—"सर्वत्र प्रसिद्धोपदेशात्" (१.२.१.) इत्यधिकरणम् । "सर्वगः" इति । विष्णुरेवाऽत्रापि[1] सर्वग उच्यते । तत्प्रसिद्धशब्दोपदेशात्[3] ।

"स योऽय'—[4]" (ऐत० आर० ३.२.४.) इत्यादिना विवक्षितगुणानपि स

---

1 "स एतमेव पुरुष ब्रह्म ततममपश्यत्" इत्यादिश्रुत्या प्रथमपादान्त्याधिकरणे प्राणनामा विष्णुरेव सर्वगत प्रागुक्त । "ततम ततनमम् । लोपागमान इति सूत्रात्" इति तत्त्वदीपिका ।

3 "तस्यैतस्यामावादित्यो रम" इति प्रस्तुत आदित्य एव सर्वगत इति चोत्तरश्रुत्याऽवगम्यते—"स यश्चायमशरीर प्रज्ञात्मा यश्चासावादित्य एकमेतदिति विद्यात् । तस्मात् पुरुष पुरुष प्रत्यादित्यो भवति ।

सूयं आत्मा जगतस्तस्थुषश्च एत सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षते" इत्यादिवया । तेन स एवाऽदित्य प्राण । स एव च ब्रह्म । तस्यैव च सर्वागाऽजन्माद्यम्येति स एव विजिज्ञास्यो न विष्णुरिति ।

3 नैतद् युक्तम् । सर्व देशकालादिव गत इति पूर्णत्ववाची यो ब्रह्मशब्द स एवास्याऽदित्यस्य प्रगिद्धादित्यत्व निवारयति । विष्णोरेव हि ब्रह्मत्व मुख्यगित्यावेदितम् ।

4 "स योऽतोऽश्रुतोऽगतोऽमतोऽज्ञतोऽदृष्टोऽविज्ञातोऽनादिष्ट" इत्यानुपूर्वी । एतेन "विवक्षितगुणोपपत्तेश्च" (१२२) इति द्वितीयसूत्र विवृतम् ।

---

१ 'विष्णुरेव सर्वत्रापि" ग

एव हि सर्वान् गत ।[1] एव चक्षुर्मेयत्वादीनि लिङ्गान्यपि सर्वाणि प्राप्त ।[2] नचाय जीव इति वाच्यम् । एक एव जीव सर्वाणि शरीराणि गत इति यस्तु-मयुक्त । नापि ब्रह्मैवयात् स उच्यते । तथाऽपि तदयुक्त । नच तदैक्य सावयार्य इति निरूपणीयम् ।[3] कर्मकर्त्रादिभि सर्वकारकै सहवार्यमिह व्यपदेश गत इति भेदस्यैव सावयार्यत्वसिद्धे । नह्येकस्यैव वस्तुन कर्तृकर्मभाव औत्सर्गिक प्रसिद्ध । तथैव सम्प्रदानत्व[4] च ।

अपिच, कोऽयमभेदो नाम? किं जीवस्य ब्रह्मभाव, उत ब्रह्मणस्तद्भाव इति वक्तव्यम् । न तावदाद्य उपपद्यते ।[1]'सर्वजीवाख्यभूतेषु' गत पर एव[2]'ब्रह्मेति वेदविद्वचनात् । नाप्यन्त्य ।[6] नहि सर्वभूतहृदयगतस्य तत्तन्नियन्तु. स्मर्यमाणस्य

---

1 'अनुपपत्तेस्तु न शारीर (१२३) इति सूत्र व्याख्याति—एवमिति । चक्षुर्मय श्रौत्रमयश्छन्दोमयो मनोमयो वाङ्मय आत्मा" (ऐत० आर० ३२३) इत्यादिनोक्तानि चक्षुर्मयत्वादीनि लिङ्गानि । "सर्वेदर्शन-सर्वश्रवणादिसामर्थ्याभिप्रायेण चक्षुर्मयादिशब्दाना परमात्मनि प्रवृत्ति' इति पद्मनाभतीर्थभट्टारका ।

2 अनुपपत्तेरिति सूत्रखण्डमपि भाष्यारूढ करोति नचायमिति । एतेन सर्वग इति हेतुगर्भमित्युक्त भवति । सर्वशरीरगो ह्यत्रोच्यते । जीवश्च न तथेति ।

3 एतेन "कर्मकर्तृव्यपदेशाच्च" (१२४) इति च सूत्र गदिताभिप्राय भवति । "स य एवमेतम् आत्मान परस्मै शसति दुग्धदोहा अस्य वेदा भवन्ति" (ऐत० आर० ३२३) इति श्रुति ।

4 तत्त्वदीपिकाया च— 'परस्मा इति सम्प्रदानव्यपदेशाच्च' इति ।

5 "एतमेव ब्रह्मेत्याचक्षते इति भाष्यपूरितशेष 'शब्दविशेषात' (१२५) इति सूत्र निराह—सर्वजीवेति ।

6 "स्मृतेश्च" (१२६) इति षष्ठ सूत्र व्याख्याति—नहीति । तथाहि स्मर्यते—'अहमात्मा गुडाकेश सर्वभूताशयस्थित" (गी० १०२०) इति । एतेनैव "अभ्युपगमाद्धृदय्वात् तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेव व्योमवच्च (१२७) इत्यपि सूत्र विवृतम् । सर्वभूतहृदयसुपिरत्वाल्प स्थानगत्वेनापि स एव सर्वगतो विष्णुरुपास्य इति । व्योमवदिति तु खवदिति पूर्वमेव निगदव्याख्यातम् ।

---

१ 'सर्वभूताख्यजीवेषु' ग २ "गत परमेव"क ख ग

तद्भाव सम्भवति । अनुभवविरोधात् । तस्मादज्ञानविजृम्भितमेव जीवब्रह्मैक्य-मतम् ।

[1] नन्वहो खलु युष्मदीश्वरो जीवशरीरेऽपि तिष्ठति, आहोस्विनेति वाच्यम् । आद्ये जीववदीश्वरस्यापि दुःखभोगप्राप्ति । अन्त्ये सर्वगतत्वप्रतिज्ञाहानिरिति सम एव पर्यनुयोग इति । तच्चाज्ञानवासनाविजृम्भितम् । नहीश्वरस्य स्वातन्त्र्यात् पारतन्त्र्यकृत दुःखित्व क्वचित् प्राप्यते । नरकवासिनोऽपि ह्रीश्वरस्य दुःखित्व श्रुतिभिर्निवारितम् । यस्य प्रसादभाजनेषु भूतेषु परतन्त्रेष्वपि यदिद-मवश्य निवार्यते तस्मिन्नेव कथ [1]तदिदमाशङ्क्येत? किमुत्यन्यायनिवारितत्वात् । तदेतदाह—सर्वसामर्थ्यं गत इति योजनया तद्भाष्येणैव । [2]तस्माद् विष्णुरेव सर्वदेशकालवस्तुषु स्थितत्वेन तत्तत्प्रतिपादकसर्ववाक्यगत' परमवाच्यार्थ इति निरवद्यम् ॥ ० ॥ १ ॥ ० ॥

"अत्ता चराचरग्रहणात्" (१.२ ९) इत्यधिकरणम् । "अत्ता" इति । "सर्वं वा अत्ति—[3]" (बृह० ३ २ ५) इति नादितिरत्री[2] निगद्यते । किन्तु? [4]चराचरा-[3]दनवचनाद्विष्णुरेवात्ता युक्त । नह्यदिते सर्वजगत्सहार श्रुत्यन्तरसम्मत ।

---

1 "सम्भोगप्राप्तिरिति चेन्न वैशेष्यात्' (१ २ ८) इत्यधिकरणान्तिमसूत्र विवृणोति—नन्वहो इत्यादिना ।

2 अधिकरणाङ्ग फलोपसहारमपि "सर्वं' इति भाष्येणैवावादीद् भाष्यकार इत्याह—तस्मादित्यादि ।

3 'स यद्यदेवासृजत तत्तदत्तुमध्रियत । सर्वं वा अत्तीति तददितेरदितित्वम इति हि सर्वस्य चराचरस्यादनमुच्यते ।

4 निरुपपद पदमत्तेति सर्वात्तारमेवाहेत्याह—चराचरेत्यादि ।

---

१ 'तस्मिन्नेव तदिद कथमा—" क च २ "नादितिरत्र' ग

३ 'चराचरवच—" क ख ग

[1] अपिच, "विसर्गगत्यत्त्यभिजल्पशिल्पा" (भाग० ५.११.१०.) इत्यादौ पुत्रोत्पादन[1]रूपस्य वीर्यविसर्गस्यापि भोगमात्रत्वादत्तिशब्दवाच्यत्व दृष्टम् । अतोऽत्तृशब्देनैव सवत्सरादिसृष्टा च सुवच । एव चास्य नारायणप्रकरणत्व चाऽवेदित स्यात् ॥ ० ॥ २ ॥ ० ॥

"गुहा प्रविष्टावात्मानौ हि तद्दर्शनात्" (१ २ ११) [2]इत्यधिकरणमप्यनेनैव व्याख्याति । "त्रेधा विहित वा इदमन्नम् । अशन पान खाद इति" ( ) इति श्रुतेरशनपानयोरुभयोरप्यन्नशब्दवाच्यत्वादशितृपानोऽचात्तृशब्दवाच्यत्व सिद्धयति । एवञ्चास्मिन्नधिकरणे सोऽत्तृशब्द पातार यूते । हृदयगुहाया निहितावुत पिबन्तावात्मान्तरात्मनामानौ विष्णो· स्वरूपाशावेव; नतु जीव-

---

1 "प्रकरणाच्च' (१ २ १०) इति सूत्रस्यापीदमेव भाष्यम् – अत्तेति । तदेतदाह – अपिचेत्यादि । पायुपादोपस्थमुखहस्ताना विसर्गगत्यत्त्यभि जल्पशिल्पा व्यापारा इति हि भागवते ब्राह्मणरहूगणसवादे । "अत्तिरुपस्थ-विषय" इति भागवततात्पर्यम् । यत्तु "अतिम्पस्थविषय" इति तात्पर्य विजयध्वजीये च पठ्यते म लिपिकृत्प्रमाद एव। अत एव तत्त्वदीपिकाया-म्यानन्दमयनये – "नहि भक्ष्यत्वमेवाद्यत्वम् । विसर्गगत्यत्त्यभिजल्पशिल्पा इति हि भागवते" इत्युक्तम् । एवञ्चात्ता स्रष्टा सवत्सरादीनामिति फलितम् । स हि नारायणस्य धर्म । स हि सवत्सरनामान ब्रह्माणम-पश्चाद्वै ससर्ज । तच्च स्रष्टृत्वमन्न प्रकरणे श्रुतमिति तदपि तस्य नारायणत्व दृढयति । तथाहि श्रूयते बृहदारण्यके (३ २ १-५) – "नैवेह किञ्चनाऽग्र आसीत् । मृत्युनैवेदमावृतमासीत् । तस्यार्चत आपोऽजायन्त ।

तद्यदर्चा शर आसीत् सा पृथिव्यभवत् सवत्सरोऽभवत् वागभवत् म तया तेनाऽत्मनेद सर्वमसृजत" इत्यादि ।

---

१ "पुत्रोत्पादरूपस्य' क

२ "इत्यधिकरणम् ।" ख

परौ । तयोर्विष्णुत्वदर्शनात् । [1] एवञ्चैको विष्णुरेव द्विरूपः पातेत्यर्थः । सोमस्य पाता पशोरत्तेति यज्ञभुक्त्वाभिप्रायेण यजमानसेतुत्वं चात्र विवक्षितमिति "यः सेतुरीजानानाम् –" (कठ० १.३.२.) इति विशेषणमपि भाषितमिति [2]भाव ॥ ० ॥ ३ ॥ ० ॥

"अन्तर उपपत्ते" (१.२.१३) इत्येतदधिकरणं चान्तस्थाधिकरणभाष्येणैव व्याख्यात भवति – "अन्तरः" इति[3]। तथाहि – [4]यः सूर्यसोमविद्युत्सु अक्षिणि च दृश्यमानः पुरुषः सोऽन्तरोऽपि विष्णुरेव । तल्लिङ्गशब्दोपपत्तेः । नच "–सोऽहम् –" (छन्दो० ४ ११-१३.१.) इत्यग्निवाक्यविरोधः । तदन्तर-

---

1 अत्रेति एववचनलब्धमर्थमाह – एवञ्चेत्यादि । एतेनैव भाष्यवचनेन "ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्द्धे" (कठ० १ ३ १) इति विषयवाक्यमप्यसूचि । ऋतात्ता हि विष्णुरेवेति युक्तिरप्यदर्शि । द्वित्वं चैकस्य मुख्यत इति दोषोऽपि पर्यहारि । "घर्मं समन्ता – (ऋ० १० ११४ १) इति मन्त्रेण समन्तो व्याप्त एव द्विरूप श्रूयत इत्यत्रापि सर्वगोऽत्ता विष्णुरेव द्विरूप इति सवादोऽप्यवादि । आत्मशब्दसमानार्थस्य पुनरत्तृशब्दस्यैव परिग्रहादात्मान्तरात्मनामनी ते रूपे इत्यप्यगाद्येव ।

2 तथाहि सूत्रम् – "विशेषणाच्च" (१ २ १२) इति । "य सेतुरीजानानामक्षर ब्रह्म यत्परमिति" इति तत्र पूरणभाष्यम् ।

3 एतदधिकरणोपसग्रहायैवान्तरित्येवानुवत्वा "अन्तरः" इति रेफमदन्तमाह भाष्यकार पूर्वमेव । नहि महान्त परावरज्ञा पूर्वं वृत्वोत्तर स्मरन्ति । किन्तूत्तर स्मरन्त एव पूर्वं वृवंन्ति ।

4 तथाहि श्रुतिश्छन्दोगानाम् – "य एष आदित्ये पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति" (४ ११ १) "य एष चन्द्रमसि पुरुषो दृश्यते सोऽहमस्मि म एवाहमस्मीति" (४ १२ १) "य एष विद्युति पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति" (४ १३ १) इति । अग्नीना गार्हपत्यान्वाहार्यपचना हवनीयानामिद क्रमाद् वचनमुपकोसल प्रति । अन्ते गुरुश्च सत्यकाम अगत्यादह – "य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाच" (४.१५ १.) इत्यादि ।

त्वात् । [1]चक्षुराख्यनिजस्थानस्यासङ्गत्व नाम विशेषमापादयतीत्यप्यन्तर[1] उच्यते । [2]वामभामनेतृत्व च देवादिप्रणेतृत्वेऽन्तर्भूतम् । सुखविशिष्टत्वमत्रापि[2] ह्यन्ता रमत इति रेफेणाभिप्रेयते[3] । श्रुतोपनिषत्कगति "जनार्दन यान्ति" इति प्रकट वक्ष्यते[4] । नच सूर्यादिनियमनायाग्निरलम्[5] । स्वयमेव नियम्यत्वात् ॥ ० ॥ ४ ॥ ० ॥

नन्वीश्वरोऽपि सर्वान्तरो नेद नियच्छति । रमणरहणप्रसङ्गादित्यत आह— "अन्तर्याम्यधिदेवादिषु तद्धर्मव्यपदेशात्" (१.२ १८) इत्यधिकरणम् । "नियन्ता च" इति । न [3]केवलमीश्वर सर्वस्यान्तर इत्येव मन्तव्य [4]। किन्त्वस्य

---

1 "विशेषेऽमरेऽन्तरम्' (अभि० रत्न० ५ ८२) इति हलायुधाभिधानात् विशेषापादकोऽन्तर इति मनसि निधाय "स्थानादिव्यपदेशाच्च" (१ २ १४) इत्यपि सूत्र भाष्यमारोहयति—चक्षुरित्यादि । तथाहि श्रूयते—"तद् यद्यप्यस्मिन् सर्पिर्वोदक वा सिञ्चति वर्त्मनो एव गच्छति" (छन्दो० ४ १५ १) इत्यादि ।

2 आत्मशक्तिस्तु प्रणेतेति पूर्वमेव व्याख्यातेत्याह—वामेत्यादि । "वाम सौन्दर्यम्, भाम तेज । सौन्दर्यतेज प्रधानत्वात् स्त्रीपुरुषा वामभाम शब्दिता' इति तत्त्वदीपिका । तदेतदाह—देवादिप्रणेतृत्वेऽन्तर्भूतमिति । तथाचेय श्रुति—"एष उ एव वामनि' (छन्दो० ४ १५ २) इति, "एष उ एव भामनि" (छन्दो० ४ १५ ३) इति च ।

3 'सुखविशिष्टाभिधानादेव च' (१ २ १५) इति हि सूत्रम् । "प्राणो ब्रह्म क ब्रह्म ख ब्रह्म" (छन्दो० ४ १० ५) इति श्रुति सुखविशिष्टतामह । तामत्र रेफेणाऽह । पूर्वं "प्रणेता खवत्" इति च स्फुटमाह ।

4 तथाहि सूत्रम्—"श्रुतोपनिषत्कगत्यभिधानाच्च' (१ २ १६) इति । अन्ते स्वसमीपे रमयति तारतम्यमालायामन्ते स्थितेन प्राणेन द्वारभूतेनेति कगतिरत्रापि सुवचा ।

5 एतेन "अनवस्थितेरसम्भवाच्च नेतर' (१ २ १७) इति सूत्र कटाक्षयति ।

---

१ "तीत्यन्तर—" क ख ग
२ "विशिष्टत्व विशिष्ट अत्रापि' घ
३ "नच केवल—" ग
४ "मन्तव्यम्' ग

नियन्ता च भवति । अन्तर्यामीति यावत् । कुतः? अधिदैवादिषु[1] प्रकरणेषु प्रतिपदार्थम् – "अन्तरो यमयति –" (बृह० ५.७.३-२३.) इति नियमन-धर्मस्यापि व्यक्त व्यपदेशात्[1] । नच सोऽन्तर्यामी न विष्णुरिति निरूपणीयम् । [2]अविदितत्वादिनद्धर्मव्यपदेशात् । नच तावता रतिविहतिस्तस्याऽपद्येत[2] । विचित्रसन्ततानन्तशक्तित्वात् । [3]नच स्मार्तं प्रधानं शारीरो वाऽन्तर्यामीति यक्तव्यम् । तदीयधर्मानुक्तेरन्यधर्मोक्तेश्च । तस्माद् विष्णुरेव सर्वस्य प्रकृत्यादे-रन्तर्यामी श्रुत एष्टव्यः ॥ ० ॥ ५ ॥ ० ॥

एव तावत् सर्वगतत्वाद्या भावधर्माः परस्य गुणाः साधिताः । अत एवास्य नाभाव-धर्मा गुणा युज्येरन्नित्यत आह – "अदृश्यत्वादिगुणको धर्मोक्तेः" (१.२.२१.) इत्यधिकरणम् । "दृश्यत्वाद्युज्झितः" इति । दृश्यत्वं नाम परिच्छिन्नत्वम् । आदिशब्दात् परतन्त्रत्वम् । ताभ्यामुज्झितः । प्राकृतेन्द्रियगोचरत्वं तद्वत्त्वं वा दृश्यत्वादि । अतस्तदुज्झित इति वाऽर्थः । एवञ्च तत्तद्दोषाणामभावाश्च[3] गुणा एवास्येत्यभिप्रायः ।

नचात्र तादृग्गुणकः प्रकृतिर्विरिञ्चादिर्वा भवतिति मन्तव्यम् । परविद्याविषय-त्वादिविष्णुधर्मोक्तेः । अत्र भगवतः प्राकृतेन्द्रियसम्बन्धस्य पारतन्त्र्यस्य च

---

1 "अन्तर" इत्यपि भाष्यमन्त्राप्यावर्तते । "य पृथिव्या निष्ठन् पृथिव्या अन्तर" (बृह० ५ ७ ३) "य सर्वेषु भूतेषु निष्ठन् सर्वेभ्यो भूतेभ्योऽन्तर" (बृह० ५ ७ १५) इत्यादिना सर्वान्तरो विष्णुरेव हि तत्रोच्यत इति ।

2 "दृश्यत्वाद्युज्झित" इत्यावृत्तस्यार्थमाह – अविदितत्वादीति ।

3 "नच स्मार्तमतद्धर्माभिलापात्" (१ २ १९.), "शारीरश्चोभयेऽपि हि भेदेनैनमधीयते" (१ २ २०.) इत्यवशिष्ट सूत्रद्वय विवृणोति – नच स्मार्तमित्यादि । प्रधानस्य शारीरस्य च नियन्तृत्वेन श्रवणात् "यो विज्ञाने निष्ठन्" (बृह० ५ ७.२२) इत्यादि न प्रधानजीवावभाभिधीयेते इत्यादि ।

---

१ "अधिदैवादिप्रकरणेषु" स. घ

२ "रतिविरह्मस्यापद्येत" क. ग. "तस्य सम्पद्येत" ख

३ "–भावश्च गुण एवा–" ग.

निषेधात् स्वत एव नित्यमुक्तत्वमवगम्यते । तच्चास्य [1]तादृक्सर्वज्ञत्वानुमापकम् । व्याप्यत्वात् । एवञ्चास्य सर्वज्ञत्वादिना जडादजडाच्च प्रकृतेर्विशेषणम्, जन्मादिमतो विरिञ्चाद् रुद्राच्च भेदव्यपदेशश्चार्थतो व्याख्यातौ स्याताम्[2] । अथवा, प्राकृतेन्द्रियसम्बन्ध परिच्छिन्नत्व च दृश्यत्वम् । आदिशब्दाद [1]सर्वज्ञत्वाद्या जन्माद्याश्च दोषा गृह्यन्ते । ताभ्यां तैश्चोज्झित इत्यदृश्यत्वादिगुणको विशेषणभेदव्यपदेशौ च मुख्त एव भाषिता भवेयु । उभयथा च विष्णुरेवादृश्यत्वापाणिपादत्वादिगुणक इत्यर्थ ।

नन्वत्तिनिपत्यादिक्रियाया कादाचित्कत्वादत्तृत्वादिवमपि तात्कालिकमेवेति नित्य नास्ति । अदृश्यत्व च केनचिद् दर्शनकाले विनश्यतीत्यत आह—"सदा" इति । क्रियादिधर्माणामपि शक्तिरूपेण नित्यत्वादत्तृत्वादिकमपि सदाकाल विद्यते । न केवल तात्कालिकम् । अदृश्यत्वशक्तेरप्यनपायात् । "ज्ञान नित्य क्रिया नित्या बल शक्ति परात्मन"[3] (पैङ्गिश्रु०) इत्यादिश्रुतेश्च[4] ॥ ० ॥ ६ ॥०॥

"वैश्वानर साधारणशब्दविशेषात्" (१ २ २४.) इत्यधिकरणव्याख्यानमुखेन पादार्थं निगमयति—"विश्वजीवान्तरत्वाद्यैर्लिङ्गं सर्वैर्युतः स हि" इति।

---

1 तादृगिति नित्य निरवधि च सवज्ञत्वम् । वस्तुतस्तु एतदपि सवग इति पूर्वभाष्येण सर्वं सर्वदा सवत्रावगच्छतीति निगदनिरूपितमेव ।

2 तथाच सूत्रम्— विशेषणभेदव्यपदेशाभ्या च नेतरौ (१ २ २२) इति ।

3 इय पैङ्गिश्रुतिरित्यनुव्याख्यान (१ २ ७) स्थितम् । नित्यानन्दोऽव्यय पूर्णो भगवान् विष्णुरच्युत इत्युत्तरार्द्धम् ।

4 'रूपोपन्यासाच्च' (१ २ २३) इति चरम सूत्रमपि दृश्यत्वाद्युज्झितश्च' इति चकारान्वयेन व्याख्यातमेष्टव्यम् । रूपवानपि दृश्यो न भवतीति । अस्य ग्रन्थस्य मननार्थत्वादेवमेव व्याख्यानौचित्यात् ।

---

१ "—शब्देनासव— क

[1]–अभिविमानमात्मानं वैश्वानरमुपास्ते–" (छन्दोग० ५.१८.१.) इत्यत्र वैश्वानराख्यः किं हुतवह उताहो हरिरिति सन्दिह्यते। "अयमग्निर्वैश्वानरः–[2]" (बृह० ७ ६-१.) इत्यादिश्रुतेः[1], पाचकत्वादिलिङ्गाच्चाग्निरिति पूर्वः पक्षः। नायं यस्मात्, विष्णुरेवेति स्वपक्षः। अत्र युक्तीर्वक्ष्यति विश्वजीवादिभाष्येण। विष्णुरेव हि विश्वजीवान्तरत्वाद्यैर्लिङ्गैर्युक्तः। विश्वजीवान्तरत्वं हि वैश्वानर-शब्दप्रवृत्तिहेतुः। [3]अभितो विगतमानत्वम्, आदानादिकर्तृत्वम्, पाचकत्वम्, हुतस्थानत्वम्, पूर्णत्वम्, पुरुषविधत्व चेत्यादीनि तत्प्रकरणपठितान्याद्यशब्द-परिगृहीतलिङ्गानि[4]। तैरपि सर्वैर्युक्तः।

---

1 "यस्त्वेतमेव प्रादेशमात्रमभिविमानमात्मान वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति" इत्यानुपूर्वी।

2 "अयमग्निर्वैश्वानरो योऽयमन्तः पुरुषे येनेदमन्न पच्यते यदिदमद्यते" इति वाजसनेयके। तत्र वैश्वानरस्याग्नित्वश्रुतिं, पच्यत इति पाचकत्व-लिङ्गं च तस्य हुतवहतामेवाऽवेदयत।

3 अभिविमानमित्यभितो विगतमानत्वम्, आत्मानमित्यादानादिकर्तृत्वम्, पच्यत इति पाचकत्वम्, "तद्यद् भक्ष्या प्रथममागच्छेत् तद्धोमीयम्" (छन्दो० ५ १९ १) "वैश्वानरे तद्धुत स्यात्" (छन्दो० ५ १४ ४) इत्यादि हुतस्थानत्वम्, "को न आत्मा किं ब्रह्म" (छन्दो० ५ ११ १.) इति प्रकरणोपक्रमे ब्रह्मशब्देन पूर्णत्वम्, "मूर्धैव सुतेजाश्चक्षुर्विश्वरूप" (छन्दो० ५ १८ २) इत्यादि पुरुषविधत्वम्।

4 एतेन "शब्दादिभ्योऽन्तःप्रतिष्ठानान्नेति चेन्न तथा दृष्ट्युपदेशादसम्भवात् पुरुषमपि चैनमधीयते" (१ २ २६.) इति सूत्र व्याख्यातम्। स विष्णुरेवैतैर्लिङ्गैर्युक्त इत्यवधारणात् "अत एव न देवता भूत च" (१ २ २७)

---

१ 'इति श्रुतेः" क ग

अथवा, विश्वजीवान्तरत्वयुतो वैश्वानरो विष्णुरेवेति विस्पष्टं प्रतिज्ञाय युक्त्यपेक्षायामाद्यशब्देनाऽदातृत्वादिसर्वलिङ्गंयुत इति ता वक्ति[1] । तस्मा दुभयथाऽपि विष्णुरेव वैश्वानरः । 'निगमनावस्थाया सर्वगतत्वात्तृत्वाद्यानि तद्वाक्योक्तानि । तत्तदधिकरणेषु मुखतोऽनुक्तानामपि सग्रहायंम् "सर्व" इत्युक्तम् । उक्तं च महोपनिषदि – "सर्वनामा सर्वकर्मा सर्वलिङ्गः सर्वगुणः

इत्यपि गतार्थम् । भाष्ये "स हि" इति स्मृतिप्रसिद्धि द्योतयितुम् । तेन "अह वैश्वानरो भूत्वा प्राणिना देहमाश्रित ' (गीता० १५ १४) इति स्मृति स्मारयति । तेन च "स्मर्यमाणमनुमान स्यादिति"(१ २.२५) इति च सूत्रमुपसगृह्णाति । "साक्षादप्यविरोधम् –"(१ २ २८) इत्यादि-पञ्चसूत्री तु समन्वयप्रकारप्रतिपादनपरा समन्वयादित्येव सगृहीता भवेदिति न पृथग् व्याचख्यौ । अथवा विश्वजीवान्तरत्वाद्यैरिति तदपि व्याचख्यौ । तथाहि विश्वान्तरत्वान्मुख्ययोगेन विश्वनामा भगवान् इति परमार्थ । तथाऽप्यमुख्यतया लोकव्यवहार इत्यविरोध । तदेतदाह – "साक्षादप्य। विरोध जैमिनि" (१ २ २८) इति । आदिपदेन "अभिव्यक्तेरित्याश्म-रथ्य" (१ २ २९), "अनुस्मृतेर्बादरि." (१ २ ३०), "सम्पत्तेरिति जैमिनि" (१ २ ३१), "आमनन्ति चैनमस्मिन्" (१ २ ३२) इति सूत्रचतुष्टयोक्ता युक्तय. सगृहीता इति सर्वमवदातम् । एवमनेके प्रकारा नियाममभिहारेण भाष्ये परिस्फुरन्ति । अर्थानामपरिच्छेदेन प्रथना-सम्भवादेवोपरम्यते । सुधियामनुक्तमपि सूहम्, दुर्धियामुक्तमपि बहुशो दुरूहमिति च ।

1 नन्वाद्यशब्देनाधिकरणयुक्तय एव चेद् विवक्ष्यन्ते हन्त कथ तर्हि तन्मुखेन पादार्थंनिगमनम्, न । निगमनावस्थायामन्यार्थंविवक्षणादित्याह – निगम-नेत्यादि ।

---

१ "इति वक्ति" ग.

सर्वकामः सर्वयज्ञः सर्वरूपः" इति । [1]तस्मादन्यत्र प्रसिद्धैर्नामात्मकैर्लिङ्गात्मकं च[1] शब्दैर्विष्णुरेव मुख्यत उच्यत इति सिद्धम् ॥ ० ॥ ७ ॥ ० ॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचितस्य
श्रीब्रह्मसूत्रसंग्रहभाष्यस्य टीकायां
नैबिन्नमार्यदामनृतावानन्दमालायां
प्रथमाध्यायस्य द्वितीयः पादः.

---

1 पादद्वयफलितमाह – तस्मादिति ।

---

१ "लिङ्गात्मकं. सर्वशब्दै –" ख.

॥ प्रथमाध्यायस्य तृतीयः पादः ॥

ॐ ॥ अतीतपादयोर्नामलिङ्गशब्दवाच्यत्वं विष्णोरयोगव्यवच्छेदेन साधितम् । तदेवान्ययोगव्यवच्छेदेनापि साध्यत्यस्मिन् पादे । उपपन्नश्चैवम्भावः । [1]शास्त्र-योनिसमन्वयसूत्राभ्या [1]तद्वत् प्रतिज्ञातत्वात् ।

"अथ परा–[2]" (आय० १.१.५.) इत्यादौ परविद्याविषयत्वेनोक्तस्य विष्णोः "यस्मिन् द्यौ.–" (आय० २.२.५.) इत्यादिके द्युम्वाद्यायतनवाक्ये प्राणा-धारत्व श्रुतम् । "प्राणाना ग्रन्थिः–" (महाना० ३५.) इत्यादौ रुद्रस्यापि तत्प्रतीतेः[2] सोऽपि द्युम्वाद्यायतन स्यादित्याशङ्क्याह–"द्युम्वाद्यायतनं स्वशब्दात्" (१.३.१.) इत्यधिकरणम् । "सर्वाश्रयः" इति । सर्वस्य द्युम्वादे-श्चराचरस्य जगत आयतन स्थानमाश्रयस्त्वेको नारायण एव श्रुतिस्मृति-

---

1 शास्त्रयोनिसूत्रेणायोग व्यवच्छिद्य समन्वययोगेन तस्यैवान्ययोगमपि व्यवच्छिन्द हि ।

2 "अथ परा यया तदक्षरमधिगम्यते" इति विष्णो परविद्याविषयत्वमुक्त पूर्वपादीयपष्ठाधिकरणे दृश्यत्वाद्युज्झित इति । तत्रैव चाऽथर्वण्यामुपनिषदि उपरिष्टाद् "यस्मिन् द्यौ पृथिवी चान्तरिक्षमोत मन सह प्राणैश्च सर्वैः" इति तस्यैव परविद्याविषयस्य प्राणाधारत्वमपि श्रूयते । तच्च विशेषण-मन्यगमिति नारायणोपनिषदेवाऽह–"प्राणाना ग्रन्थिरसि रुद्रो मा विशान्तक" इत्यादि । तेनोभयत्रापि सम्भवद् द्युम्वाद्यायतनत्व व्यवच्छेद-मेवान्ययोगस्य व्यवच्छिनत्तीति ।

---

१ "–सूत्राभ्या प्रति–" क

२ "रुद्रस्यापि प्रतीते ' व

प्रसिद्धः । [1] सर्वेषामात्मा स्वामी च मुख्याश्रय उक्तः । स एव हि मुक्तानामपि सर्वेषामुपसृप्य आश्रय.[2] ।

नचानुमितरद्र [3]सर्वाश्रय उच्यते । तच्छब्दाभावात्, अन्यशब्दभावाच्च । अत एव न जीवो वायुश्च द्युम्वाद्याश्रयः । अनेशजीवयोराश्रयाश्रयिभावलक्षणः केवलभेदश्च सूचित.[4] । तस्माद् ब्रह्मरुद्रादिजगतो विष्णुरेवाश्रय इति भावः ॥ ० ॥ १ ॥ ० ॥

"भूमा सम्प्रसादादध्युपदेशात्" (१.३ ८.) इत्यधिकरणम् । "पूर्णगुणः" इति । पूर्णा. सद्गुणा अस्येति पूर्णगुणो भूमा भूयानिति[1] भाव· । अथवा,

---

1 "तमेवैव जानथ आत्मानम्" (आथ० २ २ ५) इत्यात्मशब्दोऽपि हेतूकृत सर्वाश्रय इति कथितार्थं इत्याह—सर्वेषामिति । एतेन स्वशब्दादिति योगभाग कृतार्थं ।

2 तथाहि सूत्रम्—"मुक्तोपसृप्यव्यपदेशात्" (१ ३ २) इति । "अमृतस्यैष सेतु" (आथ० २ २ ५) इति तद्व्यपदेश ।

3 सर्वाश्रय इत्यात्मशब्द हेतूकुर्वताऽतच्छब्दत्वमपि रुद्रादिषु कथितमेवेति मन्वान आह—नचेत्यादि । तथाहि सूत्रे—"नाऽनुमानमतच्छब्दात्" (१.३ ३), "प्राणभृच्च" (१ ३ ४) इति ।

4 "भेदव्यपदेशात्" (१ ३ ५) इति हि सूत्रम् । किञ्च सर्वस्या अपि परविद्याया स एव विषयतयाऽऽश्रय इति ततोऽपि हेतो स एव द्युम्वाद्यायतनम् । तथाहि सूत्रम्—"प्रकरणात्" (१ ३ ६) इति । "द्वे विद्ये वेदितव्ये" (आथ० १.१.४) इति परविद्याविषयत्वोक्त्या तस्य ह्येतत् प्रकरणमिति तदर्थात् । सर्वस्य जीवजातस्य सत्तित्वेनाऽऽश्रय इति "द्वा सुपर्णा सयुजा सखाया—" (आथ ३ १ १.) इत्युक्ते स्थित्यदने च भाषिते भवत । तथाच सूत्रम्—"स्थित्यदनाभ्या च" (१ ३ ७) इति । दिङ्मात्रप्रदर्शनायैवोपन्नान्तत्वात् क्वचित्क्वचिदेव व्याकरोति । क्वचिच्चोहस्यान्तरुदज्जहाति च टीकाकृत् ।

---

१ "भूयादिति" ग

"[1]अक्षर गार्ग्यदृष्टम्–" (बृह० ५.८.११.) इत्यत्राप्यदृश्यत्वादिगुणक चित्प्रकृतिः सूर्यादिधारणादित्यत आह–"अक्षरमम्बरान्तधृते." (१.३.१०.) इत्यधिकरणम्। "सोऽक्षरः" इति। य "यत्तदद्रेश्यम्–"(आय० १.१.६.)-इति पूर्वोक्तो विष्णु स [1]एवात्राप्यदृश्यत्वादिगुणकोऽक्षर उच्यते। सूर्याद्यतिरिक्तस्याम्बरान्तस्य धृतिवचनात्। दृश्यत्वादिनिवारणेन स्थूलाणुत्वाद्यपि विष्णोर्निवा[2]रितम् ॥ ० ॥ ३ ॥ ० ॥

---

1 'तद् वा एतदक्षर गार्ग्यदृष्ट द्रष्टृश्रुत श्रोत्रमत मन्त्रविज्ञात विज्ञातृ" इत्यादिना यदक्षरमुच्यत सा चित्प्रकृतिरिति युक्तम्। कुत? "एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत" (बृह० ५ ८ ९) इति सूर्यादिधारणवचनात्। कुत इद ज्ञायते यत्सूर्यादिधारण प्रकृतिधर्म इति? श्रुतेरेव। तथाहि मन्त्र–"अह सोममाहनस विभर्म्यंह त्वष्टारमुत पूषण भगम्" (ऋ० १० १२५ २) इति। तेन प्रकृतिरपि स्यादेव प्रतिपाद्या। नेत्याह–सोऽक्षर इति। यस्माददृश्यत्वादिगुणक माथर्वण्यामुदितमक्षर ब्रह्मैवेति पुरस्तादेव प्रस्तुतम्, तच्चादृश्यत्वादि "अदृष्ट द्रष्टृ–" इत्यादिनाऽत्राप्यभिज्ञायते तेनैव सुशक यत् स एवाक्षरोऽत्रापि निगद्यत इति। अम्बरान्तधृतेरिति हेतुमपि स इति प्रत्यभिज्ञयाऽऽह। तथाहि तत्र श्रूयते–"यस्मिन् द्यौ पृथिवी चान्तरिक्षमोतम्" (आय० २ २ ५) इति। तदेवात्र प्रत्यभिज्ञायते–"एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च" (बृह० ५ ८ ११) इति। "सा च प्रशासनात्" (१ ३ ११) इति सूत्रमपि प्रत्यभिज्ञयैव व्याख्यातम्। "यैनैष भूतैस्तिष्ठते ह्यन्तरात्मा" (आय० २ १ ६) इत्युक्त प्रशासनमेवात्राप्यक्षरे "एतस्य वा अक्षरस्य प्रशासने सूर्याचन्द्रमसौ विधृतौ तिष्ठत" (बृह० ५ ८ ९) इति प्रत्यभिज्ञायते हि। नियन्तेति च स्पुट प्रशासनम्। "अन्यभावव्यावृत्तेश्च" (१ ३ १२) इति सूत्रम्। तदपि व्याचख्यौ स प्रत्यभिज्ञात इति। 'नित्य विभु सर्वगत सुसूक्ष्मम्" (आय० १ १ ६) इति यन्महत्त्वमणुत्व चाक्षरस्योक्त तदेवात्रापि "अस्थूलमनणु" (बृह० ५ ८ ८) इति प्रत्यभिज्ञायत इति स एव स ।

---

१ "स एवादृश्य–" ग

२ "–प्णोर्निर्वा–" क ख ग

"[1] सदेव—" (छन्दो० ६.२.१.) इत्युपक्रान्तं सर्वकारणं सत् प्रधानमित्यत आह—"ईक्षतिकर्मव्यपदेशात् सः" (१.३.१२.) इति सूत्रम् । "सत्" इति । नात्रोपादानं सत् प्रधानमुच्यते । किन्तु? निमित्तमेव सन् विष्णुरेव । ईक्षतिकर्मव्यपदेशात् ॥ ० ॥ ४ ॥ ० ॥

"[2]ब्रह्मपुरे दहरं पुण्डरीकं वेश्म—" (छन्दो० ८.१.१.) इत्यादौ हृदये तावत् किञ्चिदब्जं श्रूयते । [3]तस्मिंश्च स्वल्पो भूताकाशः । उत्तरत्र तु "उभे अस्मिन् द्यावापृथिवी[4].... समाहिते" (छन्दो० ८.१.३.) इत्युक्तत्वात् सोऽल्पाकाशः सर्वाश्रय इत्यत आह—"दहर उत्तरेभ्यः" (१.३.१४.) इत्यधिकरणम् । "हृदब्जगः" इति । न तावद् भूताकाशः सर्वाश्रयो युज्यते । "तस्मिन् यदन्तस्तदन्वेष्टव्यम्" (छन्दो० ८.१.१.) इत्येव [1]प्रतिज्ञानात् । एवं चेज्जीवस्यापि

---

1 "सदेव सोम्येदमग्र आसीत्" (छन्दो० ६ २ १) इत्युपक्रान्त सत् "बहु स्या प्रजायेय" (छन्दो० ६ २ ३) इति परिणामश्रवणात् प्रकृतिरिति । नेत्याह 'सन्' इति । सोऽक्षर. इति तच्छब्दोऽत्रापि वर्तते । यथाऽक्षर इति न प्रकृतिः किन्तु स एव तद्वदत्रापि स एव सन् । एतेन स इति सूत्रपदमप्यनुचकार । कुत एतत्? ईक्षतिपूर्वं कर्मव्यपदेशात्—"तदैक्षत तत् तेजोऽसृजत" (छन्दो० ६ २ ३) इत्यादि । तदेतदीक्षते सर्वकर्तेति व्याख्यातम् । स इति प्रत्यभिज्ञात च । तथाह्याथर्वणे—"तपसा चीयते ब्रह्म ततोऽन्नमभिजायते" (आथ० १ १ ८) इति, "यस्य ज्ञानमय तप" (आथ० १.१ ९.) इति च ।

2 "अथ यदिदमस्मिन् ब्रह्मपुरे—" इत्यादि च्छन्दोगाना पाठ । "एतस्मिन् ब्रह्मपुरे—" इत्यादि भाष्योदाहृत शाखान्तरपाठ । तदुभयसग्रहाय "ब्रह्मपुरे दहरम्—" इत्याद्येव पर्यग्रहीत् । तदुक्त तत्त्वदीपिकायाम्—"सर्वत्र च सर्वेषा समानजातीयाना श्रुत्यन्तराणा सहोपलक्षणार्थम्—'अस्मिन् ब्रह्मपुरे' इत्युदाहर्तव्येऽपि 'एतस्मिन् ब्रह्मपुरे' इत्युदाहृतम्" इति ।

3 "दहरोऽस्मिन्नन्तराकाश" (छन्दो० ८ १ १) इति तस्मिन् स्वल्पो भूताकाश ।

4 "उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते । उभावग्निश्च वायुश्च सूर्याचन्द्रमसावुभौ" इत्यानुपूर्वी ।

---

१ "इति प्रतिज्ञानात्" ब.

प्रस्तावात् स एवायमिति चेन्न । तस्य स्वतोऽपहतपाप्मत्वाद्यसम्भवात् । कस्तर्हि? जीवस्य हृदयाब्जे स्वल्पाकाशगतो महाकाश एव सर्वाश्रय श्रूयते । कुत ? "यावान् वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश उभे अस्मिन्—" (छन्दो० ८ १.३) इत्याद्युक्ते । स च महाकाशो न पुनर्भूताख्य । [1]तद-सम्भाव्यश्रुतिलिङ्गविरोधात् । क्व पुनरिति चेत्, उत्तरवाक्यगतैरात्मत्वादि-स्वगुणैर्विष्ण्वाख्य एव महाकाश [2] । सुप्तगम्योऽपि [1]हृदब्जग प्राज्ञनामको विष्णुरेव । धृत्यादिमहिमोपलब्धिश्चास्यैव साधनीया[2] । सोऽय हृदब्जग एव नारायण श्रुतौ प्रसिद्धश्च[3] ॥ ० ॥ ५ ॥ ० ॥

---

1 एतेन "अहरहर्गच्छन्त्य एत ब्रह्मलोक न विन्दन्ति इति सुप्तगति "गति शब्दाभ्या तथाहि दृष्ट लिङ्ग च" (१ ३ १५) इति सूत्रिता च सूचिता भवति । ब्रह्मणो लोक वासस्थान हृदब्जमित्यपि विवक्षणात् । स एव ब्रह्मशब्दोदित इति तच्छ्रुतिद्वारा ब्रह्मशब्दोऽपि सूत्रित स्मारितो भवति । एतेनैव नयेन "अरश्च ह्वै प्यश्चार्णवौ ब्रह्मलोके" (छन्दो० ८ ५ ३.) इति दृष्ट लिङ्ग च स्मारित भवति । ब्रह्मलोक इति हृदब्जग इत्यनुवादात् ।

2 एतच्च "सूर्याचन्द्रमसौ विधृत" इति पुरैव प्रत्यभ्यज्ञायीति न पृथग् वक्तव्यम् । तथाच व्याख्यात सूत्रम् —"धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धे" (१ ३ १६) इति । "स सेतुर्विधृति" (छन्दो० ८ ४ १) इति श्रुतौ धृतिवचनम् ।

3 तथाच सूत्रम् —"प्रसिद्धेश्च" (१ ३ १७) इति । एतच्च स इत्यावृत्तेन श्रुतिप्रसिद्धिवाचिना भाषितम् । पुरैव सर्वसग्रहश्च कृत आगमोदित इति । 'नारायणश्रुतौ' इति समस्त वा । "तस्या शिखाया मध्ये परमात्मा व्यव-स्थित" इति प्रसिद्धेश्च । "इतरपरामर्शात् स इति चेन्नासम्भवात्" (१ ३ १८), "उत्तराच्चेदाविर्भूतस्वरूपस्तु" (१.३ १९), "अन्यार्थश्च परामर्श" (१ ३ २०) "अल्पश्रुतेरिति चेत् तदुक्तम्" (१ ३ २१) इत्यन्ययोगव्यवच्छेदपरा चतु सूत्री चोपदर्शितयैव दिशा व्याकृता भवतीति स्फुटमेव पटुधियाम् । अपटुधियस्त्वनधिकृता एवेति न वक्तव्यते । ग्रन्थगुप्त्यै च ।

---

१ "तदसम्भवश्रुति—" स २ "महानाकाश" ग घ

"अनुकृतेस्तस्य च" (१.३.२२.) इत्यधिकरणम् । "सूर्यादिभासकः" इति । [1]स एव भगवान् सूर्यसोमाग्न्यादीना तद्भासा च स्वभासैव भासको भवति । अतः स एवानिर्देश्यसुखरूपः ॥ ० ॥ ६ ॥ ० ॥

[2]प्राणोन्नयनादिकृत् सर्वदेवोपास्यः श्रूयमाणो[1] न मुख्यप्राण इत्यत आह— "शब्दादेव प्रमितः" (१.३.२४.) इत्यधिकरणम् । "प्राणप्रेरक." इति । प्राणापानयोर्मुख्यप्राणस्यापि प्रेरको[2] विष्णुरेवेति वामनशब्दादेव प्रमितः । सोऽयं सर्वेशानः [3]शरीरमध्ये हृदये प्राणोन्नयनादि कुर्वङ्गुष्ठमात्रस्तिष्ठति । अनंगुष्ठवत्सु तिर्यक्षु कथमिति चेत् तद्वतां मनुष्याणामेव वेदविद्यायामधिकार[3] इत्यविरोधः ॥ ० ॥ ७ ॥ ० ॥

---

1 "न तत्र सूर्यो भाति न चन्द्रतारक नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिद विभाति" (कठ० ५ १५) इति सूर्यादीना तदायत्तप्रकाशत्वात् स एव सूर्यादिभासक । स एव चानिर्देश्यपूर्णानन्द —"तदेतदिति मन्यन्तेऽनिर्देश्य परम सुखम्" (कठ० ५.१४.) इत्युक्त । प्रसिद्धश्च स तादृश स्मृतौ—"यदादित्यगत तेजो जगद् भासयतेऽखिलम् । यच्चन्द्रमसि यच्चाग्नौ तत् तेजो विद्धि मामकम्" (भ०गी० १५ १२) इति । तथाच सूत्रम्—"अपि स्मर्यते" (१.३.२३.) इति ।

2 "ऊर्ध्वं प्राणमुन्नयत्यपान प्रत्यगस्यति" (कठ० ५ ३.) इति प्राणोन्नयनादिकृत् । "मध्ये वामनमासीन विश्वे देवा उपासते" (कठ० ५ ३) इति सर्वदेवोपास्य. । प्राणोन्नयनादि च मुख्यप्राणधर्म इति नाय विष्णु । नैवम् । स. वामनशब्देन प्रसिद्ध नारायण एवात्रोच्यत इत्युचितम् ।

3 तथाच सूत्रम्—"हृद्यपेक्षया तु मनुष्याधिकारत्वात्" (१.३.२५.) इति । तदेतत् हृदङ्गम इति भाषितम् । "अगुष्ठमात्र. पुरुषो मध्य आत्मनि तिष्ठति" (कठ० ४.१२.) इति श्रुतेरगुष्ठवन्मानुषहृदङ्गम इति पर्यवसितोऽर्थ ।

---

१ "—माणो विष्णुरित्यत—" ग.

२ "प्रेरकोऽपि विष्णु—" क

३ "—विद्याधिकार—" क ग.

अहो तर्हि देवादिभिर्न वेदैर्ज्ञेयो भगवानिति सर्वदेवोपास्यत्वोक्तिविरोध इत्यत आह—"तदुपर्यपि बादरायण सम्भवात्" (१.३ २६) इत्यधिकरणम् । "दैवतैरपि ज्ञेय:" इति । मनुष्यत्वादुपरि देवतापदप्राप्त्यनन्तरमपि तैर्देव तैर्वेदैर्ज्ञेयो[1] नारायण । तेषामधिकारवैशेष्येण ज्ञानध्यानाद्युपासनसम्भवात् । अपिशब्दाद्[1]गन्धर्वादिभिरपि वेदैर्ज्ञेय । विशिष्टा स्त्रियस्तिर्यञ्चोऽपि केचि-दपिशब्दसगृहीता । नच देवानामनित्यत्वेऽग्निष्टोमादौ मन्त्रे वा कश्चिद् विरोध । अनेकप्रतिपत्त्याद्यनेकयुक्तिश्रवणात[1] । नचात्र जैमिनिमतविरोध । विषयविभागप्रकटनात[2] ॥ ० ॥ ८ ॥ ० ॥

एव चेन्मनुष्यजातिभि शूद्राद्यैरपि वेदैर्ज्ञेय स इत्याशङ्क्याह—"शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि" (१.३ ३४) इत्यधिकरणम् । "न वेदै. शूद्राद्यै:" इति । शूद्रशकशबर[3]पुरस्सरं सर्वयाऽपि न वेदैर्ज्ञेय

---

1 तथाच सूत्रम्—"विरोध कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्" (१ ३ २७) इति । तदेतत्[1]दैवतैरिति बहुवचनोक्तम् । एकैकस्यापि पदस्य एकस्या-नन्तरमेक इति बह्वनि हि दैवतानि सन्ति । एतेनैव 'शब्द इति चेन्नात प्रभवात् प्रत्यक्षानुमानाभ्याम्" (१ ३ २८) "अत एव च नित्यत्वम्' (१ ३ २९), "समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च (१ ३ ३०) इत्यपि सूत्राणि सगृहीतानि भवन्ति ।

2 तथाच सूत्राणि—"मध्वादिष्वसम्भवादनधिकार जैमिनि (१ ३ ३१), "ज्योतिषि भावाच्च" (१ ३ ३२), "भाव तु बादरायणोऽस्ति हि (१ ३ ३३) । तमेत विशेषमपिशब्देन सूचयाम्बभूव । ज्ञानिभिरपि प्राप्तफलैरपि देवैरुपास्य फलविशेषभावादित्यादि । ज्ञेयोऽभोज्योऽपीति च । "कर्मण्यप्यधिकारिणो देवा" इति पद्मनाभतीर्था ।

3 शका शबरा इति म्लेच्छविशेष । व्रात्या भूपतय शवा । पर्वतीया पुलिन्दादयतिभिन्ना शबराश्चण्डलभेदा । "गोमासभक्षको यस्तु लोकबाह्य च भाषते । सर्वाचारविहीनोऽसौ म्लेच्छ इत्यभिधीयते" इति तल्लक्षणम् ।

---

1 "—मपि तैर्वेदैर्ज्ञेयो—" ख

परमात्मा। नहि कुत्रचिच्छूद्रो वेदाधिकारी दृष्टः। पौत्रायणोऽपि कारणान्तरेण[1] शूद्रशब्दोक्तत्वेऽ[1]प्यशूद्र एव हि वेदविद्यामश्नौषीत्। [2]लिङ्गविशेषेणोत्तरत्र क्षत्रियत्वावगमात्। अपिच शूद्रस्य[2] सत्कारामावाभिलापात्, शूद्रत्वाभाव-निर्धारण एव सत्यकामस्योपनयनादिप्रवृत्तेश्च नैव शूद्रो[3] वेदाधिकारी। तस्य [4]वेदश्रवणाध्ययनार्थविधारणतया प्रकटप्रतिषेधात् किमु वक्तव्यम्। [5]सामान्यस्त्रीब्रह्मबन्धूना सत्कारलेशदर्शनाद् यथोचित एवंप प्रतिषेधो बोद्धव्यः। एवञ्च[5] तैर्गुणकर्मनाम्ना यथायोग्यश्रवणकीर्तनमात्रेणोपास्यो वेत्याकूतम् ॥ ० ॥ ६ ॥ ० ॥

"कम्पनात्" (१.३.३६.) इति सूत्रम्। "कम्पकः" इति। "[4]–एजति–"

---

1 शुचाऽऽद्रवणाख्येन कारणान्तरेण।

2 एतदधिकरणहेतवश्च "शूद्राद्यै" इति भाषिता। शुचाऽऽद्रवणादिभि-र्लिङ्गैरिति। "अयमश्वतरीरथ" (छन्दो० ४ २.२) इत्युक्तोऽश्वतरी-युक्तो रथ. क्षत्रियत्वावगमे लिङ्गविशेष। "गर्दभादश्वाया जाता अश्वतर्य" इति तत्त्वदीपिका। "गर्दभीषु अश्वैर्जाता" इति व्यास-तीर्थीयस्य मूल मृग्यम्। भाष्य आदिशब्दोपात्तान् हेतूनाह – अपिचेत्यादि। तथाच सूत्राणि – "क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात्" (१ ३ ३५) "सस्कारपरामर्शात् तदभावाभिलापाच्च" (१ ३ ३६) "तदभाव-निर्धारणे च प्रवृत्ते" (१.३ ३७) "श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च" (१.३ ३८.) इति।

3 शूद्राद्यैरित्यादिशब्दस्यार्थान्तरमप्याह – सामान्येत्यादि।

4 "यदिद जगत् सर्वं प्राण एजति निस्सृतम्। महद्भय वज्रमुद्यत य एतद विदुरमृतास्ते भवन्ति" इति कठाना श्रुति। प्राण एजति प्राणाधार मत् कम्पते। चेष्टत इति यावत्। तदेतदाह – कम्पकश्चेष्टक इति।

---

१ "शूद्रशब्दितोऽप्य–" ग "शूद्रशब्दितत्वेऽप्य–" घ

२ "शूद्रस्य तु सस्कारा–" क ग ३ "शूद्रोऽधिकारी" क

४ "तस्य श्रवणाध्य–" ग. ५ "एवञ्चैतै–" क ग

(कठ० ६ २) इति श्रूयमाण कम्पकश्चेष्टको हरिरेव । अत स एवोद्य तवज्रादिहेतिनामा ॥ ० ॥ १० ॥ ० ॥

पौरस्त्य एव ज्योति शब्दो "ज्योतिर्दर्शनात्" (१ ३ ४०) इति सूत्र व्याख्यातुमलम् । "—हृद्यन्तर्ज्योति पुरुष" (बृह० ६ ३ ७) इत्यत्रापि ज्योतिर्विष्णुरेव । नतु जीव । तथा [1]दर्शनात[1] ॥ ० ॥ ११ ॥ ० ॥

"आकाशोऽर्थान्तरत्वादिव्यपदेशात्" (१ ३ ४१) इति सूत्र च तत्रैव "खवत्" इति व्याख्यातम् । "आकाश इति होवाच" (छन्दो० १ ९ १) इत्युक्ताकाशो यथा विष्ण्वाख्यस्तद्वत् "आकाशो वै नाम —" (छन्दो० ८ १४ १) इत्यत्रापि विष्णुरेवोच्यते । कुत ? प्राकृतनामरूपवत प्रसिद्धाकाशादर्थान्तरत्वादिव्यपदेशात[2] ॥ ० ॥ १२ ॥ ० ॥

"सुषुप्त्युत्क्रान्त्योर्भेदेन" (१ ३ ४२) इति सूत्रम् । "अन्यश्च जीवतः" इति । "असङ्गो ह्यय पुरुष" (बृह० ६ ३ १५) इति न जीव उच्यते । "प्राज्ञेनात्मना सम्परिष्वक्तो[2] न किञ्चन वेद"[3] (बृह० ६ ३ २१.) इत्यसङ्गाज्जीवस्य भेदव्यपदेशात् । कस्तर्हि? अज्ञादुच्यमानाज्जीवादन्य प्राज्ञो हरिरेवासङ्ग । चशब्द केवलभेदमवधारयन् भेदाभेदमत निवारयति ॥ ० ॥ १३ ॥ ० ॥

"एष नित्यो महिमा ब्राह्मणस्य" (बृह० ६ ४ २३.) इत्यत्र विरिञ्चोऽप्युच्यत इत्यत आह—"पत्यादिशब्देभ्य" (१ ३ ४३) इति सूत्रम् । "पतित्वादि

---

1 विष्णुरेव ज्योति" इति चतुर्वेदशिखाया दर्शनाद् विष्णुरेव ज्योति ।

2 पूर्वोक्तखवदिदमप्यर्थान्तरम् । तथा व्यपदेशात् "आकाशो वैनाम नाम रूपयोर्निर्वहिता ते यदन्तरा तद् ब्रह्म तदमृत स आत्मा" (छन्दो० ८ १४ १) इति ।

3 "न बाह्य किञ्चन वेद नान्तरम्" इत्यानुपूर्वी ।

---

१ 'दर्शनादित्यर्थ' घ २ 'प्राज्ञेन परिष्वक्तो—' ख ग घ

गुणैर्युक्तः" इति । [1]सर्वाधिपतित्वं सर्वेशानत्वमग्राह्यत्वमित्यादिगुणैर्युक्तत्वा-न्नित्यमहिमो ब्राह्मणोऽपि विष्णुरेव । "यो ब्रह्माणं विदधाति[2]–" (श्वेताश्व० ६.१८.) इत्यादावनित्यमहिमत्वं विरिञ्चस्यापि श्रुतम् । जन्मराहित्यं च [1]मन्वन्तरकल्पादिष्वेव । नतु परादौ[2] । नच विष्णावप्येवन्त्वं शङ्क्यम्[3] । "विष्णोर्नु कम्[3]–" (ऋ० १.१५४.१.), "परो मात्रया–" (ऋ० ७.९९.१.), "न ते विष्णो–" (ऋ० ७.९९.२.) इत्यादिश्रुतिभ्यः ॥ ० ॥ १४ ॥ ० ॥

पादार्थं निगमयति–"तदन्यत्र च वाच्यकैः । मुख्यतः सर्वशब्दैश्च वाच्य एको जनार्दनः" इति । अयं भावः–[4]उक्तप्रकारेण [5]रुद्रवाय्वादिविरिञ्च-पर्यन्तेषु[5] प्रसिद्धंमुख्यवाच्यः स इति यत् तत् [6] तस्मात् कारणादन्यत्र

---

1 "सर्वस्येशान मर्वस्याधिपति" (बृह० ६४२२), "स एष नेति नेत्यात्माऽगृह्यो नहि गृह्यते" (बृह० ६४२२) इत्यादिश्रुतिप्रसिद्धान् गुणानाह–सर्वेत्यादि ।

2 "यो ब्रह्माण विदधाति पूर्वं यो वै वेदाश्च प्रहिणोति तस्मै" इति श्वेताश्वतरोपनिषत् ।

3 "विष्णोर्नु क वीर्याणि प्र वोच य पार्थिवानि वि मम े रजाँसि", "परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति", "न ते विष्णो जायमानो न जातो देव महिम्न परमन्तमाप" इति बाह्वृचा मन्त्रा ।

4 अधिकरणक्रमेणाऽह–रुद्रवाय्वादिविरिञ्चपर्यन्तेष्विति ।

---

१ "मन्वन्तरादिष्वेव" ग

२ "नतु कल्पादौ" ग

३ "–वप्येवन्त्व कल्प्यम्" क

४ "भाव –इत्युक्त–" ग

५ "रुद्रवायुविरिञ्चादिपर्यन्तेषु" ग

६ "यत् तस्मात्" क. ग.

एतेभ्योऽन्ये[1]ष्वजगजादिघटलोष्टान्तवस्तुषु च वाचकत्वेन लोकसिद्धेर्नामलिङ्गात्मकं सर्वशब्दैश्च जनार्दन एक एव मुख्यतो वाच्य । "तदन्यत्र च वाचकैः" इति विशेषणशब्दस्या[2]न्योऽप्यर्थ – तत् तस्मिन् विष्णौ अन्यत्र जगति चेत्युभयत्रापि वाचकत्वेन प्रतीयमानैरिति । अथवा, तदन्यत्र तस्माद् [3]विष्णोरन्यत्र जगति [1]समाकर्षादमुख्यतो वाचकैश्चेति । [2]एवञ्चैक एव नारायण सर्वशब्द [4]मुख्यार्थ इति वचनात् समाधिकराहित्य तस्योक्त स्यात् ॥ ०॥०॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचितस्य
श्रीब्रह्मसूत्रसग्रहभाष्यस्य टीकाया
नैवित्रमार्यदासकृतायानन्दमालाया
प्रथमाध्यायस्य तृतीय पाद

---

1 एतेनोपरितन समाकर्षाधिकरण कटाक्षयति । तदप्यत्रोपसहारमुखेन सङ्गमयितु शक्यमिति ।
2 वक्ष्यमाणपादार्थं च मनसि निधायोपसहरति – एवञ्चेत्यादि ।

---

१ "एतेभ्योऽन्येष्वजादि –" क
२ " – शब्दस्यान्योऽर्थं " ख ग घ
३ " – विष्णोरन्यत्र समाकर्षा –" क
४ "सर्वमुख्यार्थं इति" व

॥ प्रथमाध्यायस्य चतुर्थः पादः ॥

अ॥। अन्यत्रैव प्रसिद्धशब्दैरपि[1] विष्णुरेव मुख्यवाच्य इति साधयत्यस्मिन् पादे।

"आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च" (१.४.१.) इत्यधिकरणम्। "अव्यक्तः" इति। "अव्यक्तात् पुरुषः पर·" (कठ० ३.११.) इत्यव्यक्तशब्दो(दितो[2] न विष्णु। किन्तु प्रधानमेव) तत्रोच्यते। तस्यैव पुरुषादवरत्वेन तत्प्रतियोगित्वसम्भवात्। नहि स्वस्मादेव स्वयमुत्तम इत्यादि साम्प्रतमिति चेन्न। अन्यदवरयतीत्यवरत्वस्य विष्णोरेव[3] सम्भवात् स एवाव्यक्तशब्देन मुख्यतो गृह्यते[1]। अन्यदमुख्यतयैव[4]। समाकर्षात्, सूक्ष्मत्वादियुक्तेः[5] श्रुतेश्च तथा दर्शनात्[2]। नचैकस्यैव धर्मिप्रति-

---

1 शरीररूपेऽव्यक्ते स्थित एव भगवानव्यक्तशब्देन मुख्यतो गह्यते।

2 "तुच्छ्येनाऽभ्वपिहित यदासीत् तपसस्तन्महिनाऽजायतैकम्" (ऋ० १० १२९ ३) इति दशममण्डले मन्त्र। "तुच्छमल्प गुणत। परमापेक्षयाऽल्पत्व प्रकृते। आ समन्ताद् भूमात्मकत्वादाभु ब्रह्म। यद् ब्रह्म प्रकृत्याऽपिहितमासीत् तदेव तपसो ज्ञानस्य महत्तमा प्रधानमासीत्" इति तत्त्वदीपिकायाम्। एतेन प्रकृत्याऽपिहितत्वादव्यक्तो भगवानिति श्रुतिरेव दर्शयति। सूक्ष्ममेवाव्यक्तमिति साऽपि युक्तिरव्यक्तपदेन निगदिता। तथाहि सूत्रम् "सूक्ष्म तु तदर्हत्वात्" (१.४.२) इति। "सर्वान्तर्यामको विष्णु सर्वनामा" इति वचनादव्यक्तनियामको विष्णुरेवाव्यक्त इति च भाष्यते। तथाच सूत्रम्–"तदधीनत्वादर्थवत्" (१.४.३) इति।

---

१ "प्रसिद्धैरपि" क

२ अत्र मूलकोशेषु कियाश्चिद् भागो गलित इति वाक्यार्थपूरणायापेक्षितान्यक्षराणि ( ) आवृतिचिह्नान्तर्गतान्युपक्षिप्तानि। एवमुत्तरत्रापि।

३ "विष्णावेव" ग

४ "–दमुख्यत एव" ग

५ "सूक्ष्मत्वाद्युक्ते" क

योगित्व विरुद्धम् । 'अह माम्' इत्यादौ कर्तृकर्मत्ववद् विशेषादेव द्वित्वमात्राद् व्यवहारोपपत्ते[1] । "कृष्णात् पूर्वतनो राम" इत्यादिवत् । यथा च[2] तयो पूर्वापरयोरुभयोरप्यनादित्व ब्रह्मत्व चास्ति, एवमेवानयोः परावरयोरुभयोरप्युत्तमत्व ब्रह्मत्व च युक्तम् । अतो यथा[3] महच्चमसशब्दौ लोकरूढमवर विहाय श्रुतिसिद्धमर्थान्तरमेव मुख्य ब्रुवाते, प्रयोजनाधिक्यात्, एवमव्यक्तादि-शब्दा सर्वेऽन्यत्र प्रसिद्धा अपि श्रुतिसिद्ध विष्णुमेव परम ब्रूयुरिति मयि-तार्थं[4] ॥ ० ॥ १ ॥ ० ॥

अव्यक्तपदेनैव "अव्यक्तमचल शान्त निष्कळ निष्क्रिय परम् । यो वेद हरिमात्मान स भयादनुमुच्यते" इति पिप्पलादशाखावचमध्येकदेशग्रहणेन स्मारयति । तत्राव्यक्तो हरिरेव ज्ञेय उच्यते नान्यदिति "ज्ञेयत्वावचनाच्च" (१४४) इति सूत्र च विवृतम् । "महत पर ध्रुव निचाय्य" (कठ० ३१५) इत्यत्रापि विष्णुरेवाव्यक्तो ज्ञेयतयादित । तदिदमुक्तम्—"वदतीति चेन्न प्राज्ञो हि" (१४५) इति । "सोऽध्वन पारमाप्नोति तद् विष्णो परम पदम्" (कठ० ३९) इति विष्णुरेव ह्यव्यक्त इति च प्रकरणे प्रकृत । तदुक्तम्—"प्रकरणात्" (१४६) इति । "अणुरेष धर्म" (कठ० १२१) इत्यणुत्वेनाव्यक्तस्य परमात्मन एव प्रश्नाच्चान्न विष्णुरेवाव्यक्तपदगादित । तदुक्तम्—"त्रयाणामेव चैवमुपन्यास प्रश्नश्च" (१४७) इति ।

1 अव्यक्तशब्देनेदमपि स्फोरयति—यथा महतो महीयान् भगवानेव मुख्यतो महत्पदार्थ एवमणोरणीयान् स एव मुख्यतोऽव्यक्त इति । अनेनैव न्यायेना-विशेषाद् दृष्टान्तान्तरमप्युपलक्षयति—यथा सोमपात्र प्रसिद्धोऽपि चमसशब्द श्रुत्या मुख्यत शिरोवाची तद्वदिति । तथाच सूत्रे—"महद्वच्च" (१४८), 'चमसवदविशेषात्" (१४९) इति ।

---

१ "व्यवहार उपपन्न ।' ग
२ 'तयाच" ग
३ "—मेव ब्रुवाते" ग
४ "मथितोऽर्थ" ख

एवं तावदौपनिषदैर्मन्त्रवर्णिकैश्च ज्ञानवाक्यैस्तत्तदिक्याकारकपदैश्च विष्णुरेव मुख्यतो वाच्य इत्यायातम् । अथेदानीं ज्ञानैकफलकर्मप्रतिपादकवाक्यैश्च तदेकवाक्यत्वेन मुख्यवाच्य इत्याह—"ज्योतिरुपक्रमात्तु तथा ह्यधीयत एके" (१.४.१०.) इत्यधिकरणम् । "कर्मवाक्यैश्च वाच्यः" इति । ज्योतिष्टोमादिकर्मणि सृष्ट्यादौ च प्रसिद्धैर्वसन्तादिभिरन्यैश्च वाक्यैः स एव भगवान् मुख्यतो वाच्यः । तत्साधनाद्यशेषकारकेषु[1] प्रसिद्धैः सुक्स्रुवादिपदैश्चेति चकारार्थः । [1] वाक्यपदाविगोचरैश्च वाक्याद्यैर्वाच्य इति वा । तथाह्येके तत्तन्नामान्यस्मिन्नेव निरूप्या[2]धीयते । नच तावताऽग्निष्टोमादिव्यवहारासम्भवः । मुख्यामुख्यकल्पनया तदुभयार्थत्वोपदेशात्[2] । तच्चाविरुद्धम् । मध्वादिशब्दवत् । नन्वेवमपि ज्ञानस्य कर्मशेषत्वात् कर्मण एव मुख्यवाच्यत्वं तत्रेति चेत्, सत्यम्, अपरविद्याख्ये स्वर्गादिमात्रफले क्षुद्रशास्त्रे । नतु परविद्याख्ये समग्रफले महाशास्त्रे । कर्मण एव ज्ञानार्थत्वात् । अत्रापि स्वानुष्ठेयत्वान्यथानुपपत्त्या कर्मणोऽपि मुख्यत्वमापततीति चेत्, सत्यम्, तथाऽपि तत्साध्यज्ञानसाध्यस्य विष्णोः परममुख्यत्वा-[3] तादविरोधः ॥ ० ॥ २ ॥ ० ॥

पञ्चदशेत्यादिबहुसङ्ख्यावाक्यैरेक एव कथं वाच्य इत्यत आह—"न सङ्ख्योपसंग्रहादपि नानाभावादतिरेकाच्च" (१.४.१२.) इत्यधिकरणम् । "एकोऽमितात्मकः" इति । एकस्यैव विष्णोर्बहुसङ्ख्याकाः स्वरूपांशशब्दिता आत्मानः

---

1 सूक्त वर्गो मन्त्र· शब्द. प्रकरणमित्याद्यै. । नाम धातु क्रियापदमित्याद्यैश्च । अदेडादिभिश्च ।

2 तथाच सूत्रम्—"कल्पनोपदेशाच्च मध्वादिवदविरोध" (१.४.११.) इति । तदेतत् कर्मवाक्यैरिति भाषितमेव । अमुख्यतया कर्मापि वाच्य येषा तानि वाक्यानीति । । कर्मवाच्यैरिति भाष्यपाठे प्रस्फुटोऽर्थं ।

---

१ "तत्साधनादिषु" घ. २ "निरूप्याधी—" ख
३ "—त्वादविरोध." ग.

सन्ति । त एव प्राणचक्षुरादिनामका [1]"पञ्चपञ्च" (बृह० ६.४.१७) इत्युच्यन्ते । नतु भिन्नार्था । तच्च बहुत्व विशेषादेव भवति, नतु भेदादिति ज्ञापयितु "एक" इति विशेषणम् । सर्वजीवेषु पञ्चधा दशधा चावस्थितत्वादमितात्मक उक्त । अमित पञ्चजनै सह न सङ्कचात "यस्मिन्—" (बृह० ६.४ १७) इति तदतिरेकेणैव पठित रूपान्तरमस्यास्तीत्यप्यमितात्मा [2]। नच तेषु रूपेषु (दु खले)शस्पर्शस्तस्याऽशङ्कच इति सुखैकाश्रयत्व [1]कशब्दाद् वृते ॥ ० ॥ ३ ॥ ० ॥

मूलकारणभूतस्यावान्तरकारणत्वाभावात् तच्छब्दैर्नोच्यत इत्यत आह— "कारणत्वेन चाऽकाशादिषु यथाव्यपदिष्टोक्ते." (१ ४.१५) इति सूत्रम् । "अवान्तर कारण च" इति । आकाशादिषु सस्थित. परमात्मैवावान्तर च कारणम् । वाय्वादीनामिति शेष । तथैव श्रुत्युक्ते.[3] ॥ ० ॥ ४ ॥ ० ॥ ५ ॥०॥

---

1 "यस्मिन् पञ्चपञ्चजना आकाशश्च प्रतिष्ठित" इत्यानुपूर्वी । प्राण-चक्षु श्रोत्रान्नमनआख्यपञ्चजननामा ज्योतिर्नामा इत्याद्येक एवामितात्मक । तथाच सूत्रे—"प्राणादयो वाक्यशेषात्" (१ ४ १३), "ज्योतिषैकेषामसत्यन्ने" (१ ४ १४) इति ।

2 एतेन "अतिरेकाच्च" इति सूत्राशो व्याख्यात । "यस्मिन्निति तेषामधिकरणत्वेन तदतिरिक्तस्वरूपवत्त्वाच्च" इति तत्त्वदीपिकायाम् ।

3 इत समाकर्षाधिकरण पूर्वमेव सूचित तत्तदधिकरणन्यायप्रसङ्गाद् भाषितप्राय च मन्वानो न पृथग् व्याचख्यौ भगवान् भाष्यकार । तथाहि तत्सूत्राणि—"समाकर्षात्" (१ ४ १६), "जगद्वाचित्वात्" (१७), "जीवमुख्यप्राणलिङ्गादिति चेत् तद् व्याख्यातम्" (१८), "अन्यार्थं तु जैमिनि प्रश्नव्याख्यानाभ्यामपि चैवमेके" (१९), "वाक्यान्वयात्" (२०), "प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्य" (२१), "उत्क्रमिष्यत एवम्भावादित्यौडुलोमि" (२२), "अवस्थितेरिति काशकृत्स्न" (२३) इति । 'कर्मवाक्यैश्च', "नियन्ता" इत्यादिना भाष्यवचनेन सर्वाण्यप्येतानि सूत्राणि स्फुटतर व्याख्यातानि मन्तव्यानि । वक्ष्यति च—"अन्यत्र नियतै" इति ।

---

१ "कशब्दो वृते" ग

पुरुषोत्तमस्य स्त्रीशब्दवाच्यत्व सर्वथा नास्तीत्यत आह—"प्रकृतिश्च प्रतिज्ञा-दृष्टान्तानुपरोधात्" (१.४ २४) इत्यधिकरणम् । "प्रकृति" इति । प्रकृतिर्युवतिरित्यादिस्त्रीशब्दैरपि विष्णुरेव मुख्यत उच्यते । अधिकरण-सूत्रितानेकयुक्तिप्रवाहसामर्थ्यात् । [1]प्रतिज्ञादृष्टान्तानुपरोध, [2]अभिध्याया: प्रकृतित्वस्वरूपत्वोपदेश, [3]साक्षादेव प्रकृतिपुरुषत्वाम्नानम्, [4]प्रकर्षेण करोतीति गुणयोग, [5]अव्यव°धानेनोत्पत्तिद्वारत्वमित्याद्या ह्यधिकरणोक्त[२] युक्तय ॥ ० ॥ ६ ॥ ० ॥

---

1 पञ्चसूत्रमिदमधिकरणम् । तत्र सूत्रिता युक्तिप्रवाहा क इति? आह—प्रतिज्ञेत्यादि । "हन्तेतमेव पुरुष सर्वाणि नामान्यभिवदन्ति यया नद्य स्यन्दमाना समुद्रायणा समुद्रमभिविशन्ति" इति प्रतिज्ञादृष्टान्तयो रनुपरोध एव सत्येव स्यात् । प्रकृति प्रकृतत्वमुपक्रान्तत्वमिति सूचितमेवेद भाष्ये ।

2 "अभिध्योपदेशाच्च" (१ ४ २५) इति सूत्रिता युक्तिमाह—अभिध्याया इति । "प्रकृतिर्वासनेत्येव तवेच्छाऽनन्त कथ्यते" इति वचनादभिध्याया भगवदिच्छाया प्रकृतित्वम् । "सोऽभिध्या स जूति" इति स्वरूपत्वम् । एतच्च प्रकृतिरित्येव भाषितम् । अभिध्या हि प्रकृतिरुच्यते । भगवानेव च प्रकृति । तेन सा च स एवेति ।

3 "साक्षाच्चोभयाम्नानात्' (१ ४ २६) इति सूत्रयुक्तिमाह—साक्षादेवेति । अत्र भाष्ये प्रकृतिरितिपद "एष पुरुष एष प्रकृति' इत्युभयाम्नानश्रुतिं स्मारयति ।

4 "आत्मकृते परिणामात्' (१ ४ २७) इति सूत्रयुक्तिमाह—प्रकर्षेणेति । स एव हि योगोपपत्तेर्मुख्यत प्रकृतिरिति । "तस्मात् प्रकृतिस्तस्मात् प्रकृतिरित्याचक्षते" इति भाल्लवेयश्रुते ।

5 'योनिश्च हि गीयते" (१ ४ २८) इति सूत्रकथिता युक्तिमाह—अव्यवधानेनेति । समानार्थक प्रकृतिरिति योनिपदमपि व्याख्यातुमलम् ।

---

१ "अव्यवधानेन चोत्पति—" ख

२ "—अधिकरणयुक्तय" ग "—अधिकरणोक्तयुक्तय" घ

"एतेन सर्वे व्याख्याता व्याख्याता." (१.४.२९.) इति सूत्रम्। "शून्यमेव च" इति । अभावधर्मिषु प्रसिद्धैः [3]शून्या[1]दिशब्दैरपि हरिरेव प्रधानवाच्यः । भावार्थस्याप्यभावधर्मसम्भवात्। नच तावता धर्मिण एव शून्यत्वं शङ्क्यमित्यभिप्रायेण पूर्वोक्तलक्षणैः सुसिद्धं भावत्वमेव 'एव' शब्दादवधारयति । चवैतुह्यादिभिर्निपातैश्च वाच्य इति च 'च'शब्दार्थः । ईश्वरस्य त्वौचितव्यसाहित्यं चकारो वक्ति, वेदाद्य श्रुतिप्रसिद्धत्वमित्यादि[2] ॥ ० ॥ ७ ॥ ० ॥

[4]पादार्थं निगमयति –"इत्याद्यन्यत्रनियतैरपि मुख्यतयोदितः। शब्दैः" इति । इत्युक्ता अव्यक्तादिशून्यान्ता. शब्दा आदयो येषा ते इत्यादयः । इत्यादिभिर्जनार्दनादन्यत्र जगति नियतैः साक्षादेव वाचका इति लोकतो निश्चितैरपि तत्तच्छब्दैः स भगवानेक एव मुख्यतयोदितः[3] । तदेतत् पादोक्तयुक्तिसमुदायेन निश्चीयते ॥ ० ॥ ० ॥ ० ॥

सौत्रस्य द्विर्वचनस्य कृत्यं[3] द्योतयन्नध्यायार्थमपि[4] निगमयति – "अतोऽनन्तगुणो यच्छब्दा योगवृत्तयः" इति । अध्यायोक्तयुक्तिभिः परममुख्यार्थो नारायणः सर्वशब्दानामिति यत्, अतोऽनन्तगुणगणपरिपूर्णमहार्णवः स भगवानिति निश्चीयते । तावता तन्निश्चयः कुत इति चेत्, अनन्तानामपि शब्दराशीनां

---

1 यत. भाष्यपद "एष ह्येव शून्य एष ह्येव तुच्छ एष ह्येवाभाव" इत्यादिश्रुतिगदितसकलोपलक्षणम् । तदर्थमेव श्रुतेराद्य नामाऽदत्त ।

2 त्विति जगतो वैलक्षण्यम्, हीति पुनः श्रुतिप्रसिद्धिमित्यादि ।

3 कृत्यमवधारणरूपम् ।

---

१ "शून्यविताना(?)(नाशा)दिशब्दै–" क. ख. घ.

२ "पाद निग–" क.

३ "–दिल । पादोक्त–" ख

४ "–थं निगमयति" ख.

तत्तद्गुणयोगादेव तस्मिन् वर्तमानत्वात्[1] । "गुणाः श्रुता."[2] (सौपर्ण०) इत्यादिश्रुते[1] ॥ ० ॥ ० ॥ ० ॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचितस्य
श्रीब्रह्मसूत्रसंग्रहभाष्यस्य टीकाया
त्रैविक्रमार्यदासकृतावानन्दमालाया
प्रथमोऽध्यायः

---

1 गुणयोगादेव शब्दाना प्रवृत्ति । यत्र गुणयोगोऽधिकस्तत्र ते मुख्या । भगवति निरवधिको गुणयोग इति स एव परममुख्यार्थं सर्वशब्दानामिति ।

2 "गुणा श्रुता सुविरुद्धाश्च देवे सन्त्यश्रुता अपि नैवात्र शङ्का । चिन्त्या अचिन्त्याश्च तथैव दोषा श्रुताश्च नाङ्गेहि तथा प्रतीता" इत्यानुपूर्वी । इय चर्ग्वेदे सौपर्णशाखाया श्रूयत इति गीतातात्पर्ये द्वितीये स्थितम् । जाबालतिलश्रुतिरिति गीताभाष्य एकादशे स्थितम् । श्रुत्यैक्य द्वि पाठो वेति सर्वं सुसम्पन्नम् ॥ ० ॥

---

१ "इत्यादिश्रुति" ख

॥ द्वितीयाध्यायः ॥

ॐ॥ प्रथमाध्याये सर्वेश्वरो विष्णुरनन्तशब्दो[1]क्तानन्तगुण साधित । तत्र सर्वप्रकारविरोध[1] परिहरत्यस्मिन्नध्याये । प्रथमपादे युक्तिविरोधम्[2] ।

युक्त्युपजीव्यस्मृतिविरोध परिहरन् "स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्य-स्मृत्यनवकाशदोषप्रसङ्गात्" (२ १ १) इत्यधिकरण व्याख्याति—"श्रौत स्मृतिविरुद्धत्वात् स्मृतयो न गुणान् हरेः । निषेद्धु शक्नुयुः" इति । पाशुपतादिस्मृतयो रुद्रादीना सार्वज्ञ्यादिगुणविधितत्परास्तदन्येषा तान् निषेधन्तीति[3] चेत् ता अपि हरेर्गुणान् निषेद्धु न शक्नुयु । श्रुत्यनुसारिणीभि-र्व्यासादिस्मृतिभिर्विरुद्धत्वात् । प्रत्युत व्यासादिस्मृतय एव रुद्रादिगुणान्[2] निषेधन्ति[4] । श्रुतिविरोधात् तासामेवाऽभासत्वोपपत्ते[5] ।

---

1 अलौकिकेऽर्थे प्रत्यक्षस्याप्रसराद् द्विविधस्तावदत्र विरोध शक्यप्रसर । अनुमानेन च, आगमेन च । स चैकैकोऽपि पुनर्द्वेधा भवति । केवलेनानुमानेन, अनुमानप्रचुरेण च समयप्रतिकर्मणेति प्रथम । केवलया श्रुत्या, युक्ति-सहमत्या चेति द्वितीय । सोऽय सर्वोऽपि प्रकारश्चतुर्भि पादैर्निरस्यते । तत्र प्रथमतो युक्तिविरोध । तत्रापि प्रथमत आगममूलतया प्रतीयमाना अपि काश्चन स्मृतयोऽनुमानकशेरुका एवेत्यावेदयितु प्रथमतो युक्त्युप-जीव्यस्मृतिविरोध परिह्रियते ।

2 रुद्रादीना सार्वज्ञ्यादिगुणान् ।

---

१ "—शब्दोक्तोऽनन्त—" क
२ "—विरोध परिहरति ।" ग
३ "निषेधयन्तीति" क
४ "निषेधयन्ति" क
५ "—पत्ते । तासु श्रुतफल—" घ

किञ्च, तासु स्मृतिषु [1]श्रुतफलसम्बन्धिन्यव्यभिचारित्वबुद्धिश्चान श्रौतस्मृति-रुक्ता[1] । तद्विरुद्धत्व नाम तासूक्तफलव्यभिचारित्वम् । तेन च तासामप्रामाण्यमेव सुसाधम् । अतो नेष्टानिष्टविधिनिषेधस्तासामस्ति । उपजीव्यविरोधादाभा-सत्वसम्मते ।

"एतेन योग प्रत्युक्त" (२ १ ३)इति सूत्रार्थोऽप्येव[2] व्याख्यात ॥०॥ १ ॥०॥

वेदानामप्युक्तफलव्यभिचारदर्शनादप्रामाण्य समानमित्यत आह—"न विलक्षण-त्वादस्य तथात्व च शब्दात्" (२ १ ४)इत्यधिकरणम्। "वेदा नित्यत्वान्मान-मुत्तमम्" इति । नचेतरस्मृतिवद् वेदानाममानत्वम् । ताभ्यो[2] विलक्षणत्वात् । नह्यत्र फलोपलब्धिरेव प्रामाण्यस्थापिका । किन्तु[3] अज्ञानमूलत्वादिदोष-राहित्यमेव । तच्च "नित्यत्वात्" इत्युक्तमार्थात् सिद्धम् । नित्यत्व च शब्दादेव प्रतीयते । अतो वेदा प्रमाणमेव भवन्ति । शब्दादिष्वनुप्रमाणेषु वेदप्रमाणस्य प्रत्यक्षानुमानाभ्यामाधिक्यविवक्षया "उत्तमम्" इति विशेषणम् । यथार्थज्ञानस्य केवलस्यैव ततोऽप्युत्तमत्वात् । अथवा, इतिहासादिश्रौतस्मृत्याख्या पौरुषेय-वेदा अपैकनित्यत्वान्मानम् । ऋगाद्या केवलवेदा शब्दार्थोभयनित्यत्वादुत्तम मानमिति विशेष ।

---

1 श्रुत यत् फलम् । तत्सम्बन्धिनी श्रौती या स्मृतिर्ज्ञानम् । "स्मृति स्मरण-धीच्छासु" इत्यभिधानात् पूर्वकालसम्बन्धग्रहणेन ज्ञानमात्रमपि स्मृति-पदेनोच्यते । विशिष्टे विशेष्यमात्रग्रहणस्य करिकलभादिषु बहुलमुप-लम्भात् । तथाच स्मृतिबोधितफलस्य प्रत्यक्षतो व्यभिचारदर्शनेन विरोधान्न प्रामाण्यम् । तथाच सूत्रम्—'इतरेषा चानुपलब्धे" (२ १ २) इति । तदेतदाह—किञ्चेत्यादि ।

2 फलव्यभिचारदर्शनादेव ।

---

१ "—रुक्ता । अतस्तस्या प्रत्यक्षविरुद्धत्व च श्रौतस्मृतिविरुद्धत्वम् । दृष्ट-फलव्यभिचार इति यावत् । तेन च तासामाभासत्वादिष्टानिष्टविधि-निषेधयोराभासत्वमेव स्यात् । एतेन योग —" क ख

२ "तेभ्यो विल—" क

नच वेदोक्तफलव्यभिचार. । अधिकारतो दर्शनात्[1] । स्वत एव वेदनाद् वेदा[1] इति तत्प्रामाण्य च स्वत[2] एवेत्यावेदितम् ॥ ० ॥ २ ॥ ० ॥

ननु "आपोऽब्रुवन्" (शत०ब्रा० १ १ ३) इत्यादिवचनमचेतनाना[3] वक्तृत्व वक्ति । तच्च, आपो[4] वक्तव्यो न भवन्ति, अचेतनत्वादित्यादियुक्तिविरुद्धम् । तस्माद् वेदवचोऽपि क्वचिदयुक्तार्थवादित्वा[5]दमानमित्यत आह — "अभिमानि-व्यपदेशस्तु विशेषानुगतिभ्याम्" (२ १ ६) इत्यधिकरणम् । "देवतावचनाच्चाऽऽपो वदन्तीत्यादिना वचः । नायुक्तयादि" इति । तत्र ह्यभिमन्यमाना अचेतनरूपा आपो न वदन्तीत्युच्यन्ते[2] । कुत ? तदभिमानिदेवतावचनात् । अस्य[6] पदस्यार्था उच्यन्ते[7] — देवतावत्क हि तद्वचनम्, देवतानामेव वक्तृत्वमिति हि विद्वद्वचनम्, देवताविषय ह्यवादिशब्दैर्मुख्यतो वचनमित्यादिना विषयविभाग-न्यायेन निरूप्यमाणे सति [8]युक्तार्थवादित्वावगमाद् वेदवचो नायुक्तार्थं वक्ति । उक्तप्रकारेण निर्दोषत्वात् । "ग्रावाण प्लवन्ते" ( ) इत्यादावप्येवमेव द्रष्टव्यम्[3] ॥ ० ॥ ३ ॥ ० ॥

---

1 तथाच सूत्रम् — "दृश्यते तु" (२ १ ५) इति । इदमपि नित्यत्वादित्युदित-प्रायम् । अधिकारे सति फलस्य नित्यत्वानियतत्वादिति । "नित्य नियतमेव च" इति ह्यभिदधति ।

2 वदन्तीति नोच्यन्त इत्यन्वय । किन्त्वभिमानिदेवता एव वदन्तीत्युच्यन्ते ।

3 'दृश्यते च" इति द्वितीयमूत्रमपि देवतावचनादिति व्याख्यातम् । क्रीडा-व्यवहारादिशक्तिमतीना देवतानामेव वेदेषु वचनात् । तासा च वचन-सामर्थ्यदर्शनात् ।

---

१ "वेद इति" ख
२ 'स्वत इत्यादे —" क ख घ
३ "— मचेतनानामपि वक्तृत्वम्" ग
४ "आपो न वक्तव्य , अचे —" क
५ "— वाचित्वा —" ग
६ "तस्य" ग
७ "— स्वार्थं उच्यते ।" ख
८ "उक्तार्थं —" क

"असदेवेदमग्र आसीत्" (छन्दो० ३.१९ १.) इत्यादावसत् कारणमुच्यते । प्रलये तावत् कार्यस्यासत्त्वात् कारणमप्यसद् भवितुमर्हति वस्तुत्वादित्यत[१] आह—"असदिति चेन्न प्रतिषेधमात्रत्वात्" (२ १ ८) इत्यधिकरणम् । "असत्तेव कारणं दृश्यते क्वचित्" इति । नैव क्वचिद् देशे काले चासत् कारण वेदेदृश्यते । नापि प्रत्यक्षेणानुमानेन वा । विपर्ययदर्शनात् । असत् कारण न भवति, असत्त्वात्[1], वन्ध्यापुत्रवदित्यादिना निषिद्ध च । यिमत नासत्कारणकम्, कार्यत्वात्[२], घटवदिति वा । नह्यसत्कारणक किञ्चित् कार्यं क्वापि दृष्टम् । [2]नचात्यन्तासन्मनोमात्रमपि कुर्वद् दृष्टम् । नच युक्तम् । चेतनत्वेन[3] भावत्व-प्रसङ्गात्[3] ।

तर्ह्यमनस्कमेवासत् कारणमस्तु । नो चेत् जीव प्रधान वा भवतु । तेषामपि

---

1 पूर्ववादिनोऽभिमत्र विमतमकारणम्, असत्त्वात् प्रतिषेधमात्रत्वात्, धर्म्यात्मनाऽभावत्वनैयत्यात् । "धर्मिणोऽभावरूपत्व मात्रशब्देन विविक्षितम्" इति हि तत्त्वदीपिका । अत्र तु तत्त्वदीपिकादिरीत्या अत्यन्ता-सदेव कारणत्वेन पूर्वपक्षितम् । चन्द्रिकादौ तु प्रागभावो ह्यसदिति व्यवक्ष्यत । "सर्वधर्मरहितत्वस्यासद्वादिनाऽभ्युपगमात्" इति सन्याय-रत्नावळौ चात्रात्यन्तासदेव कारणत्वेन पूर्वपक्षयति।

2 अत एव च "तदसदेव सन्मनोऽकुरुत" इति श्रुतिं मनसि कुर्वन्नाह—नचात्यन्तासदित्यादि ।

3 "नैव दृश्यत" इति वदता भगवता श्रुतिमूलत्वविरहात् परपक्षप्रापिता सर्वा अपि युक्तय श्रुतिविरोधभग्नसक्थय सर्वथाऽनुत्थानमेवार्हन्तीति पराकृतप्राया एव । तथाच सूत्राणि—"अपीतौ तद्वत् प्रसङ्गादसमञ्जसम्" (२ १ ९), "नतु दृष्टान्तभावात्" (२ १ १०), 'स्वपक्षदोषाच्च" (२ १ ११), 'तर्काप्रतिष्ठानादप्यन्यथाऽनुमेयमिति चेदेवमप्यनिर्मोक्ष-प्रसङ्ग" (२ १ १२) इति । अत्र "नासतोऽदृष्टत्वात्" (२ २ २६) इत्युत्तरपादीयमप्यधिकरण 'नैव दृश्यत' इति स्फुट कटाक्षितम् ।

---

१ "वस्तुत्वात् घटवदित्यत—" ख २ "कार्यत्वादिति वा" ग
३ "चेतनत्वे भावत्व—" क

युक्ते· । "अकस्माद्धीदमाविरासीत्"[1] ( ) इत्यादेर्जगदाकस्मिक सत्त्वम्,[1] सत्त्वात्, ब्रह्मवत् । "जीवाद् भवन्ति भूतानि" ( ) इत्यादेर्जीवकर्तृकम्, कार्यत्वात्, घटवत् । "प्रधानादिदमुत्पन्नम्" ( ) इत्यादेरचेतनकर्तृकम्, अचेतनत्वात्, दध्यादिवदित्याद्या शिष्टापरिग्रहा अप्यत्र निराकृता:[2] । तथाच भाष्यार्थो उच्यन्ते – अमनस्कमप्यसन्नेव कारण प्रमाणंदृश्यते । "य. सदोष.[3] –" (कापायण०) इत्यादिश्रुतेर्जीवस्तु सदोषत्वादसन्नित्युच्यते । सोऽपि नैव स्वतः कारण ज्ञायते । अस्वातन्त्र्यानुभवात् । अचेतनमपि[2] नीचत्वेन निन्द्यत्वादसदिति गदितम् । तच्च जगतो निमित्तकारण न श्रूयते । यच्च पुनस्तैस्तैरीदृशमुत्प्रेक्ष्य-[3] माण नानावस्तु तच्च असदभद्रम् । नह्यज्ञ[4]प्रलपित कारणमिति विद्वद्बुद्धौ

---

1 न चस्मादपि कारणाद् यस्य सत्त्वम् । किन्तु? स्वत एव ।

2 तथाच सूत्रम् – "एतेन शिष्टापरिग्रहा अपि व्याख्याता" (२ १ १३) तथाह्यत्र भाष्योदाहृता श्रुतय – "अकस्माद्धीदमाविरासीदकस्मात् तिष्ठत्यकस्माल्लयमभ्युपैति" इति, "प्रधानादिदमुत्पन्न प्रधानमधितिष्ठति। प्रधाने लयमभ्येति नह्यन्यत् कारण मतम्" इति, "जीवाद् भवन्ति भूतानि जीवे तिष्ठन्त्यचञ्चला । जीवे तु लयमृच्छन्ति न जीवात् कारण परम" इति च ।

3 "अथ य सदोष साञ्जन· सजनि स जीव" इत्यानुपूर्वी । "स्वपक्ष-दोषाच्च" (२ १ ३०) इति सूत्रभाष्ये समुद्धृता श्रुतिरियम् ।

---

१ " – रासीदकस्मात् तिष्ठति" इत्या – " ख.

२ "अचेतनोऽपि" क. ख

३ "पुनस्तैस्तैरुत्प्रेक्ष्य – " क.

४ "नह्यसत्प्रल – " ग.

प्रतीयते । पूर्ववादोक्तहेतवश्च[1] सर्वे कालात्ययापदिष्टा । प्रतिसाधन च प्रत्येक समस्ति । असदादिकमजगत्कारणम्, अस्वेच्छाधीनत्वात्[2], जीवप्रधानादिवदित्यादि[3] । अपिच, [4]विमतमनाकस्मिकसत्त्वम्, कार्यत्वात्, घटादिवत्; विमतमजीवकर्तृकम्,[5] घटाद्यतिरिक्तकार्यत्वात्, दु खविशेषवत्, विमत [6]नाचेतनमुख्यकर्तृकम्, अतस्मिन्निमित्तकत्वात्, इच्छादिवदित्यादिक च प्रतिसाधन बोद्धव्यम् । श्रुत्यादिमूलत्वात् ।

[1]एव चेदसदादिश्रुतीना का गतिरित्यत आह – "असज्जीवप्रधानादिशब्दा ब्रह्मैव नापरम् । वदन्ति कारणत्वेन क्वापि" इति । असदादिवादिभिरुपन्यस्तश्रुतिषु पठ्यमाना असज्जीवप्रधानादिशब्दा सर्वेऽपि विष्ण्वाख्यमेक ब्रह्मैव कारणत्वेन वदन्ति । अपर तेरुत्प्रेक्षितमसदादिक कारणत्वेन न वदन्ति । सर्वमानविरोधोक्ते । तयाऽपि क्वचिदविरोधे मुख्यार्थानन्तरममुख्यमपि लोकरूढ यथायोगमधर्मेण वदन्ति । तदेतत् "कारणत्वेन" इति विशेषणसामर्थ्यादवगम्यते । [2]अकशब्दस्त्वसच्छब्दग्रहणाद् गृहीत । आदिशब्दात् – "कर्मैव देहदैविक मानुष वा –" ( ) इत्यादिवाक्यगता कर्मादिशब्दाश्च ब्रह्मैव परम कारण वदन्ति । अन्यस्यामुख्यत्वात् ॥ ० ॥ ४ ॥ ० ॥

---

1 असज्जीवेत्यादिभाष्येण पूर्वाध्यायोक्त विस्मृत्य पृच्छतस्तदेव स्फोरयती-त्याह – एवमित्यादि ।

2 "अक , न कोऽपि, सर्वतो विलक्षण इत्यर्थ" इति तत्त्वदीपिका ।

---

१ "हेतवश्च काला –' क

२ "अस्वेच्छानियतत्वात्" ग

३ " – प्रधानवदित्यादि" ग

४ ' विमतमनाकस्मिक सत्, कार्यत्वात्, पटादिवत्, विमतम्" ग

५ न जीवकर्तृकम्" ग

६ ' विमतमनचेतन – " घ

"भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत्" (२ १ १४) इति सूत्रम् । "पूर्णगुण" इति । सुखदु खादिभोक्तुर्जीवस्य स्वातन्त्र्यादिगुणराहित्यादेव हि कारणत्व निषिद्धम् । परस्यापि तदेकीभावोक्ते कारणत्वासम्भव इति चेत्, न । स्यानाद्य-भेदवचनेऽपि लोकवत् स्वरूपभेदोपपत्ते. । अत सृष्टयादिषु कारणभूतं स्वातन्त्र्यसार्वज्ञयादिभि स्रष्टृत्वादिभिश्च प्रत्येकमपि पूर्णगुणं पूर्णतमो भारायण इति न तत्कारणत्वे कश्चिद् विरोध ॥ ० ॥ ५ ॥ ० ॥

"तदनन्यत्वमारम्भणशब्दादिभ्य" (२ १.१५.) इत्यधिकरणम् । "हरि" इति । यद्यपि तत्तत्प्रवर्तन[1] स्वातन्त्र्यसार्वज्ञयादिप्रकृष्टगुणविशिष्ट एव सृष्टयादौ निमित्तमिष्ट । तथाऽपि तत्तत्कार्यकरत्वाद्य[2]नन्याधीनगुणयुक्त नानासाधनमेव तन्निर्वाहकमिति न मन्तव्यम् । किन्तु? तत्तत्कार्यकरत्वाद्यगणितगुणगणपरि-पूर्णत्वेन निर्वाहकोऽपि हरिरेव सुश्रुत[1] । अतन्नियतस्य द्रव्यादे साधनस्य सर्वत्रानुपलभ्यत्वात् ॥ ० ॥ ६ ॥ ० ॥

---

1 एतेन पूर्णगुण इत्यत्राप्यावर्तनीयम् । स्वातन्त्र्यादिगुणपूर्ण इति । 'परतन्त्रो ह्यपेक्षेत स्वतन्त्र किमपेक्षते इति ह्युक्तम् । हरिरिति विशेष्यपदेनैतामपि श्रुतिं स्मारयति—"असत्यमाहुर्जगदेतदज्ञा शक्ति हरेर्यें न विदु परा हि" इति । तथाच हरिरेवेति सावधारणत्वादस्य तदन्यसाधानाभाव "भावे चोपलब्धे' (२ १ १६) इति सूत्रित सूचितो भवति । हरिरिति च श्रुतिस्फोरणेन तदधीनसाधनसद्भावसूचनात् 'सत्त्वाच्चावरस्य" (२ १ १७) इति च गदितात्रायम् । "नामदासीत्' इति च पूर्णगुणोऽन्यो नास्ती-त्युच्यते । पारतन्त्र्यादितरसाधनानाम् । तथाच सूत्रम्—"अमढ्यपदेशा न्नेति चेन धर्मान्तरेण वाक्यशेषात्" (२ १ १८) इति । एव "युक्ते शब्दान्तराच्च' (२ १ १९), "पटवच्च' (२ १ २०), "यथा प्राणादि' (२ १ २१) इत्यवशिष्टान्यप्यधिकरणसूत्राण्यनयैव दिशा सुतरामनु सन्धेयानीति न वहु व्याघुष्यते ।

---

१ "—प्रवर्तमान—" क "—प्रवर्तके स्वा—" ख

२ "—करत्वादनन्या—' क

नन्वेवमपि जीवस्य स्वतः कर्तृत्वं स्वानुभवसिद्धमित्यत आह—"इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः" (२.१.२२.), "कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा" (२.१.२७.) इत्यधिकरणे[1]। "स्वातन्त्र्यात्" इति। हरिरेव जीवेऽपि सर्वंस्वातन्त्र्यात् तद्गतकार्योपसंहरणादिगुणैः सुपूर्णः, निरंशत्वेऽप्येकदेशप्रवृत्ति-[1] करत्वाद्याश्चर्यगुणपूर्णश्च। जीवस्य तु स्वहिताकरणादिदोषैरस्वातन्त्र्यदर्शनादकर्तृत्वम्[2] ॥ ० ॥ ७ ॥ ८ ॥ ० ॥

ईश्वरस्यापि[2] सृष्ट्यादौ प्रयोजनाभावादकर्तृत्वमित्यत आह—"न प्रयोजनवत्त्वात्" (२.१.३३.) इत्यधिकरणम्। "सर्वकर्तृत्वात्" इति। अल्पकर्तॄणां हि लोके स्वप्रयोजनपरत्वात् तदभावे कर्तृत्वासम्भवः। आप्तकामतयाऽनिच्छोः

---

1 अत्रैवं हृषीकेशतीर्थादिसम्मतः प्राचीनपाठक्रमः। "इतरव्यपदेशात्—" इत्यादि "देवादिवदपि लोके" (२.१.२६.) इत्यन्त पञ्चसूत्री एकमधिकरणम्। "कृत्स्नप्रसक्तिः—" इत्यादि "विकरणत्वान्नेति चेत् तदुक्तम्" (२.१.३२.) इत्यन्त षट् सूत्राण्यपरमिति द्वे अधिकरणे। इतरव्यपदेशादित्येकमेव सूत्रमेकमधिकरणम्। अपरे च द्वे अधिकरणे इति तत्रैव विवक्षाभेदेन पक्षान्तरम्। प्राचीनानामयं पन्थाः। ततोऽर्वाचीनैर्जयतीर्थादिभिस्त्वन्यथाऽप्यधिकरणमारचितम्। आनन्दमालावृत्तु प्रतनमेव पन्थानमनुपपातेति स्फुटम्।

2 अत्र "स्वातन्त्र्यात् पूर्णगुणो हरिः" इति वक्तव्यम्। तथाच सूत्रम् "अधिकं तु भेदनिर्देशात्" (२.१.२३.) इति। स्वातन्त्र्यादेव कर्तृत्वमिति वदता जीवस्य तद्विपर्ययोऽपि कथित एव। तत्रापि सूत्रम्—"अस्मादिवच्च तदनुपपत्तिः" (१.१.२४.) इति। "उपसंहारदर्शनान्नेति चेत् क्षीरवद्धि" (२.१.२५.) इति च। "देवादिवदपि लोके" (२.१.२६.) इति च

---

१ "—देशावृत्ति—" क.

२ "ईशस्यापि" क. ख. घ.

प्रयोजनाभावेऽपि कर्तृत्वमविरुद्धम् । अतदर्थत्वात् । आप्तकामत्वे च [1]कुत' कर्तृत्व सुवचमिति चेत्, सुखोद्रेकनिमित्तादेव सर्वप्रवर्तनकर्तृत्वात्[1] ॥ ० ॥ ९ ॥

"वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथा हि दर्शयति"[2] (२ १.३५.) इत्यधिकरणार्थश्चैतेनैव[2] सुगृहीत । तथाहि – नच सर्वकर्तृत्वे वैषम्यादिदोषो विष्णोः शङ्क्य । गुणदोषादेरपि सर्वस्य स्वयमेव कर्तृत्वात् । नह्यात्मनि दोषापादनेच्छा कस्यचिद्[3] भवति ॥ ० ॥ १० ॥ ० ॥

"दृश्यत्वाद्युज्झित", "पूर्णगुण" इत्यादिना बहुशो व्याख्यातम् । अथ द्वितीयाधिकरणे "श्रुतेस्तु शब्दमूलत्वात्" (२ १ २८), "आत्मनि चैव विचित्राश्च हि' (२ १ २९), "स्वपक्षदोषाच्च" (२ १ ३०), "सर्वोपेता च तद्दर्शनात्" (२ १ ३१), "विकरणत्वानेति चेत् तदुक्तम्" (२ १ ३२) इत्येतानि च सूत्राणि "पूर्णगुण" इति व्याख्यातानि । विरुद्धतया प्रतीयमानैरपि विचित्रै जीवेऽसम्भावितै सर्वैरप्यपाणिपादत्वादिभि गुणै पूर्ण इति सर्वोपसग्रहात् ।

1 तथाच सूत्रम् – "लोकवत्तु लीलाकैवल्यम्" (२ १ ३४) इति ।

2 "वैषम्यनैर्घृण्ये न सापेक्षत्वात् –" इति सूत्रमारभ्य आपादान्त पठितानि – "न कर्माविभागादिति चेन्नानादित्वात्" (२ १ ३६), "उपपद्यते चाप्युपलभ्यते च" (२ १ ३७), "सर्वधर्मोपपत्तेश्च" (२ १ ३८) इत्यन्तानि चत्वारि सूत्राण्येकमधिकरणमिति प्राचीनाना मतमनुसृत्येदमुदितम् । अन्त्यमेक सूत्र पथगधिकरणमिति तु जयतीर्थादय । अधिकरणार्थ स्फुट ।

---

१ "–कामत्वेन कृत" ग

२ "–णार्थश्च तेनैव" क ख

३ "कस्यापि सम्भवति" ग

पादार्थं निगमयति—"नायुक्तं तद् वदेच्छ्रुतिः" इति । उक्तमार्गेण निरूप्यमाणे सति युक्तियुक्तार्थवादिनी श्रुतिरिति यत् तत् तस्मादयुक्तार्थं सा न वदेत् । अतो ये ते विष्णोः श्रुत्युदितानन्तगुणाः प्रथमाध्यायसाधितास्तेषां न कश्चिद् युक्तिविरोध इत्यर्थः ॥ ० ॥ ० ॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचितस्य
श्रीब्रह्मसूत्रसग्रहभाष्यस्य टीकाया
नैविक्कमार्यदासकृतायानन्दमालाया
द्वितीयाध्यायस्य प्रथमः पादः

॥ द्वितीयाध्यायस्य द्वितीय पादः ॥

ॐ॥ [1]नारायणपरायणस्य स्वसमयस्य परसमयविरोधमाशङ्क्य परिहरत्यस्मिन् पादे ।

"रचनानुपपत्तेश्च नानुमानम्" (२ २ १) इत्यारभ्य' "उत्पत्त्यसम्भवात्" (२ २ ४२) इत्यन्तानि पादाधिकरणानि व्याख्याति—"भ्रान्तिमूलतया सर्वसमयानामयुक्तितः । न तद्विरोधाद् वचन वैदिकं शङ्कयतां व्रजेत्" इति । साङ्ख्यपूर्वका शावतेयपर्यन्ता परकीयसमया सर्वेऽपि भ्रान्तिमूलतया वर्तन्ते । यतो न युक्तिमूला श्रुतिमूला[2] वा लक्ष्यन्ते । अतस्तद्विरोधेऽपि

---

1 द्वितीयपादे तावदयमधिकरणक्रम । निरीश्वर साङ्ख्य विन्ध्यमूल प्रथमाधिकरणेन निरस्यते। सेश्वरस्तु पतञ्जलिमूल द्वितीयेन। साङ्ख्यत्वसाम्येनोपस्थापिते सेश्वरे निरस्ते निरीश्वरत्वसाम्येनोपस्थापितो लोकायतस्तृतीयेन निरासि । पुनरपि द्वाभ्या चतुर्थपञ्चमाभ्या साङ्ख्यावेव द्विविधौ, पुरुषोपसर्जनप्रकृतिकर्तृत्ववादी, प्रकृत्युपसर्जनपुरुषकर्तृत्ववादी चेति । ततश्च वैशेषिकसमय षष्ठेन। ततश्चतुर्विधपु बौद्धेषु वैभाषिका सौत्रान्तिकाश्च सप्तमेन, माध्यमिका अष्टमेन, वैज्ञानिका नवमेन क्रमाद् पास्ता । दशमेन चाधिकरणेन स्याद्वादी जैन प्रत्यक्षेपि । पाशुपत शाक्तश्चैकादशद्वादशाभ्यामिति । तदेव द्वादशस्वधिकरणेषु निरूपित युक्तिनिकुरम्बै श्रुतिकदम्बसावलम्बै साङ्ख्यादिशाक्तेयान्तसर्वसमयाव नामयुक्तितो वैदिकवचनाना प्रामाण्य निरावाधमिति सर्वपादसारमन्नाऽचार्यपाद श्लोके सङ्गयन्थेत्याह—नारायणेत्यादिना ।

---

१ "—इत्य 'असम्भवात्" इत्यन्तानि' क ख

२ "—मूला लक्ष्यन्ते" क ख

यदगतं वेदानुकूलं स्मृतिगतं वा वचनं प्रमाणविरुद्धमिति न शङ्क्यम्[1] । तेषामनुभाभासत्वेन प्रामाण्यानुपपत्तेः । वैदिकवचनस्योत्तममानत्वोक्त्या च तदन्तरविरोधाभावोऽवसीयते ॥ ० ॥ १-१२ ॥ ० ॥ ० ॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचितस्य
श्रीब्रह्मसूत्रसंग्रहभाष्यस्य टीकाया
त्रैविक्रमार्यदासकृतावानन्दमालाया
द्वितीयाध्यायस्य द्वितीयः पादः

---

१ "शङ्क्यम् । आभास—" क.

॥ द्वितीयाध्यायस्य तृतीयः पादः ॥

ॐ॥ जीवजडज्ञनार्दनेषु[1] श्रुतीना परस्परविरोध परिहरत्यस्मिन् पादे । स्वसमयेऽपि पूर्वापरार्यविरोधस्य परिहरणीयत्वात् ।

"न वियदश्रुते"[2] (२ ३ १), "एतेन मातरिश्वा व्याख्यात" (२ ३ ८), "तेजोऽतस्तथा ह्याह" (२ ३ १०), "आप" (२ ३ ११), "पृथिव्यधिकार-रूपशब्दान्तरादिभ्य" (२ ३ १२), "ज्ञोऽत एव" (२ ३ १८) इत्येतानि तत्तद्वस्तूत्पत्त्यधिकरणानि व्याख्याति—"आकाशादि समस्त च तज्जम्" इति । [3]अव्याकृतव्याकृताकाश[1]दिक[2] समस्तमपि पुरस्तात् प्रस्तुताद् विष्णोरेव[3] जातम् । सूक्ष्मत्वेन प्रकाशमाना प्रकृतिपुरुषकालवेदाश्चा[4]ऽकाश-

---

1 अल्पाच्तरत्वाज्जीवजडयास्तयोरभ्यर्हितत्वाच्च जीवस्य पूर्वनिर्देश ।

2 "न वियत्—" इत्यादीनि सप्त सूत्राणि प्रथममधिकरणम् । 'एतेन—" इत्येक द्वितीयम् । "तेजोऽत—" इत्येक चतुर्थम् । "आप' इत्येक पञ्चमम् । "पृथिवी—" इत्याद्येक षष्ठम् । "ज्ञोऽत एव" इत्येव दशमम् । एतान्यत्र व्याख्यायन्ते । तृतीय सप्तमाष्टमनवमानि चोपरितनभाष्येणानुपदमेव ।

3 एतेनानुत्पत्तिवचनानामव्याकृताकाशविषयत्वमिति न्यायविवरणमपि प्रौढिवादेन प्रवृत्तमित्युदित भवति । 'पराधीनविशेषवस्त्वमात्रविषयत्व चेति व्यवस्था" इति तत्रैव स्फुटवचनात् ।

4 तदभिमानिनो देवाश्च । तथाह्यनुव्याख्यानम्—"प्रकृति पुरुष कालो (देवा)वेदास्तदभिमानिन । महदाद्याश्च जायन्ते" (२ ३ ९) इति । "प्रकृति पुरुष कालस्त्रय एते विभागत । चतुर्थस्तु महान् प्रोक्त पञ्च-

---

१ 'अव्याकृताकाशा—" ग

२ "—दि समस्त—" ख

३ 'विष्णोर्जातम्" ब

शब्देन यथायोग सगृह्यन्ते । आदिशब्देन महदाद्या वाय्वाद्याश्चोच्यन्ते । सर्वेषामपि पराधीनविशेषाख्योत्पत्तिसम्भवात् । अत एवाऽकाशाद्यभिमानि-देवताश्चाऽकाशादिशब्दैर्गृहीताः ।

नच नित्यत्वान्यथानुपपत्त्याऽनुत्पत्तिमत्त्व प्रकृत्यादे. शङ्क्यम् । सर्वसृष्टिप्रतिज्ञा-न्यथानुपपत्त्या नित्यस्यापि नारायणाद् विवक्षितविशेषावाप्तिमात्रेण[1] जनन श्रुतम्, अविशेषादिति[2] वक्तुम् "समस्त च" इति विशेषणम्[1] । चशब्दाद् भौतिक च तत एव[3] जातम् ॥०॥ १ ॥ २ ॥०॥ ४ ॥ ५ ॥ ६ ॥०॥१०॥०॥

"तदभिध्यानादेव तु तल्लिङ्गात् स." (२.३.१३), [2]"विपर्ययेण तु क्रमोऽत उपपद्यते च" (२ ३ १४.) इत्यधिकरणे । "तेनैव लीयते" इति । यतो विष्णोरे-

---

माऽहङ्कृतिर्मता । तद्विभागेन जायन्त आकाशाद्या पृथक् पृथक्" (२ ३ ७) इति च भाष्ये । "प्रकृति पुरुष काल इति श्रीभूदुर्गा" इति तत्त्वदीपिका ।

1 समस्त च तज्जमिति "इद सर्वमसृजत" इति श्रुतिमर्यतो गृह्णाति । तेन तस्या श्रुतौ श्रुताया सर्वसृष्टिप्रतिज्ञाया हानि "प्रतिज्ञाहानिरव्यतिरेका-च्छब्देभ्य" (२ ३ ६) इति सूत्राभिप्रेताऽपि व्याख्याता भवति । एतेन "अस्ति तु" (२ ३ २), "गौण्यसम्भवात्" (२ ३ ३), "शब्दाच्च" (२ ३ ४), "स्याच्चैकस्य ब्रह्मशब्दवत्" (२ ३ ५), "यावद्विकार तु विभागो लोकवत्" (२ ३ ७) इत्यवशिष्टान्यपि प्रथमाधिकरणसूत्राणि यथासम्भव सूचितार्थानि ।

2 "तदभिध्यानादेव—" इत्येक सूत्र सप्तममधिकरणम् । "विपर्ययेण—" इत्यादि त्रीणि सूत्राण्यष्टममधिकरणम् । अय भाष्यपक्ष । न्यायविवरण-पक्षे तु "अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात्" (२ ३ १५), "चराचरव्यपाश्रयस्तु स्यात् तद्व्यपदेशो भाक्तस्तद्भाव-भावित्वात्" (२ ३ १६) इति द्वे सूत्रे अधिकरणान्तरम् । तदनुसारेण च टीकान्तरप्रवृत्ति ।

---

१ "—वाप्तिजननम्" क २ "अविरोधादिति"—घ
३ "एव जातम्" क ख घ.

भूताद्यनित्यत्ववत् साक्षादुद्भव । अप्राकृतत्वात्, नित्यत्वाच्च । नापि प्रधानवत् परिणाम । वस्त्वन्तरोत्पत्तावनुपादानत्वात्, निमित्तत्वात्, चेतनत्वाच्च । नच जीववद् विकारवस्त्वभिमान । नित्यमुक्तत्वात् । अस्तु तर्हि रमावत् पराधीन कश्चिद् विशेष , नित्यमुक्तत्वेऽपि तत्सम्भवादिति चेत्, मैवम् । पूर्णस्वातन्त्र्यात्, सर्वनियन्तृत्वा(च्च । न ता[1])वदस्वाधीन किञ्चित् कर्मादिकमुत्पत्त्यादौ कारण समस्ति निमित्तमुपादान वा । तत्र प्रमाणाभावात् । पुण्यादे प्रकृत्यादेश्च भगवान् स्वयमेव हि साक्षान्निमित्तम् ।

नच विष्णोरुत्पत्तिलयोक्ति क्वचिदाशङ्कनीया । तत्र हि "अजायमानो बहुधा विजायते[2]" (तै० आ० ३ १३), "तमसि निलीन[1] व्युत्तिष्ठते—" ( ) इत्यादिना पराधीनविशेष[3]लक्षणेन [4]जन्मना पराश्रयप्रवेशलक्षणेन[5] लयेन च विनैव सर्वैश्वर्य[6]लक्षणया स्वेच्छया मदाकदाचिल्लोकदृष्ट्यपेक्षयाऽऽविर्भावतिरोभावावेव तस्योच्येते । "अजायमान" इति जन्मप्रतिषेधात् । "व्युत्तिष्ठते" नहि[7] लीयत इत्यर्थलिप्तप्रतिषेधाच्च । युज्यते तस्य तत्सम्भाविताऽविर्भावो[8] लोकजन्मविलक्षण, तथैव तादृशतिरोभावश्च । अधिकशक्तित्वात् । तस्मात् "सोऽनुत्पत्तिलय" इति सुष्ठूक्तम् ॥ ० ॥ ३ ॥ ० ॥६॥०॥

---

1 "स इद सर्वं विलाप्यान्तस्तमसि निलीनस्तद् विलाप्य व्युत्तिष्ठते स इद सर्वं विसृजति विस्थापयति प्रस्थापयत्याच्छादयति प्रकाशयति विमोचयत्येक एव" इति श्रुतिरिति भाष्ये स्थितम् ।

---

१ अत्र कोशेऽक्षराणि गलितानि यथायोग सयोजितानि ।

२ "अजायमानो विजायते" घ

३ "—विशेषत्वलक्षणेन" ख घ

४ "—लक्षणजन्मना" ग

५ "—प्रवेशविशेषत्वलक्षणेन" क घ , "—प्रवेशत्वलक्षणेन" ख

६ "स्वैश्वर्य—" क

७ "नहि विली—" ग

८ "स्तम्भादाविर्भावो—" ग

सत्[1] समस्त जातमित्युक्त तेनैव भगवता तल्लीयते, तस्मिन्नेव चेति शेष । नान्येन । तेनैव तु[2] हरिणाऽनादिरपि ससारो लीयते । किमु सादिरित्यर्थ । सोऽय लयक्रम सृष्टिक्रमाद् विपर्ययेण भवति । तथाहि – प्रच्छाखागतवाक्येन "इद क्रमादुत्पद्यते – '" (भाल्लवेय०) इत्युक्त तेनैव तदगतवाक्येनैव व्युत्क्रमाल्लीयत इत्युच्यते शाखान्तरानन्वेषणेऽपि ॥ ० ॥ ७ ॥ ८ ॥ ० ॥

अकाशादिवदीशस्यापि केनचिदुत्पत्तिलयौ [3]स्यातामित्यत आह – [2]"असम्भवस्तु सतोऽनुपपत्ते" (२ ३ ६), "नाऽत्मा(ऽ)श्रुतेर्नित्यत्वाच्च ताभ्य" (२ ३ १७) इत्यधिकरणे। "सोऽनुत्पत्तिलयः" इति । स सर्वेश्वरो विष्णु सर्वथाऽप्युत्पत्तिलयवर्जित । सर्वप्रकारेणाप्यसम्भवात् । तथाहि[3] – न तावद् दध्यादिवदीश्वरस्य पूर्वशब्दविलोपलक्षण जन्माभ्युपगन्तु पार्यते । तद्धदनिवर्त्यान्यथाभावस्याभावात् । सर्वदा सर्वरूपेषु सर्वशब्दवाच्यत्वाच्च । नच

---

1 "अत एव हि परादिद क्रमादुत्पद्यते क्रमाद् विलीयते' इति भाल्लवय शाखावचनमिति भाष्ये स्थितम् । तेनैव तच्छाखागतेनैव वाक्येन व्युत्क्रमाल्लीयते । तथाहि तद्वचनम् – 'कर्ता प्राणादिकस्यास्य हन्ता भूम्यादिकस्य च । य क्रमाद् व्युत्क्रमाच्चैव स हरि पर उच्यते' इति । व्युत्क्रमोऽपि हि क्रम एव ।

2 'असम्भव –" इति सूत्र तृतीयमधिकरणम् । "नाऽत्मा –' इति नवमम् । तथाचाऽदित दशाप्यधिकरणानि सगृहीतानि भवन्ति ।

3 तदेतत् सर्वमवगम्यते भगवत्पादवचनेनैव – 'पूर्वशब्दविलोपश्च यदि जन्म – (अनु० २ ३ २१), 'पराधीनविशेषाप्तिरनिवर्त्यान्यथाभव । क्षीरादिवद् विकार स्यात्" (१ ४ ५६), "साक्षाद् भूतस्य चोद्धव" (१ १ २०६), 'विकार एव जनन पुरुषे तद्विशेषणम्' (भा० २ ३ ६) इत्यादिना ।

---

१ 'विष्णोरेव तत्" क

२ 'हि" ख घ

३ "स्याताम् – "असम्भवस्तु – ' ख

भूताद्यनित्यत्ववत् साक्षादुद्भव । अप्राकृतत्वात, नित्यत्वाच्च । नापि प्रधानवत् परिणाम । वस्त्वन्तरोत्पत्तावनुपादानत्वात्, निमित्तत्वात्, चेतनत्वाच्च । नच जीववद् विकारवस्त्वभिमान । नित्यमुक्तत्वात् । अस्तु तर्हि रमावत परायीन कश्चिद् विशेष , नित्यमुक्तत्वेऽपि तत्सम्भवादिति चेत्, मैवम् । पूर्णस्वातन्त्र्यात्, सर्वनियन्तृत्वा(च्च । न ता[1])वदस्वाधीन किञ्चित् कर्मादिकमुत्पत्त्यादौ कारण समस्ति निमित्तमुपादान वा । तत्र प्रमाणाभावात् । पुण्यादे प्रकृत्यादेश्च भगवान् स्वयमेव हि साक्षान्निमित्तम् ।

नच विष्णोरुत्पत्तिलयोक्ति कुत्रचिदाशङ्कनीया । तत्र हि "अजायमानो बहुधा विजायते[2]" (तै० आ० ३ १३), "तमसि निलीन[1] व्युत्तिष्ठते –" ( ) इत्यादिना पराधीनविशेष[3]लक्षणेन [4]जन्मना पराश्रयप्रवेशलक्षणेन[5] लयेन च दिनैव सर्वैश्वर्य[6]लक्षणया स्वेच्छया यदाकदाचिल्लोकदृष्ट्यपेक्षमाऽऽवि-र्भावतिरोभावावेव तस्योच्येते । "अजायमान." इति जन्मप्रतिषेधात् । "व्युत्तिष्ठते" नहि[7] लीयत इत्यर्थात्लयप्रतिषेधाच्च । युज्यते तस्य स्तम्भादि-चाऽविर्भावो[8] लोकजन्मविलक्षण, तथैव तादृशतिरोभावश्च । अधिक-शक्तित्वात् । तस्मात् "सोऽनुत्पत्तिलय " इति शुष्कूक्तम् ॥ ० ॥ ३ ॥ ० ॥९॥०॥

---

1 "स इद सर्वं विलाप्यान्तस्तमसि निलीनस्तद् विलाप्य व्युत्तिष्ठते स इद सर्वं विसृजति विस्थापयति प्रस्थापयत्याच्छादयति प्रकाशयति विमोचयत्येक एव" इति श्रुतिरिति भाष्ये स्थितम् ।

---

१ अत्र कोशेष्वक्षराणि गलितानि यथायोग सयोजितानि ।
२ 'अजाममानो विजायते" घ
३ "–विशेषत्वलक्षणेन" ख घ
४ "–लक्षणजन्मना" ग
५ "–प्रवेशविशेषत्वलक्षणेन" क घ , "–प्रवेशत्वलक्षणेन" ख
६ "स्वैश्वर्यं–" क
७ "नहि विली–" ग
८ "स्तम्भादाविर्भावो–" ग

'कर्ता शास्त्रार्थवत्त्वात्" (२ ३.३२) इत्यधिकरणम्[1] । "कर्ता जीवस्तद्वशगः सदा" इति । शास्त्रे तावद् धर्माधर्मयोर्विधि प्रतिषेधश्च श्रूयते । नच तयो कर्तरि ससारिणमधिकारिणमन्तरेण[1] तत् सा (२धीय स्यात् । तस्माज्जीवोऽपि कर्ता । नच तावता विष्णोरेव सर्वकर्तृत्व-वचनविरोध शङ्क्येत । यतो जीवस्तस्य विष्णोर्वशग सन्नेव कर्ता । नच ससार एव तथा । स्त्रीभिर्वा—' (छन्दो० ८ १२ ३) इत्यादिना सदा मुक्तावपि तद्वश सन्नेव सर्वान् भोगान् गच्छति प्राप्नोतीत्युक्ते । लोकेऽपि प्रत्यक्षत एव प्रन्नरचनादिप्रवृत्तये परस्वाद्युपगमदर्शनात्, "आत्मानमेव लोक मुपासीत" (बृह० ३ ४ १५) इति श्रुतौ दर्शनाच्च तद्वत्त कर्तृत्व जीवेऽप्यस्तीति । अत एव च तस्य शक्तिविपर्ययसमाध्यभावौ युज्येते । परवशत्वात् । यथा च तक्षजीव कारयितृवशग कर्ता च लक्ष्यते तथा सर्वोऽपि जीवो भगवद्वश कर्तेति युक्तम् । 'न सन्ति यदुपेक्षया" (पैङ्गि०) इत्यादे । तत्प्रेरकत्वस्य च जीवकृतप्रयत्नापेक्षत्वान कोऽपि दोष ॥ ० ॥ १६ ॥ ० ॥

"उत्क्रान्तिगत्यागतीनाम्" (२ ३ १९), "व्यतिरेको गन्धवत् तथाच दर्शयति" (२ ३ २६), "अदृष्टानियमात्' (२ ३ ५०) इत्यधिकरणान्यप्यनेनैव भाष्यवाक्येन मुखतोऽर्थतश्च व्याख्यातानि वेदितव्यानि । तथाहि—"स एतेनैव

---

१ ऐक चत्वारिंश दशसूत्रमेकमधिकरणम् । तथाच सूत्राणि—"विहारोप-देशात्" (२ ३ ३३), "उपादानात्" (२ ३ ३४), "व्यपदेशाच्च क्रियाया न चेन्निर्देशविपर्यय" (२ ३ ३५), "उपलब्धिवदनियम" (२ ३ ३६), "शक्तिविपर्ययात्" (२ ३ ३७), "समाध्यभावाच्च" (२ ३ ३८), "यथा च तक्षोभयथा" (२ ३ ३९), 'परात्तु तच्छ्रुते" (२ ३ ४०), "कृतप्रयत्नापेक्षस्तु विहितप्रतिषेधावैयर्थ्यादिभ्य" (२ ३ ४१) इति ।

---

१ "ससारिणमन्तरेण" ख

२ इत परम् ( ) एतच्चिह्नान्तर्गत सर्वोऽप्यश सर्वत्रापि कोशेषु लुप्त । अध्येतृणा मध्येग्रन्थमध्ययनभङ्गो मा भूदिति तदनुसारेण क्वचिच्च वाक्यान्यत्र ग्रथितानि सन्ति ।

स्वात्मना –" (पौष्यायण०) इत्यादिना जीव परमात्मवश एवेममु च लोक गच्छति कर्म च कुरुत इत्यणुरेव। नहि व्याप्तस्य गमनागमने श्रूयमाणे सम्भवत । सोऽय यद्वशग स परमात्मैव हि व्याप्तोऽभिधीयते । "जीव प्राणधारणे' इति धातुपाटात्, प्राणस्य च हृदयसक्तया जीवव्यपदेनैव हृदि स्थितत्वोक्तेरवस्थिति-वैशेष्यात् चन्दनवदालोकवच्च प्रकाशव्याप्तिरपि भाषितैव। "त यथा यथेश्वर प्रकुरुते' (शाण्डिल्य०) इति श्रुतेस्तद्वशगा एवाशिनो जीवादशा पृथग् गच्छन्ति गन्धवदिति व्यतिरेकोऽपि व्याख्यात । नच प्रतिविम्ववैचित्र्ये कारणाभाव । तदधीन एव प्रतिविम्व स्वाविद्याकर्मादिवैचित्र्याद् वैचित्र्य गच्छतीत्युपपत्ते ॥ ॥ ० ॥ ११ ॥ १२ ॥ ० ॥ १८ ॥ ० ॥

"पृथगुपदेशात्" (२ ३ २७) इत्यधिकरण तु "अन्यश्च जीव्न" इति पूर्वमेव स्फुट व्याख्यातम्। अत्रापि तद्वशग इति कटाक्षयति ॥ ० ॥ १३ ॥ ० ॥

"अशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके" (२ ३ ४२) इत्यधिकरणम्। तत्र प्रथमतो जीवस्वरूपनिर्णायकानि "आभास एवच" (२ ३ ४९) इत्यादीनि सूत्राणि व्याख्याति –"तदाभास" इति। तत्प्रतिविम्व-त्वाच्च नेश्वराभेदो जीवस्य। नच तावता "ब्रह्म दाशा" ( ) इत्यादि-विरोध । यतस्तादृशा अभेदव्यवहारास्तदशत्वमेव भेदगर्भमनुमोदन्ते। "पृथ-गुपदेशात्" (२ ३ ३७) इति स्फुटवचनात्। प्रतिविम्वभूतान् दाशादीन् प्रति विम्वत्व हि नामैक्य तत्र) विहितम्, स्वातन्त्र्याद्यैक्य[1] वा। तस्मात् तदपि भेद एव प्रमाणम्।

नन्वनयोर्भेद इति धर्मस्यैकत्व धर्मिद्वित्व पर्यनुयुक्ते[1]। नह्येकधर्मेण धर्मित्व-मुभयोः साम्प्रतम्। तस्मादैक्यमेव जीवेशयोरिति। मैवम्। तत्र ह्येकवचनस्य समुदायार्थत्वाद् धर्मद्वयेनैव भेदिनावुदितौ। [2]उपवीतिनाविवत्[2]।

---

1 पर्यनुयोग आक्षेप ।

2 उपवीतमस्त्यनयोरिति हि विगृह्यते। नह्येकेनैवोपवीतेनोभावप्युपवीतिनौ। जात्याख्यान हि तत्। 'जात्याख्यायामेकस्मिन् बहुवचनम्–" (१ २

---

१ स्वातन्त्र्यादैक्यम्" क

२ "–वत्। व्यावहारिक" क, "–वत्। तत्र व्यावहारिक" ग

तर्हि व्यावहारिक प्रातिभासिकश्चेति भेदद्वयमभिधीयते[1] नापरमिति चेत्; किमेतत् बाध्यम्, आहोस्विदबाध्यम्? आद्ये[2] नासीन्नास्ति न भविष्यतीति ज्ञानगम्यत्वात् सूत्रोदितभेदस्य प्रतिषेधो नाम दोष प्रसज्येत । नाय दोष पूर्वमतत्वादस्येति चेत्, किं तर्ह्यस्य प्रतिषेधकम्? उत्तरसूत्रमिति चेत्, तस्यापि तदुत्तर तथेत्यनवस्था[1] विपर्ययो वा किं न स्यात्? नहि यत्किञ्चिद् विवेचक-मस्ति । पूर्वपक्षसूत्राणा सिद्धान्तसूत्र निषेधवमित्येव ब्रूम इति चेत्, तदप्यचारु । नह्येकमपि सूत्र [2]समग्र[3] पूर्वमतानुवादपर ब्रह्मसूत्रेष्वस्ति । किमुत बहूनि ।

---

५८) इति पाणिनिसूत्रे बहुवचनमिति न वक्तव्यम् । द्वयोश्च वचन भवति । जात्याख्यायामेकवचन द्विवचनं च द्वयोर्बहूना च वचन भवतीत्येतावद् वक्तव्यम् । अत एव स्तनौ स्त्रीणामिति च युक्तम् ।

1 *अनवस्थेत्यव्यवस्था* । सर्वसूत्राणामुत्तरोत्तर प्रतिषेधात् सर्वोऽपि सूत्रार्थं पूर्वमतम्, असूत्रित च यत्किञ्चित् सिद्धान्त इति महतीयमव्यवस्थाया काष्ठा । अथवा सर्वसूत्राणामेव प्रतिषेधे सिद्धान्तस्यानवस्थानमेव स्यादिति व्याख्येयम् । तत्त्वदीपिकाकृदप्याह – "नच विवेचकमनालोच्य पूर्वोत्तर-मतभेदकल्पना विपश्चिता चेतसि चमत्कारमाविष्करोति । नचातिसरम्भेण पूर्वपक्षीकृतमप्रतिवचनेन निरसितु शक्यते । नचोत्सूत्र सिद्धान्तप्रतिपादन-मिति वाच्यम् । असूत्रितस्यासिद्धान्तत्वात् । सूत्रेषु निरस्यपक्षोपन्यास उत्सूत्र चोत्प्रेक्षणीयस्तत्रतत्र सिद्धान्त सूत्रविरुद्ध इति न सज्जनसमाजे भ्राजते" (पृ० २५४) इति । "सूत्रेषु येषु सर्वेऽपि निर्णया समुदीरिता" इति च भाष्ये स्कान्दवचनम् । ' निर्णयायैव यत् प्रोक्त ब्रह्मसूत्र तु विष्णुना । व्यासरूपेण तद् ग्राह्य तत्रोक्ता सर्वनिर्णया । तस्मात् सूत्रार्थमागृह्य कर्तव्य सर्वनिर्णय" इति चानुव्याख्याने भविष्यत्पर्ववचनम् ।

2 "असदिति चेन्न –" (२ १ ८) इत्यादावशत पूर्वमतानुवाददर्शनात् समग्रमित्याह । तदेव विक्रियते यत्रक्वचिद् यैः कैश्चित् पदविशेषैरिति ।

---

१ "–मभिधीयेत" ख

२ "आद्ये नास्ति नाऽसीन्न भवि –" ग

३ "समग्रपूर्वमता –" क

प्रत्येकमपि सिद्धान्तपरत्वात् । पूर्वमतानुवादस्तु यत्क्वचित् यं कंश्चित् पद-विशेषंरेव सुकर । अतो नात्र सूत्र सूत्रान्तर प्रतिषेधति । नच जीवेशयोरभेद: कुत्रापि सूत्रित । अत सूत्रितभेदस्य पूर्वमतत्वासम्भवाद् बाध्यत्वाङ्गीकारो न सङ्गाघटीति । उक्तदोषप्रसङ्गात् । चरमे जीवादीशस्य, ईशाज्जीवस्येति भेदद्वय पारमार्थिकमेव तेनाप्यङ्गीकृतमिति किं नश्छिन्नम्?

अपिच, जीवजडप्रतियोगिक ईशभेद', ईशजडप्रतियोगिको जीवभेद, जीवेश-प्रतियोगिको जडभेद, पुनश्च जीवानामन्योन्यप्रतियोगिक, जडानाञ्च तादृश, एव पञ्चविधो भेद "पृथक्-" इति सूत्रितोऽत्राप्यभिप्रेयते । "अन्यश्च जीवत" इति विस्पष्टोक्तेरेवात्र पुनर्मुखतोऽनुक्ति । तत्रेशभेद[1]वाचकोऽन्य-शब्दश्चतुर्विधसमुच्चयार्थश्चशब्द ।[1]

कुतस्तर्हि सोऽय भेदो भाष्ये[2]न पञ्चधा प्रपञ्चित इति चेत्, प्रपञ्चित एव हि मुखतोऽर्थतो वा तत्रापि । तथाहि -[2]"भिन्नोऽचिन्त्य" इतीशभेद[3] । "भिन्न

---

1 जीवजडप्रतियोगिकस्यैशभेदस्य वाचकोऽन्यशब्द । ननु अन्यश्च जीवत इति श्रूयते? श्रूयताम् । किं हीनम्? ननु प्रतिज्ञैव हीना । वा हि सा या किलाहीयत? जीवजडप्रतियोगिकस्येत्येषा । कथम्? जीवत इति जीव प्रतियोगिकस्यैवेशभेदस्य बोधात् । अबोधोऽयम् । यतश्चकारोऽपि श्रूयते जीवतश्च जडतश्चान्य इति । ननु चकारो गत । क्व भो? चतुर्विध-भेदसमुच्चये । नहि गत एव । तत्रापि गत । अत्राप्यस्ति । नन्वय देहल्या दीपो निक्षिप्त । अन्यश्चेत्याह । तेन चतुर्विध भेद समुच्चिनोति । जीवतश्चेत्याह । तेन जड च समुच्चिनोति । सोऽय चकारस्य स्वभाव, यदय विचिन्वन् समुच्चिनोति यथमिह समुच्चिनुयामहमिति ।

2 तथाहि भाष्यम् (२ ३ २८) - 'भिन्नोऽचिन्त्य परमो जीवसङ्घात् पूर्ण परो जीवसङ्घो ह्यपूर्ण । यतस्त्वसौ नित्यमुक्तो ह्यय च बन्धान्मोक्ष तत एवाभिवाञ्छेदिति सोपपत्तिककौशिकश्रुतेर्भिन्न एव जीव ' इति ।

---

१ "तत्र भेद-" ग

२ 'भाष्ये पञ्चधा न प्रप-" ख

३ ' -शभेद । "जीवसङ्घा-" ग

एव जीवः" इति जीवभेदः । "जीवसङ्घात्" इति मियस्तद्भेदः । "बन्धात्" इति व्यधिकरणोक्तेर्बन्धकजडभेदस्यार्थादवगमः । बन्धकस्य लिङ्गशरीरस्य प्रतिचेतनं विद्यमानत्वाज्जडानामन्योन्यभेदश्चार्थात् सिद्धः । नहि पूर्वापरकालेषु मुच्यमानाना तदातदा भज्यमान लिङ्गशरीरमेकमेवेति समञ्जसम् । नच भाष्याख्यशास्त्रे तात्पर्यार्थो नंतावानस्तीति शङ्क्यम् । तदेकदेशसम्बद्धे प्रकरणे[1] श्रुतिमुखत एव भेदपञ्चकस्योपन्यस्ततत्वात् । तस्मादत्यर्थंविस्तरे भाष्याख्ये महाशास्त्रे प्रपञ्चितोऽयं भेदप्रपञ्च सत्य एव सम्मतः सन्नत्रापि संगृह्यत इत्यनवद्यम् ।

जगद्भेदस्य सत्यत्वेऽपि धर्मत्वात् फलश्यामत्ववद् विनाशसिद्धया रक्तत्ववदभेदः कुतो न भविष्यतीति चेत्, भेदस्यैव ऋमुकत्वादिवद् यावदाश्रयभावित्वादविनाशसिद्धेः । तयाऽप्याश्रयनाशे नाशः स्यादिति चेत्, सत्यमनित्याश्रयाणा ऋमुकत्वादीनाम् । नित्याश्रयस्य भेदस्य ब्रह्मत्वादिवदविनाश एवेति नेष्टहानिः ।

ननु ब्रह्मव्यतिरिक्तस्योत्पत्तिलयोक्तेर्जीवजडभेदस्याऽश्रयनाशाद् ब्रह्मभेदस्य प्रतियोगिनाशादिति सर्वभेदविनाशाद् ब्रह्मैकवस्त्ववशेषः स्वयमेव सिद्ध्यतीति च मा शंकिष्ठाः । जीवजडयोरपि यावद्ब्रह्मभावित्वेन नित्यत्वात् । तथाहि— अनाद्यनन्तकालीनं हि ब्रह्म सम्प्रतिपन्नम् । तद् यदा यस्मिन् काले तिष्ठति जीवोऽपि तदा सर्वदाऽप्याभासत एव । स्वयम्प्रकाशमानस्तिष्ठति नित्यस्वरूप इत्यर्थः[2] । नच जीवनाशो यत्रक्वापि श्रुतः सूत्रितो वा । "अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च" (भ०गी० २.२४.) इति विपर्ययश्रवणात् । नित्यत्वेऽपि जीवस्य स्वदेहसंयोगवियोगाख्ये जन्ममृतौ युज्येते, श्रूयेते च ।

---

1 तत्त्वनिर्णयाख्ये ।

2 तथाच सूत्रम्—"यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्" (२.३ २९.) इति । चतुर्दश चेदमधिकरणमेकसूत्रम् । "नित्य परो नित्यो जीवोऽनित्यास्तस्य धातवोऽत्त उत्पद्यते च म्रियते च विमुच्यते च" इति च श्रुतिरेतदर्थमुपस्थापयति । "जीवो नित्यो धातुरस्य त्वनित्य" इति च भारते । एतेन भाष्ये 'तदा आभास.' इत्यपि विग्रहण विवक्षित भवति ।

जडप्रकृतेरपि नित्यत्वमवगम्यते । "सत्वाच्चावरस्य" (२ १.१७.), "अपीतौ तद्वत्प्रसङ्गादसमञ्जसम्" (२ १.९), "नतु दृष्टान्तभावात्" (२.१.१०.) इत्यादिसूत्रश्रुतिस्मृतियुक्तिसामर्थ्यात् विकृतिसकृत्तिम्या स्थूलत्वसूक्ष्मत्वापत्तौ एव जन्ममरण(शब्दिते[1] ।) अतो न ब्रह्ममानावशेषः कदाचिच्छङ्क्य । "नच नाश प्रयात्येष नचासौ भ्रान्तिकल्पित." ( ) इति भेदपञ्चकस्य सुस्थैर्यं (मेव[2] हि स्थिरीक्रियते । ननु कथ तर्हि पूर्वमनानन्दादिरूप पश्चादानन्दरूपो भवति । स्वरूपधर्माणा यावदाश्रयभावित्वादिति[3] उच्यते । नहि पूर्वम-) विद्यमान सुखादिस्वरूप पश्चादुत्पद्यते । किं तर्हि? यो जीवः पूर्वं यद्रूपाभास आसीत् सुखादिरूपो दु खादिरूपो मिश्ररूपो वा स तु पश्चात् स्वसाधनपरिपाके तद्रूप एवाभिव्यज्यते[3] । यथैव बाल्ये पुंरूप स्त्रीरूपो वा वर्तमान. सन् यौवनेऽपि तद्रूप एवाभिव्यज्यते तथैव स्वमोक्षेऽपि सम्भवात्[1] ॥ ० ॥

[2]अशाधिकरणशेष पर्यवसापयन्[4] "प्रकाशादिवन्नैव पर." (२.३.४५.) इत्यादीनि सूत्राणि व्याख्याति – "हरिः सर्वरूपेष्वपि समः सदा" इति । [3]हयंशाना

---

1 तथाच पञ्चदशाधिकरणे द्विसूत्रे सूत्रे – "पुस्त्वादिवत्त्वस्य सतोऽभिव्यक्ति-योगात्" (२ ३ ३०), "नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा" (२ ३ ३१.) इति ।

2 अशाधिकरणे सप्तदशे तावदष्टौ सूत्राणि । तत्र "अशो नाना –" (२ ३ ४२), "मन्त्रवर्णात्" (२ ३ ४३), "अपि स्मर्यते" (२ ३ ४४), "आभास एव च" इति चत्वारि सम्प्रति सगृह्य भाषितानि । अवशिष्टानी-दानी व्याख्याति ।

3 तथाच सूत्रे – "अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत्" (२ ३ ४७) इति, "असन्ततेश्चाव्यतिकर" (२ ३ ४८) इति च ।

---

१ ( ) आवृत्यन्तर्गतानि कोशेषु गलिततया लुप्तान्यक्षराणि ।
२ ( ) एतावान् भाग कोशे लुप्त ।
३ "–व्यज्यते तथैव मोक्षेऽपि" क "–व्यज्यते तथैव स्वमोक्षेऽपि" ग
४ "पर्यवसाय प्रकाशादि–" क

जीवाना तदधीनत्वात् तदनुग्राह्यत्वादिक युक्तम्[1] । तदशोऽपि मत्स्यादि परो न जीवसम इति मन्तव्यम् । किन्तु मत्स्यादिरूपो हरिः कूर्मादिषु मूलरूपे च सम, मूलरूपो च हरिर्मत्स्यादिषु सम इत्येव[2] वेदितव्यम् । तच्च साम्य नाम स्वातन्त्र्याद्यशेषगुणोन्नद्धनिर्दोषैकरूपत्वेनैव स्थिति. । नतु सादृश्यमात्रम् । तथा सति तं सम इत्येव वक्तव्यत्वात् । नच मत्स्यादिरूपेण द्वैधीभावकाले पुनरेकीभावकाले वा कदाचिदपि पारतन्त्र्यादिवैशिष्ट्येन विषमः शङ्क्योऽयमिति सदाकाल सम इत्युक्तम् । यथाच [1]हरि सूर्य अक्षिमानिना भिन्नाज्ञानामनुग्राह् कोऽपि स्वमण्डलप्रकाशमानिषु[3] स्वरूपाशेषु सम[4] एक एव, तथैवोपपत्ते. ॥ ॥ ० ॥ १४ ॥ १५ ॥ ० ॥ १७ ॥ ० ॥

पादार्थनिगमनार्थश्चाय सदाशब्द । यदेतत् पादोक्त जगतो जन्मादि, विष्णो-रनुत्पत्त्यादि, जीवस्येशाधीनकर्तृत्वादि, तयो पृथक्त्वादि चेति तत् तावत् केषुचिदेव परास्यकालेषु तथा भवतु, न सर्वेष्विति मा भूच्छङ्का । अतीतानागता-नन्तपरपरम्परास्यकालेषु[5] सर्वदाऽपि तथैव तद् भवति, नान्यथेत्यर्थ' ॥०॥०॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचितस्य
श्रीब्रह्मसूत्रसग्रहभाष्यस्य टीकाया
त्रैविक्रमार्यदासकृतावानन्दमालाया
द्वितीयाध्यायस्य तृतीय पाद

---

1 हरिरिति सूर्यस्यापि नाम भवति । तेन "ज्योतिरादिवत्" इति सूत्रखण्ड-व्याख्यानपरतया भाष्य सङ्गमयति—हरि सूर्य इत्यादि । एतेन "प्रका-शादिवत्तेव पर" (२ ३ ४५), "स्मरन्ति च" (२ ३ ४६) इति सूत्रे अपि गदिताभिप्राये । "भास्वान् विवस्वान हरि" इत्यभिधानम् ।

---

१ "—दिक ह्युक्तम्" ख घ
२ "इति वेदि—" क
३ "प्रकाशाभिमानिषु" ग
४ "स एक एव" ग
५ "काले सर्व" क ख घ

॥ द्वितीयाध्यायस्य चतुर्थः पादः ॥

ॐ॥ युक्तिसहिताभिः[1] श्रुतिभिर्विरोधं श्रुतीनामपाकरोत्यस्मिन् पादे ।

"तथा प्राणाः" (२.४.१.), "तत्प्राक् श्रुतेश्च" (२.४.४.), "तत्पूर्वकत्वाद् वाचः" (२.४.५.), "श्रेष्ठश्च" (२.४.६.), "सञ्ज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्" (२.४.२१.) इत्याद्यधिकरणानि व्याख्याति—"मुख्यप्राणश्चेन्द्रियाणि देहश्चैव तदुद्भवाः" इति । मुख्यप्राणादयः सर्वेऽपि तत्त एव सर्वेश्वराद् विष्णोरुद्भविनो निर्णीयन्ते । उद्भवश्रुतियुक्तीनामेव बहुत्वादिना बलवत्त्वान्मुख्यार्थतोपपत्तेः । अनादित्वश्रुतियुक्तीनामल्पत्वादिना दुर्बलत्वाद् गौणार्थत्वोपपत्तेश्च[2] ।

अत्र तावत् सर्वजन्तूनामिन्द्रियाणि मनोवाक्पूर्वाणि, तन्नियन्ता मुख्यप्राणश्च, [3]तेषामेतेर्भोगस्याऽयतनं देहश्चेत्येतेषां विष्णोरेवोद्भव इति हृयुक्तम् । ये

---

1 "तथा प्राणा" इत्यादीनि त्रीणि सूत्राणि प्रथममधिकरणम् । "तत्प्राक्—" इत्येक द्वितीयम् । "तत्पूर्वकत्वात्—" इत्येक तृतीयम् । "श्रेष्ठश्च" इत्यादि षष्ठम् । द्वे च सूत्रे । "सञ्ज्ञामूर्ति—" इत्यादि द्वादशैक सूत्रम् । भाष्ये इन्द्रियाणीति प्राथमिकानि त्रीण्याधिकरणानि, मुख्यप्राण इति षष्ठम्, देहश्चैवेति मूर्तिक्लृप्त्या द्वादश च मुखतो व्याख्यातानीति तानि सूत्राणि मुखत पर्यगृह्णीत् । आदिपदेन च चतुर्थपञ्चमे, दशमैकादशे, त्रयोदश चाधिकरणान्युपसगृह्णीत् ।

2 तथाहि सूत्रे—"गौण्यसम्भवात्" (२.४.२), "प्रतिज्ञानुपरोधाच्च" (२.४.३) इति । समस्त च तज्जमिति प्रतिज्ञानुपरोध स्फुटमेवोक्त ।

3 तेषा जन्तूनाम् । एतैरिन्द्रियै ।

---

१ "युक्तिसहितश्रुति—" ग.

पुनरेतेषा विशेषा इष्यन्ते ते चात्र चशब्दाभ्या सगृह्यन्ते । तदाहि – श्रोत्रादि[१]-प्राणानामिद विषय प्रति द्रवणादिन्द्रियत्वम्[1], ज्ञानेन्द्रियत्वेन सप्तत्वम्, तेषामेव कर्मेन्द्रियसाहित्येन द्वादशत्वम्[2], स्वरूपतोऽणुत्वम्, प्रकाशतो व्याप्तत्वम्[3] गुणतो जीवाधीनत्वम्, मुख्यतो मुख्यप्राणाधीनत्वम्, परममुख्यतो विष्ण्वधीनत्व च[4], अय मुख्यप्राणस्य त्वनिन्द्रियत्वम्, तन्नियन्तृत्वम्,

---

1 तथाचैकादशमधिकरण व्याख्यातम् । तत्र हि त्रीणि सूत्राणि – " त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ' (२ ४ १८), "भेदश्रुते " (२ ४ १९), वैलक्षण्याच्च" (२ ४ २०) इति । तदेतदाह – मुख्यप्राणश्चेन्द्रियाणि चेति । प्राणा इन्द्रियाणि मुख्यप्राणस्त्वनिन्द्रियमिति किलोक्त भवति । तथाहि भाष्ये पौत्रायणश्रुति – "अथेन्द्रियाणि प्राणा वा इन्द्रियाणि प्राणा हीद द्रवन्ति" इति । "प्राणो मुख्यस्त्वनिन्द्रियम्' इति च । "द्रवता हीन्द्रियाणा च नियन्ता प्राण एकराट्" इति ।

2 तथाच चतुर्थमधिकरण व्याख्यातम् । तत्र हि द्वे सूत्रे – "सप्त गतेर्विशेषित-त्वाच्च" (२ ४ ६) इति, "हस्तादयस्तु स्थितेऽतो नैवम" (२ ४ ७) इति च । "सप्त प्राणास्त्ववगते पञ्च प्राणाश्च कर्मण । एव प्राणद्वादशकम्" इति भविष्यत्पर्वणि । तदेतदाह – इन्द्रियाणि चेति । ज्ञेय प्रति द्रवणाद् यानीन्द्रियाणि सप्त, तानि च, कार्य प्रति द्रवणाद् यानीन्द्रियाणि पञ्च, तानि चेति ।

3 तथाच पञ्चममधिकरण व्याख्यातम् । तत्रहि सूत्रम् – "अणवश्च" (२.४ ८) इति । अणवश्च वितताश्च प्राणा इति । तदेतदाह – इन्द्रियाणि चेति । अणुत्वेनाभिमतानीन्द्रियाणि प्रकाशतो व्याततानि चेति पक्षान्तरे चशब्द । "च पादपूरणे पक्षान्तरे हेतौ" इत्यभिधानम् ।

4 तथाच दशममधिकरण व्याख्यातम् । तत्र हि त्रीणि सूत्राणि – "ज्योति-राद्यधिष्ठान तु तदामननात्" (२ ४ १५), "प्राणवता शब्दात्" (२ ४ १६), "तस्य च नित्यत्वात्" (२ ४ १७) इति । तदेतदाह – मुख्यप्राण-

---

१ "श्रोत्रादीनामिदम्" – ख
"श्रोत्रादीना प्राणाना –" ग घ

अन्तरणुत्वम्[1], बहिर्महत्व चेत्यादय प्राणविशेषा प्रयमचकारसगृहीता । अय मासादेर्देहावयवस्य भौमत्वम्, लोहितादेराप्यत्वम्, मज्जादेस्तैजसत्वमित्यादयो[2] देहविशेषाश्चरमचकार[1] सगृहीता ॥ ० ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ॥ ० ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ ० ॥

[3]"पञ्चवृत्तिर्मनोवद् व्यपदिश्यते" (२ ४ १३), "अणुश्च" (२ ४ १४.)

श्चेन्द्रियाणि इति । कारयिता मुख्यप्राण करणानि चेन्द्रियाणीति । तदेव चकार करणत्व समुच्चिनोति । जीव प्राण परम प्रति चेति तस्य नैविध्य च स्वयमेव समाहरति । अत्र 'तेषा नियामक प्राण" इति प्राण प्रति करणत्वमेकादशाधिकरणे गतम् । अष्टमे च – "ईशो ह्यसौ सर्व स्येशितव्यश्च परस्य" इति ।

1 एतेन "पञ्चवृत्तिर्मनोवद् व्यपदिश्यते" (२ ४ १३) इत्यष्टमम्, 'अणुश्च" (२ ४ १४) इति च नवम चाधिकरणमुपसगृहीतम् – मुख्यप्राणश्चेति । पञ्चात्माऽपि प्राणस्तदुद्भव इत्येकोऽर्थ । अणुश्च महाश्च प्राण इति द्वितीय । अत्र टीकाया प्राणस्य पञ्चवृत्तित्व तु "इत्यादय प्राणविशेषा" इत्यादिशब्दगृहीतम् ।

2 एतेन त्रयोदश चरममधिकरण व्याख्यातम् । तत्र हि द्वे सूत्रे – "मासादि भौम यथाशब्दमितरयोश्च (२ ४ २२), "वैशेष्यात्तु तद्वादस्तद्वाद" (२ ४ २३) इति । तदेतदाह – देहश्चेति । द्वादशमधिकरण देह इति व्याख्यातम् । त्रयोदशस्य चाधिकरणस्यार्थविशेषाश्चकार समुच्चिनोतीति । उक्तमेतत् पुरस्तात् – सोऽय चकारस्य स्वभाव, यदय विचिन्वन् समुच्चिनोति यथमिह समुच्चिनुयामहमिति । अथवैव व्याख्येयम् – हेत्वर्थश्चकार । यतो देह अत एव भूतै सम्भूत इति । भूतैरुपचितमेव हि देह प्रणिगदन्ति । अत एव शरीरादिपद विहाय देहपदमुपादत्त देहश्चैवेत्येवकारोऽधिकरणार्थमवधारयति ।

3 यद्यपि पूर्व चकारेण समुच्चिकाय । तथाऽपि स्पष्टत्वाय पुनरन्वाचष्ट द्वे अधिकरणे इत्याह – पञ्चेत्यादि ।

---

१ "चकारेण सगृ –" क

इत्यधिकरणे। "मुख्यप्राणचङ्गे सर्वैम्" इति। प्राणगणाधिपति प्रधानवायुंह मख्यप्राणो नाम। स तावत् प्राणापानादिनामवद्भि स्वरूपं पञ्चधा वर्तमानत्वात् तादृग्दासनियामकत्वाद् वा पञ्चवृत्ति प्रपञ्चित[1]। तस्य यशगमेवेद[1] सवलमपि जगज्जातम्। स ह्येदमन्तर्बहिश्च स्थित्वा यत्ते[2]॥ ० ॥ ८ ॥ ६ ॥०॥

"चक्षुरादिवत्तु तत्सहशिष्टयादिभ्य" (२ ४ ११) इत्यधिकरणम्[3]। "स विष्णोरेशगः सदा" इति। अन्यजगदीश्वरो मुख्यप्राणो विष्णोरेव वशग। नत्वन्यवशग स्ववशो वा। अवान्तरमुख्येश्वरत्वात् तपो। ससारेऽप्यवान्तरेश्वरस्य मुक्तौ मुख्येश्वरत्वमपि सुलभमिति सन्देहापोहार्थम् "सदा विष्णोर्वशग" इत्युक्ति। मुक्तावपि स्वातन्त्र्याभावान्न मुख्येश्वरत्वमित्ययं। नहि स्वतन्त्रयुगल युक्त श्रुत दृष्ट वा भवति[4]। नान्यस्य तदैक्य सर्वथेत्युक्तम् ॥ ० ॥ ॥ ७ ॥ ० ॥

---

1 तथाच श्रुति – "प्राणो वाव पञ्चवृत्ति प्राणोऽपानो व्यान उदान समान इति। तेभ्यो वा एतेभ्य पञ्च दामा प्रजायन्ते। प्राणाद् वाव प्राणोऽपानादपानो व्यानाद् व्यान उदानादुदान समानादेव समान" इति।

2 तथाच कौण्डिन्यश्रुति – "स वा एष प्राणोऽणुमहान् नामान्तर्वाऽणुर्बहिर्महान् प्राणो वा ईशितव्येश ईशो ह्यसौ सर्वस्येशितव्यश्च परस्य" इति।

3 अधिकरण सप्तम द्विसूत्रम्। तथाच द्वितीय सूत्रम् – "अकरणत्वाच्च न दोषस्तथाहि दर्शयति' (२ ४ १२) इति। तदेतदाह – "अन्यजगदीश्वरो मुख्यप्राण" इति।

4 तथाहि भाष्ये – "सर्वकर्तोऽपि सन् प्राण परमाधारत स्थित। कथमेवान्यथा स स्याद् यतो नैवेश्वरद्वयम्। अवान्तरेश्वरत्वेन तस्येश्वरवचो भवेत्। अतो मध्यमतामाहुस्तस्य वेदेषु वेदिन। अनन्येश्वरता तस्य तदन्येश्वरवर्जनम्' इत्यादि। द्वादशाधिकरणे प्रपञ्चितोऽपि विरिञ्चोऽत्र मुख्यप्राणपदेनैव गृहीत। तदाह तत्त्वदीपिकाकृत् – "स्वयमेवाय भगवान् प्राणत्वादूर्ध्वं चतुर्मुखपदमधिष्ठास्यतीति ज्ञापयन् प्राणस्वरूपनिरूपणावसरे चतुर्मुख प्रसञ्जयति' इति।

---

१ "वशमेवेदम्" क ग

पादार्थेन सहैवाध्यायार्थमपि निगमयति–"सर्वदोषोज्झितस्तस्माद् भगवान् पुरुषोत्तमः। उक्ता गुणाश्चाविरुद्धास्तस्य वेदेन[1] सर्वथा"इति। अस्मिन् पादे तावत् सर्वोत्पादकत्वात्[2] सर्वस्य[3] तदधीनत्वाच्च भगवान् विष्णुरेव सर्वेश्वर इति ह्यर्थादु[4]क्तम्। तन्नोक्तयुक्तिप्रवाहात् सर्वेश्वरत्वरोधकं सर्वैरपि दोषैः स उज्झितः। तस्य सर्वेश्वरत्वसिद्धये [5]अस्माभिरुक्ता सार्वज्ञ्यादिगुणाश्च वेदेन न विरुद्धा। तस्य वेदस्य सर्वप्रकारमुक्तिसाहित्ये केवलत्वेऽपि। कुत? तादृग्वेदस्यानन्तयुक्तिसहितानन्तश्रुतिविरोधात्। नच तस्याप्यप्रामाण्यम्[6]। एतदविरुद्धार्थसम्भवनियमात्। अत एव गतिसामान्यमवष्टभ्य "सर्वथा" इति दृढमेव निगमयाञ्चक्रे।

स सर्वेश्वरो विष्णुर्भगवानध्यायोपन्यस्तप्रमाणसामर्थ्यात् सर्वकर्तृत्वविरोधिभिः सर्वदोषैरुज्झितः[7]। अज्ञानपारतन्त्र्यादिभिर्गर्भोभावजन्मादिभिरज्ञानायापिपासादिभी रागद्वेषादिभिर्गरिष्ठैर्लघिष्ठैर्वा सर्वैरपि दोषैरुज्झितः। ये चास्य विष्णोरनन्तवेदपदसमुदायेन योगवृत्तितः प्रतिपादितानन्तगुणाश्चतुर्धाऽप्यविरुद्धाः। तथाहि–स्मृत्यादियुक्तिभिः, साङ्ख्यादिसमयैः, वियदादिकेवलश्रुतिभिः, प्राणादिसयुक्तिश्रुतिभिरित्येभिः प्रत्येकमपि[1] चतुर्विधैर्विरोधिप्रमाणैः-

---

[1] इयमिह प्रक्रिया–युक्तिस्तावत् युक्तिभिर्योक्तसमयैः श्रुतिभिर्योक्तश्रुतिभिश्चेति चतुर्विधेन विरोधेन विरोधिनी भवति। एवमितरे त्रयोऽपि। एव प्रत्येक च चतुर्विधमिति षोडशप्रकारमिद विरोधिप्रमाणमुदितम्।

---

१ "वेदेषु" क ख
२ "सर्वोत्तमत्वात्" ख
३ "सर्वस्य च तद–" क
४ "इत्यर्था–" क ख ग
५ "सिद्धय येऽस्मा–" क
६ "–ण्यम्। तदवि–" क
७ "–रुज्झित। तथाहि–अज्ञान–" घ

रविरुद्धा. । कथमेतदिति चेत्, षोडशप्रकारमपीदं किञ्चित् सदोषं किञ्चिन्निर्दोषमिति[1] द्विविधम् । तत्र सदोषस्य भगवद्गुणनिषेधकर्मण्यशक्तिः । निर्दोषस्यानारम्भ एव[2] । तस्मादुभयथाऽप्यविरुद्धा एव । चशब्दान्निर्दोषत्वं च हरेरविरुद्धम् । "गुणा श्रुता·" (सौपर्ण०) इत्यादिश्रुते. ॥ ० ॥ ० ॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचितस्य
श्रीब्रह्मसूत्रसंग्रहभाष्यस्य टीकाया
श्रैविघ्नमार्यदामकृतायामानन्दमालाया
द्वितीयोऽध्याय

---

१ गतिसामान्येन भगवत्येवोभयसमन्वयात् । तदेतदुक्तं भाष्ये सर्वयेति । तेन विरोधिप्रमाणानामेकपदेन गतिरुक्ता भवति ।

---

३ "–मिति । तत्र" क

॥ तृतीयाध्यायः ॥

ॐ॥ मोक्षसाधन विधीयतेऽस्मिन्नध्याये । वस्तुनिर्णयस्य पुरस्तात कृतत्वात् । तच्च साधन ज्ञानमेव प्रधानमिति वदन्, तन्मूलसाधन वैराग्य प्रतिपादयत्यस्मिन् पादे। तत्प्रतिपादन च कर्मादिर्मोक्षव्यतिरिक्तनानाफलत्वप्रकटनेन तन्निन्दनपूर्वक भवति ।

[1] "तदन्तरप्रतिपत्तौ रहति सम्परिष्वक्त प्रश्ननिरूपणाभ्याम्" (३ १ १), "यथेतमनेव च" (३ १ ६), "तत्स्वाभाव्यापत्तिरुपपत्ते" (३ १ २३), "नातिचिरेण विशेषात्" (३ १ २४), "अन्याधिष्ठिते पूववदभिलापात्" (३ १ २५), "रेतःसिग्योगोऽथ" (३ १ २७), "योनेः शरीरम्" (३ १ २८) इत्यधिकरणानि [1] व्याख्याति –"शुभेन कर्मणा स्वर्गम्" इति। योऽयमिष्टापूर्ते वरिष्ठ मन्यमानस्तदनुष्ठाता प्रमूढ स तावत् तेन शुभेन कर्मणा विष्णोरीषत्प्रसादसाहित्यात् स्वप्नसुखकल्प स्वर्गसुख याति । तद्भुक्तयवसाने तत पुन-

---

1 "तदन्तर–' इत्याद्यष्टौ सूत्राण्येकमधिकरण भाष्यरीत्या । अष्टावपि सूत्राणि प्रत्येकमष्टावधिकरणानि न्यायमालाविवरणयो रीत्या । तथा-चानुव्याख्यान्यायविवरणयोरेक पक्ष । भाष्यसग्रहभाष्ययोश्चापर इति । टीकान्तराणि तु न्यायविवरणावलम्बानि । आनन्दमाला तु हृषीकेश-तीर्थादिसम्मत भाष्यपक्षमेवानुसरति ।
"यथेतम–" इत्यादि चत्वारि सूत्राणि (६-१२) द्वितीयमधिकरणम्। 'तत्स्वाभाव्यापत्ति –" इत्येक सूत्र (२३) सप्तममधिकरणम् । 'नाति चिरेण–' (२४) इत्यष्टमम् । "अन्याधिष्ठिते–' इत्यादि द्वे सूत्रे (२५–२६) नवमम् । 'रेतस्सिग्योगोऽथ' (२७) इति दशमम् । 'योनेः –" (२८) इति च चरममेकादशमधिकरणम् । इतीयमधिकरण-परिपाटी ।

---

१ "इत्येतानि –क ख

रुद्वोधमिवाध पात च[1] । तद् वक्ष्यमाणचशब्दाद् बोद्धव्यम् । अत्राय विशेष — [2]धूमाद्यभ्राकाशमार्गेण चन्द्रलोक गच्छति । तत[1] आकाशवायुधूमाभ्रमेघवर्ष-

---

१ "कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्याम (३ १ ८) इति सूत्रम् । 'तत ऐपेणेम लोकमायाति पुन कर्म कुरुते पुनर्गच्छति पुनरागच्छति" इति श्रुतिर्भाष्ये । अत्र गमनागमने भूते सहेति ज्ञायते । भूतमोक्षे गतस्याऽगम नासम्भवात् ।

२ "धूमादभ्रमभ्रादाकाशमाकाशाच्चन्द्रलोकम् इति कापायणश्रुति धूमा भ्राकाशचन्द्रलोकाना क्रमेण प्राप्तिमाह । य इमे ग्राम इष्टापूर्ते दत्तमित्यु-पासते ते धूममभिसम्भवन्ति धूमाद् रात्रि रात्रेरपरपक्षमपरपक्षाद् यान् षड् दक्षिणैति मासास्तान् (नैते मवत्सरमभिप्राप्नुवन्ति) मासेभ्य पितृलोक पितृलोकादाकाशमाकाशाच्चन्द्रमसमेष सोमो राजा तद् देवाना-मन्न त देवा भक्षयन्ति तस्मिन् यावत्सम्पातमुषित्वाऽथैतमेवाध्वान पुन-र्निवर्तन्ते" इति च्छन्दोगाना श्रुतिरन्यानेव लोकान् मध्ये गम्यानाह । तदेतदुभयसङ्गमनाय धूमाद्यभ्राकाशमार्गेणेत्यादिपदमुपादत्त टीकायाम् । तेन ज्ञायते च्छन्दोगोपनिषद्यभ्र निवेशनीयम् । कापायणाना च श्रुतौ रात्र्यादीनि पितृलोकान्तानि । तेन श्रुती अविरोधिन्यौ भवत । ननु क्व प्रवेशनीयम्? कि धूमादभ्र गच्छति? किवा धूमाद् रात्रि गच्छति? एव तु भवति — धूमादीति टीकास्वारस्यात् धूमस्याभ्रस्य च मध्ये कानिचित् सन्ति स्थानानि गम्यानीति । तानि च रात्र्यादीन्येव स्यु । श्रुतिस्वारस्यात्। ततश्च धूमाद् रात्रिकृष्णपक्षादिद्वाराऽभ्र गच्छति । अभ्रादाकाशम् । आकाशाच्च चन्द्रलोकमिति ।

आगमनमार्गे तु च्छन्दोगाना कापायणाना चैकरूप एव पाठ । तथाहि — "यथेतमाऽऽकाशमाकाशाद् वायु वायुर्भूत्वा धूमो भवति धूमो भूत्वाऽभ्र भवत्यभ्र भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति" इति । आ आकाश यथेत गत तथैवाऽगच्छति । तत पर तु मार्गान्तरेणेति । ननु व्याहति कथञ्चित् पर्यहियत धूमाद् रात्रिमिति धूमादभ्रमिति । पुनरुक्तिस्तु क्व परिहरिष्यते अभ्र भवति मेघो भवतीति? क्व भो पुनरुक्ति ।

---

१ "तत्र" क

मार्गेणैम लोकमागच्छति । नच तत्र कर्मिणो धूमादिस्वारूप्यापत्तिः[1] । नापि तत्पदप्राप्तिः । किन्तु[2] तत्स्वाभाव्यापत्तिरेव[1] । तस्यैवोपपत्ते. । [2]नचाऽगमनं मन्वन्तरान्तराले क्वचिदिति मन्तव्यम् । [3]वत्सरात्पूर्वमेवेति[3] नियमात् । [4]नच

अन्योऽभ्रमानी । अन्यश्च लोक । अन्यच्चाभ्रम् । अन्य एव मेघमानी । अन्य एव च लोक । अन्य एव च मेघ । अभ्र कुत ? अपा भरणाद् वाऽभ्रम् । भ्रमणाद् वाऽभ्रम् । अभ्र गतौ । यदपो हि बिभ्रदवर्षद् भ्रमति न भ्राजते च । मेघ कुत ? वृष्ट्या सिञ्चन् हि मेघ । मिह सेचने । नन्वभ्र मेघ इति सह पठन्ति ? पठन्ति, ये पर्वत गिरिं च सह पठन्ति, वापीं कूप च । तदेतदाह -- आकाशवायुधूमाभ्रमेघवर्षमार्गेणेति । इति प्रथमद्वितीये अधिकरणे व्याख्याते ।

1 समानदेशत्वादितत्सादृश्यापत्तिरित्यर्थ । "तस्य धूमादे स्वभावसदृश स्वभावो यस्य स तत्स्वभाव । गजमुख इतिवत्" इति तत्त्वदीपिका । "नह्यन्यस्यान्यथाभावो नच तत्पदमिष्यते । विद्यागम्य पद यस्मान तत् प्राप्य हि कर्मणा" इत्युपपत्तिर्गरुडे । सप्तममधिकरण व्याख्यातम् ।

2 अष्टम व्याख्याति—नचाऽगमनमिति ।

3 "स्वर्गाल्लोकादवाक् प्राप्तो वत्सरात् पूर्वमेव तु । मातु शरीरमाप्नोति पर्यटन् यत्रतत्र च" इति नारदीयवचन भाष्ये ।

4 इदानी नवम व्याख्याति—नचेत्यादि । "त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते" इति स्थावरजातिहेतुत्वादन्ततो दु खफलत्व यज्ञादेरिति पूर्वमतम् । "सोऽवाग्गत स्थावरान् प्रविशत्यमोगेनैव" इति श्रुतेर्जायन्त इति तत्समानस्थानत्वमेवोच्यते न तत्त्वमिति सिद्धान्तसार ।

---

१ "स्वाभाव्यापत्ति"(?) ग

२ "मन्वन्तरात् पूर्वं—" क

तस्य क्षीरह्यादिषु दु खानुभव । प्रवेशमात्रवचनात् । [1]रेतोरक्तसयोगा-च्छरीरी भूत्वा तत [1]एव हि भोगान् भुवते । एव हीश्वरवत्तृप्तिरिति ॥ ० ॥ ॥ १ ॥ २ ॥ ० ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ ० ॥

[2]"अनिष्टादिकारिणामपि च श्रुतम्" (३ १ १३) इति सूत्रम् । "निरयं च विकर्मणा" इति । यश्च पुनर्विहितमकुर्वन् निषिद्ध वा कुर्वन् मूर्ख स तु काम-क्रोधादिनाऽऽचरितेन विपरीतकर्मणा[2] भगवद्वैमुख्याद् रौरवादिनामक निरय याति, चशब्दात् कथञ्चित् तत पुनरुत्थाने तिर्यक्त्व च । अथवा कथञ्चिन्निरय-शब्दित तिर्यक्त्वमेव याति[3] । चशब्दात् पुनर्मानुष्य च । अय जीव शुभेन

---

1 अथ दशमैकादशे सहैव निराह — रेतोरक्तेत्यादि । तथाच श्रुति — 'ततो वै खलु दुर्निष्प्रपतन योयो ह्यन्नमत्ति यो वा रेत सिञ्चति तद्भूय एव भवति' इति । "दिव स्थास्नून् गच्छति स्थास्नुभ्य पितर पितुर्मातर मातु शरीरेण जायते' इति च । 'ततो रेत सिचमेवानुप्रविशत्यथ मातरमथ प्रसूयते" इति च । तदेतत सर्वं समुचित चकारसमुच्चित चकार भाष्यकार शुभेन कर्मणा स्वर्गं चेति ।

2 सम्प्रति तृतीयमधिकरण चतुस्सूत्रमुपस्थापयति — अनिष्टेत्यादिना ।

3 तथाहि श्रुति — 'तद् य इह रमणीयचरणा अभ्यशो ह यत् ते रमणीया योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वाऽथ य इह कपूयचरणा अभ्याशो ह यत ते कपूया योनिमापद्येरन् श्वयोनिं वा सूकर-योनिं वा चण्डालयोनिं वा इति । तदेतत् तिर्यक्त्वमपि निरय एव । निरय कुत ? अयातिर्गतो हि निरय । नीचैरयन वा । अयस्य निषेधो वा यत्र । सर्व समान नीचासु च योनिषु ।

---

१ 'ततो भोगान्" ग

२ "विकर्मणा ग

कर्मणा स्वर्गं याति, विकर्मणा निरयम्, चशब्दात् पुनरिम[1] लोक चेति हि तदुभयत पुनरावर्तन चशब्दो वक्ति । अनावृत्तियोग्यस्य तमसो मुक्तेश्च पृथगेव वक्ष्यमाणत्वात् ॥ ० ॥

[2]"सयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात्" (३ १ १४.) इति सूत्रम्। "मिथ्याज्ञानेन च तमः" इति । सयमनमनुभूय केषाञ्चित् तत आरोह-वाचिन एतत्सूत्रावयवस्य व्याख्यान "निरय च" इति वावयेन कृतम् । तस्मा-दवरोहवाचिन एवेद व्याख्यानम् । अयमर्थ – य एतद् वस्तुतत्त्व समस्तमपि विपरीत जानाति, नहि किञ्चिदपि यथातथ वेत्ति, सर्वथाऽप्यत[1]द्योग्यत्वात्, तद् यथा – अब्रह्म ब्रह्मत्वेन, अन्यदनन्यत्वेन,[2] सत्य मिथ्यात्वेन, मानममानत्वेन, विपरीत विपर्ययेण, सरूप सावयव सगुण सक्रिय सविशेष चातद्वत्त्वेनेत्यादि सोऽय मायी हरिगुरुवेदद्वेष्टा तदवमन्ता च सन्ततमिति भगवतोऽत्यन्तमप्रिय । अत एव सोऽन्यथाज्ञानी तेनान्यथाज्ञानेनान्धन्तमोनामक नित्यनिरय च याति । [3]कुम्भीपाकनामकादनित्यनिरयाच्चावरुह्येति शेष । चशब्दोऽवधारणे।

---

1 तथाचेद वैराग्यबीजमुदित श्रुतावपि – "अथैतयो पथोर्न कतरेण च न तानीमानि क्षुद्रमिश्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वे त्येतत् तृतीय स्थान तेनासौ लोको न सम्पूयते तस्माज्जुगुप्सेत' इति ।

2 तदेतदधिकरणे द्वितीय सूत्रमाह – सयमन इत्यादि ।

3 "रौरवोऽथ महाश्चैव वह्निर्वैतरणी तथा । कुम्भीपाक इति प्रोक्तान्यनित्य नरकाणि तु । तामिस्रश्चान्धतामिस्रो द्वौ नित्यौ सम्प्रकीर्तितौ । इति सप्त प्रधानानि बलीयस्तूत्तरोत्तरम् इति भारतवचन भाष्ये । अपि सप्त ((३ १ १६) इति च सूत्रम् ।

---

१ "सर्वथाऽतद्यो – ' क

२ ' अन्यदनन्यत्वेन, क. ख. ग.

नच कदाचित् ततः पुनरुत्तिष्ठते । नाप्यत्र[1] कश्चित् सुखलेशः, दुःखस्यापि न पुनर्ह्रासो विद्यते, यथावल्लुप्तपरिपूर्तिरेवेत्यादयोऽपि[2] विशेषाश्चकारोपलक्षिताः[1] । विस्पष्टमेव श्रुतिस्मृत्युपदिष्टत्वात् । [2]नच तत्रापि प्रवर्तयितुर्विष्णोर्दुःखसृष्टिः शङ्क्या । "सर्वदोषोज्झितः" इत्यादिना दत्तोत्तरत्वात् ॥ ॥ ० ॥ ३ ॥ ४ ॥ ० ॥ ६ ॥ ० ॥

[3]"विद्याकर्मणोरिति तु प्रकृतत्वात्" (३.१.१८.) इत्यधिकरणे तात्पर्यतो

---

1 एतेन "स्मरन्ति च" (३ १ १५) इत्यपि व्याख्यातम् । तथाहि स्मरन्ति—"महातमसि मग्नाना न तेषामुत्थिति. क्वचित्" इति, "सुखस्यानन्तर दु ख दु खस्यानन्तर सुखम् । इति सर्वत्र नियम. पञ्चकल्पे तु तत् सदा" इत्यादि । "ततोऽवरुह्य तमसि प्रपतन्ति नैवंत उत्तिष्ठन्तेऽपि कर्हिचित्" इति च श्रुति ।
एतेनैव चकारेण तमसि सुखलेशवैधुर्यकेवलक्लेशप्राचुर्यसूचक षष्ठमप्यधिकरण व्याख्यातम् । तथाहि तत्र सूत्राणि—"न तृतीये तथोपलब्धे." (३.१ १९), "स्मर्यतेऽपिच्च लोके" (३.१ २०), "दर्शनाच्च" (३.१.२१.), "तृतीये शब्दावरोध· सशोकजस्य" (३.१ २२.) इति । "न तम. सुखानुवृत्त केवल ह्येवात्र दु ख भवति" इति श्रुति· । "नान्धे तमसि मग्नाना सुखलेशोऽपि कदचन" इति च स्मृति· । "अत्यन्तदु खसंल्लीनान् निरशेषसुखवर्जितान् । नित्यमेव तथाभूतान्" इति च पाद्मे ।

2 इदानी "तत्रापि च तद्व्यापारादविरोध." (४.१ १७.) इति चतुर्थमधिकरण पूर्वभाष्येणैव व्याकृतप्रायमित्याह—नचेत्यादि । "नासौ दु.खभुगीश्वर. प्रभुत्वात्" इति पौत्रायणश्रुते·, "नासौ नीचोच्चता याति पश्यत्येव प्रभुत्वत." इति भागवततन्त्राच्चायमर्थोऽवसीयते ।

3 नहि महान्त. पूर्व पठित्वा उत्तर स्मरन्ति । किन्तूत्तर स्मरन्त एव पूर्वं

---

१ "नात्र" ग
२ "—दयो विशेषा—" क

विवक्षितमर्थं वदन् "विद्यैव तु निर्धारणात्" (३ ३ ४८) इत्युपरि पठिष्यमाणमप्यधिकरणमिहैव व्याख्याति – "ज्ञानेनैव परं पदं याति" इति। अय य एतद् वस्तुतत्त्व समस्त सम्यगेव जानाति च वदति च, नच किञ्चिदन्यथा व्यवहरति[1], सम्यग्ज्ञानयोग्यत्वात्, तद् यथा – स्वतन्त्र स्वतन्त्रत्वेन, परतन्त्र परतन्त्रत्वेनेत्यादि यथाविषयमेव स तु सम्यग्ज्ञानी तेन सम्यग्ज्ञानेनैव भगवत्प्रसाद-सम्पदा देहोत्क्रान्त्यनन्तर मयाप्रथितेन पथा गत्वा पर पद वैकुण्ठादिनामक विशिष्टस्थान प्राप्नोति।

तच्च ज्ञान नारायणपरायणपरविद्याख्यसच्छास्त्राविरतावृत्तिजन्य तद्भक्त्यादि-गुणबृंहित तदापरोक्ष्येण च युतम[2]भिप्रेयते। "दर्शनाच्च" (३ ३ ४९) इति पृथक्सूत्रात्[1]। मयाप्रथितश्च पन्था अर्चिरादिरिहैव वक्ष्यमाण। तच्च स्थान मयायोग्यपरिपूर्ण[3]सान्द्रानन्दैकभोजनायतनम्। नच यदाचित् तत पुनरावर्तते। असौ मोक्षो वैकुण्ठादिगत पर पद विष्णोरेव स्वरूप सम्पद्यत इति वा तदर्थं। एवशब्द कर्मादिमोक्षसाधनत्व निवारयति ॥ ० ॥ ५ ॥ ० ॥

पादार्थं निगमयति – "तस्माद् विरक्तः सन् ज्ञानमेव समाश्रयेत्" इति। कर्मादिकमुक्तप्रकारेण मुक्तिव्यतिरिक्तस्यैव साधनमिति यत् तस्मान्मुमुक्षु

पठन्तीत्युक्तम। तत स्मारयन्नेव पञ्चममधिकरणमवतारयति – विद्येत्यादि। 'विद्यैव – इत्यादि तृतीयस्य तृतीये ऋयाविद्याधिकरणे प्रथम सूत्रम्। 'दर्शनाच्च' इति द्वितीयम्। श्रुत्यादिबलीयस्त्वाच्च न बाध" (३ ३ ५०) इति तृतीयम्। तदेता त्रिसूत्रीमत्यभाष्येणाऽभञ्जयति।

1 'दृष्टवैव त मुच्यते नापरम्' इति सावधारणश्रुतिदर्शनाच्च इति तदर्थात्। तदेव बलीयस्त्वमुत्तरसूत्रेण 'श्रुत्यादि –' इत्याद्याह हि।

---

१ व्यवहरति। तद् यथा क

२ युक्तमभि –" ग

३ '– पूर्णानन्दसान्द्रभोजना –' ग

सन् तत्साधनभूत सम्यग्ज्ञानमेव समाश्रयेत् । तच्चापरोक्षविषयं हि विवक्षितम् । वेदगम्यस्य विष्णोरापरोक्ष्य चोपास्तिजन्यम्[1] । सा च भक्त्यायत्ता । भक्तिरपि वैराग्यजन्या । तस्मात् तदर्थतया वैराग्यं प्रथमत आपादनीयम् । एवं ज्ञानस्य [2]मूलसाधनत्वादेवास्य "विरक्त: सन्" इत्युक्तिः ॥ ० ॥ ० ॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचितस्य
श्रीब्रह्ममूत्रसग्रहभाष्यस्य टीकाया
नैविघ्नमार्यदासकृतावानन्दमालाया
तृतीयाध्यायस्य प्रथम पाद

---

१ "–गम्यम्" क
२ "मुख्यसाधन–" क

॥ तृतीयाध्यायस्य द्वितीयः पादः ॥

ॐ॥ संसारविरक्तस्य मुमुक्षोर्भगवद्भक्तिरस्मिन् पाद उच्यते । तदर्थमिह तन्महिमोक्तिः ।

[1]"सन्ध्ये सृष्टिराह हि" (३.२.१.), "पराभिध्यानात्तु तिरोहित ततो ह्यस्य बन्धविपर्ययौ" (३.२.५.), "देहयोगाद् वासोऽपि" (३.२.६.), "तदभावो नाडीषु तच्छ्रुतेरात्मनि हि" (३.२.७.), "अतः प्रबोधोऽस्मात्" (३.२.८.), "स एव च कर्मानुस्मृतिशब्दविधिभ्य." (३.२.९.), "मुग्धेऽर्द्धसम्पत्तिः परिशेषात्" (३.२.१०.), "अत एव चोपमा सूर्यकादिवत्[1]" (३.२.१८.), "स्थानविशेषात् प्रकाशादिवत्" (३.२.३५.), "प्रकृतैतावत्त्व हि प्रतिषेधति ततो ब्रवीति च भूयः" (३.२.२२.), "फलमत उपपत्तेः" (३.२.३९.) इत्येतानि[2]

---

1 "सन्ध्ये –" इत्यादि चत्वारि सूत्राणि प्रथममधिकरणम् । "पराभिध्यानात् –" इत्येव द्वितीयम् । "देहयोगात् –" इति तृतीयम् । "तदभाव –" इत्येव चतुर्थम् । "अत –" इत्येव पञ्चमम् । "स एव च –" इत्याद्येक षष्ठम् । "मुग्धे –" इत्येक सप्तमम् । "अत एव च –" इत्याद्येव दशमम् । "स्थानविशेषात् –" इत्यादि द्वे सूत्रे पञ्चदशम् । "प्रकृतैतावत्त्वम् –" इत्येक द्वादशम् । "फलमत –" इत्यादि चत्वार्यष्टादशमित्यधिकरणविवेक । दशमे पञ्चदशे चोभयत्रापि प्रतिबिम्बविचारात् सूत्रक्रममतिहाय दशमानन्तर द्वादशात् पूर्वं पञ्चदशस्याधिकरणस्य पाठ ।

---

१ "–वत् । प्रकृतैता –" ग

२ "इत्यादीनि" ब

व्याख्याति – "सर्वावस्थाप्रेरकश्च" इति । [1]सर्वजीवैरनुभूयमानानां स्वप्न-जाग्रत्सुषुप्तिमोहावस्थानां सर्वासामपि तैजसविश्वप्राज्ञनामको भगवानेक एव प्रेरक [1] । तत्र तैजसप्राज्ञावेव [2] च मोहा [3]वस्थाप्रवर्तकौ । मोहस्यापि स्वप्न-सुषुप्त्यो. [4]समुच्चयरूपत्वात् । चशब्दात् स एव तासां निवर्तकश्च । समस्त-प्रवृत्तिनिवृत्त्योस्तदिच्छाधीनत्वात्[5] । [2]एव संसारावस्थाप्रवर्तकस्त्रिरूपो भगवान्; अय वासुदेवाख्यस्तुरीयरूपस्तन्निवर्तको मोक्षावस्थाप्रवर्तकश्च ।

---

1 सर्वेषा सर्वासा चावस्थानामिति व्यधिकरण समानाधिकरण च विग्रह-मभिप्रेत्य सर्वजीवैरित्याद्युक्तम् ।
स्वप्नेति प्रथमाधिकरणम् । 'मन्ध्य स्वप्न" इति भाष्यात् । "सन्ध्य तृतीय स्वप्नस्थानम्" इति श्रुतिश्च । जाग्रदिति तृतीयमधिकरण व्याख्या-तम् । "देहयोगाद् वास जाग्रदपि तत एव' इति भाष्यम् । सुषुप्तीति चतुर्थम् । "जाग्रत्स्वप्नाभाव सुप्ति" इति भाष्यम् । सर्वजीवैरनुभूय-मानानामिति एक एवेति च पष्ठम् । "देशकालविशेषेऽपि स्वप्नादीना स एव हि । तिरस्कर्ता च कर्ता च न खण्डेश म राजवत्" इति श्रुते । मोहेति सप्तमम् । कं रूपंरय प्रेरयति? आह – तैजसेति । अधिकरणक्रमेण तैजस प्रथमगृहीत । ननु चतस्रोऽवस्था । त्रीणि च रूपाणि । मुग्धस्य का गति ? आह – तत्रेत्यादि । बाह्यविषयान् प्रकर्षेण न ज्ञापयन् प्राज्ञ , स्वप्नवच्च दु खमात्र प्रतिस्मारयन् तैजसश्च मुग्ध नियुक्त । कण्ठान्निर्गम हृदयस्य चाप्राप्तिर्दु खबीजम् । चशब्दादित्यादि द्वितीयपञ्चमाधिकरणे व्याख्याते ।
2 एवमित्यादि विशिष्य द्वितीयाधिकरणव्याख्यानम् । "बन्धमोक्षप्रदत्वात्' इति भाष्यम् । 'स्वप्नादिबुद्धिकर्ता च तिरस्कर्ता स एव च । तदिच्छया यतो ह्यस्य बन्धमोक्षौ प्रतिष्ठितौ" इति हि पौराणा पठन्ति ।

---

१ 'प्रवर्तक' घ
२ "–वेव मोहा–" ख ग
३ 'मोहप्रवर्तकौ' क "–वेव मोहप्रवर्तकौ' घ
४ "समुदाय–" ग
५ ' –वृत्त्योस्तदधीनत्वात् क

नचैतामन्य.[1] स एव वा कश्चिन्निवर्तयति । नित्यस्थितेरेव तदिष्टत्वात् । नच कश्चिदप्यवस्थामन्यः प्रवर्तयेन्निवर्तयेद् वा । स्वयमेव तद्वशत्वात्[1] । एव सर्वावस्थासु तदधीनत्वादेव[2] तदाभासो जीवः सूर्यकाद्युपम उच्यते[2] । न पुनर्जडत्वादिना । [3]सर्वस्य च [3]जगतः सृष्टिस्थितिसंहाराद्यवस्थाश्च सर्वाः स एव प्रेरयति । [4]कर्मादीना च साधनावस्थाया साध्यावस्थाया चेश्वर एव प्रेरक' । चशब्दान्मोक्षकाले[4] निवर्तकश्च । तस्यैव तदुपपत्तेः ॥ ० ॥ १–७ ॥ ० ॥ ॥ १० ॥ ० ॥ १२ ॥ ० ॥ १५ ॥ ० ॥ १८ ॥ ० ॥

[5]"न स्थानतोऽपि परस्योभयलिङ्ग सर्वत्र हि" (३.२.११.), "अल्पवदेव हि तत्प्रधानत्वात्" (३.२ १४.), "तदव्यक्तमाह हि" (३.२.२३.), "उभय-

---

1 अन्य कश्चित् स एव वा ।

2 तदेनेन विवृत भवति दशममधिकरणम् । तथाच भाष्यार्थं —सर्वावस्या-प्रेरकश्च सर्वावस्याप्रेरको यस्मादत एव तदधीनो जीव सूर्यकाद्युपम इति । प्रतिबिम्बत्वादेव प्रकाशादिवत् स्थानविशेषाद् आनन्दविशेष इत्येतदपि चकारेण समुच्चीयत इत्युपस्कर्तव्यम् । तेन पञ्चदशमप्यधिकरण-मुपसञ्जग्राहैव भाष्यकृदिति भवति ।

3 सर्वस्येत्यादि द्वादशाधिकरणार्थं । "सृष्टि च पालन चैव सहार नियम तथा । एक एव करोतीश सर्वस्य जगतो हरि" इति हि पठन्ति ।

4 कर्मादीनामित्यष्टादशाधिकरणार्थं । "स्वतन्त्र ईश एवैकस्तद्वश कर्म सर्वदा' इति च श्रुति । सर्वदेत्येतत् सर्वावस्थासु साधनावस्थाया साध्यावस्थाया चेति व्याख्यातम् ।

5 "न स्थानत —" इत्यादि त्रिसूत्रमष्टमधिकरणम् (११–१३) । "अल्पवत् —" इत्यादि चतुस्सूत्री (१४–१७) च नवमम् । आसप्तम दशम

---

१ "तद्वशगत्वात्" ख

२ "—नत्वादिनैव" क ख घ

३ "सर्वस्य जगत" क ग

४ "चशब्दात् स्वेष्टकाले" ख

व्यपदेशात्त्वहिकुण्डलवत्" (३.२.२८.) इत्यधिकरणानि[1] व्याख्याति—"सर्वरूपेष्वभेदवान्" इति । स्वप्नादिस्थानानामन्योन्यभेदेऽपि तत्प्रेरकेषु रूपेषु न भेदो विष्णोरस्ति । नहि स्थानभेदस्तद्भेदस्य ज्ञापकः कारको वा स्यात् । न केवल वासुदेवादिचतुर्मूर्तिष्वभेदो मूलमूर्तेः । किन्तु मत्स्यनारायणविश्वाजित-परादिषु[1] दशशतसहस्रामितानन्तमूर्तिष्वप्यभेदस्तस्येति वक्तु सर्वशब्दोपसर्ज-नम्[2] । अपरया तेषु रूपेष्वित्येव पूर्णत्वात्[2] । यद्यप्येकस्यैव रूपस्य योगशक्त्या

च व्याख्यात पुरैव । एकादशमुपरिष्टाद् व्याकरिष्यते । द्वादश च व्याकृतम् । "तदव्यक्तम्— इत्यादि पञ्चक (२३—२७) त्रयोदशम् । "उभयव्यपदे-शात्—" इत्यादि सप्तक (२८—३४) चतुर्दशम् ।

1 आदिपदस्य मत्स्यादिषु प्रत्येकमन्वय । मत्स्यादिषु नारायणादिष्वित्यादि । मत्स्यादिकल्पयन्ता दश । नारायणादिपुरातनान्ता शतम् । विश्वादि-सर्वप्रहरणायुधान्ता सहस्रम् । अजितपरादिष्वित्यत्र तु न यथासङ्ख्यम् । परादिरमित । अजितादिरनन्त । श्रुतौ बहूनीति चामितमेवोच्यते । तथाहि बृहद्भाष्ये—"परादिरूपो बहुधा सोऽनन्तात्माऽजितादिक" इति । ननु कथमिदम्? अनन्तमेवामित भवति । अमितमेव चानन्त भवति । तत् किमिदमुच्यते—अमित चानन्त चेति? उपपन्नम् । सङ्ख्यातीतत्वा-दमितमुच्यते । सङ्ख्यावैधुर्यादनन्तमुच्यते । अतीत च यद् भवति, अनन्त च यन्न भवति तदमितम् । सङ्ख्यापरम्पराया परपर्यन्त प्रमितत्वात् तदतीत ननु सर्वममितम् । अत एव "परोऽमितश्च" इत्याह । नहि न पारमस्तीति, किन्तु न पारयन्ति निर्देष्टु पारमस्येत्यमितम् । अत एव श्रुतौ सङ्ख्याविशेषमविवक्षित्वा बहूनीत्याह । "बृहतीसहस्रस्वरसमसङ्ख्य पर । व्यञ्जनसमसङ्ख्योऽमित" इति तु भाष्य । अत्र त्वन्यथैव । परस्यामितेष्वेकत्वात् ।

2 तदिद "न भेदादिति चेन्न प्रत्येकमतद्वचनात्" इत्यष्टमे द्वितीयसूत्रस्य विवरणम् । तथाहि बृहदारण्यके—"अय वै हरयोऽय वै दश च सहस्राणि बहूनि चानन्तानि च" (४ ५ १९) इति ।

---

१ "—णानि । सर्व—" क ख २ "—शब्दोपादानम् । अन्यथा" ग

बहुभावसम्भवात् तेषु रूपेष्व[१]न्योन्यधर्मिप्रतियोगिको भेदस्तद्वतो न विद्यत इति वचनादेकमेव तद् रूपमित्यभिप्रेयते । [1]तथाऽपि रूपरूपिणोर्विरुद्धलक्षण-[२]त्वाद् भेदोऽस्तीति मा भूत्; तेषु रूपेषु प्राकृतत्वविनाशित्वादिलक्षणोऽपि न भेदो विष्णोरस्ति, लोकतो विलक्षणत्वात्; अत एव रूपिणि सिद्धं शुद्ध-ज्ञानानन्दमात्रत्वलक्षणं[3] मुख्यैकयमेव तस्य रूपेष्वपीति राद्धान्तः[४] श्रुतिहृदय-निर्लोडितः । [2]किञ्चिद् रूपं व्यक्तम्, किञ्चिदव्यक्तम्, स्वयं तु व्यक्ताव्यक्त इति च न कश्चिद् भेदोऽस्य भवति । [3]तेषु च [५]रूपेषु विद्यमानैर्गुणक्रियादिभिस्त-द्धर्मिको वा भेदो न विद्यते । एकस्यैव गुणगुण्यादिभावे निदर्शनबाहुल्यात् । एवं रूपाणां धर्मित्वप्रतियोगित्वाधिकरणत्वविवक्षया "रूपेषु" इत्येवोक्तिः[६] । अन्यतरमात्रविवक्षायां तावन्मात्रानुसारेण प्रयोगोपपत्तेः[4] । "नेह नानाऽस्ति

---

1 एतेन नवमाधिकरणविवरण कृतम् । "भौतिकानि हि रूपाणि भूतेभ्योऽसौ परो यत. । अरूपवानत. प्रोक्त. क्व तदव्यक्तत. परे" इति हि मात्स्ये । "प्रकाशवच्चावैयर्थ्यम्" (३.२.१५.) इति द्वितीयसूत्रार्थं – लोक-विलक्षणरूपत्वादरूपश्रुतीनामवैयर्थ्यमिति । "आह च तन्मात्रम्" (३ २ १६) इति तृतीयसूत्रार्थं. शुद्धज्ञानेत्यादि ।

2 त्रयोदशाधिकरणसारमाह – किञ्चिदित्यादि ।

3 चतुर्दशाधिकरण च निर्वक्ति – तेष्वित्यादि ।

4 सर्वरूपैरभेदवानित्यपि प्रयोगोपपत्ते. । तस्मादर्थविक्षेप सूचयिष्यन्नेव रूपेष्विति सप्तमीमाह । श्रुतिरप्यत्र 'नेह' इति सप्तमीमेव प्रयुञ्जाना भवति सदादिनी ।

---

१ "रूपेष्वेवान्योन्य –" क ख.

२ "–णोर्विलक्षण –" ग.

३ "मात्रसलक्षण मुख्यै –" क "मात्रत्वलक्षणमुख्यै –" ख

४ "राद्धान्तश्रुतिहृदय निर्लोडितम्" क. ग

५ "तेषु च विद्यमा –" ख

६ "इत्युक्ति" ख.

किञ्चन" (कठ० ४.११.) इति हि श्रुतिः । [1]ध्यानजन्यस्य तु सत्त्वप्रतिषेधात् प्रतिबिम्बत्वोक्तेश्च भेद एव ॥ ० ॥ ८ ॥ ९ ॥ ० ॥ १३ ॥ १४ ॥ ० ॥ १६ ॥ ॥ ० ॥

देशान्तरे कालान्तरे वा तदन्योऽप्युक्तावस्थाना प्रेरकः स्यादित्यत आह— "अनेन सर्वगतत्वमायामयशब्दादिभ्यः" (३.२.३८) इत्यधिकरणम्[2] । "सर्वदेशेषु कालेषु स एकः परमेश्वरः" इति । अन्तर्बहिः समीपे दूरे चेत्यादिसर्वदेशेषु, तदानीमिदानीं पूर्वं पश्चाच्चेत्यादिसर्वकालेषु, इत्युभयेष्वपि स एको विष्णुरेव सर्वेश्वरत्वात् सृष्टिस्थित्यादिसर्वावस्थाना तासु[1] वा सर्वेषा प्रवर्तक उक्तः ॥ ० ॥ १७ ॥ ० ॥

[3]"अम्बुवदग्रहणात्तु न तथात्वम्" (३.२.१९.) इत्यधिकरणायं वदन् "वृद्धि-ह्रासभावत्वमन्तर्भावादुभयसामञ्जस्यादेवम्" (३. २. २०.) इति सूत्र[2] विशेषतो व्याख्याय पादार्थनिगमनं चाभिप्रेति—"तद्भक्तितारतम्येन

---

1 "तथाऽन्यत् प्रतिषेधात्" (३ २ ३७) इति षोडशमप्यधिकरणमेतेनैव शक्यमुपसग्रहीतुमित्याह—ध्यानेत्यादि । रूपेष्वेवाभेदवान् । ध्यानजस्य तु प्रतिबिम्बत्वमेव न रूपत्वमिति ।

2 अथ सप्तदशमधिकरणम् । यद्यपीद "स एव च—" इति षष्ठाधिकरणेन गतम् । तथाऽपि यदि सर्वशक्तोऽपि स्वयमकुर्वन् भगवान् कौतुकादेवान्य कमपि कदाचिन्नयोजयेत् तदा गत तस्य सदा सर्वप्रेरकत्वमिति शङ्काऽत्रा पनुद्यते । तथाच भाष्यार्थं । सर्वदेशेषु कालेषु स एक सर्वावस्थाप्रेरक । कुत ? यत सर्वदेशेषु कालेषु स एक । अनेन सूत्रोक्त सर्वगतत्वहेतु-र्व्याख्यात । पुनश्च कुत ? यत परमेश्वर । स्वरूपभूतया मायाख्यया शक्त्या स्वयमेव हि सर्वस्येष्टे । एतेन मायामयशब्दादिभ्य इति व्याख्यातम्।

3 "अम्बुवत्—" इत्यादि त्रीणि सूत्राण्येकमधिकरणमेकादशम् (१९—२१) ।

---

१ "तासु सर्वेषाम्" क

२ "सूत्रार्थम्" क ग घ

तारतम्यं विमुक्तिगम्"[1] इति । येय भगवति विष्णौ भक्तिर्ब्रह्मादीना तारतम्येन विधीयमाना[1] तैस्तारतम्येनानुष्ठीयमाना या दृश्यमाना तत्तारतम्यानुसारेण तेषा विमुक्तिग सुखतारतम्यमवगम्यते । अत सा यथा-शक्त्यनुष्ठेया फलवृद्धचर्थमिति मथितार्थ॰ ॥ ० ॥ ११ ॥ ० ॥ ० ॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचितस्य
श्रीब्रह्मसूत्रसग्रहभाष्यस्य टीकाया
त्रैविक्रमार्यदासकृतावानन्दमालाया
तृतीयाध्यायस्य द्वितीय पाद

1 अत्र 'विमुक्तिग तारतम्यम्" इति वदन् भाष्यकार तत्प्रतिपादक "अथात आनन्दस्य मीमासा" इति श्रुतिवचन स्फोरयन् तत्सूचक 'दर्शनाच्च" (३ २ २१) इति तृतीयसूत्रमपि व्यचष्टैव ।

---

१ "—मानाऽनुष्ठीयमाना" ग

॥ तृतीयाध्यायस्य तृतीयः पादः ॥

ॐ॥ भक्तानां भगवदुपासनाऽस्मिन् पाद उच्यते । तस्या एव तद्दर्शनद्वारत्वात् । सा चोपासकानां[1] मधिकारभेदाद् भेदेनोच्यते ।

[1]"आनन्दादय प्रधानस्य" (३ ३ १२), "आत्मशब्दाच्च" (३.३ १६) इत्यादीन्यल्पगुणोपसहारसूत्राणि व्याख्याति – "सच्चिदानन्द आत्मेति मानुषैस्तु" इति । यत्तन्निर्दुःखानन्दा[2]नुभवलक्षण साक्षान्मोक्षाख्य धर्मादिषु प्रधानफल तावन्मात्रलब्धियोग्यैरल्पाधिकारिभिर्मानुषजातिभिस्तदर्थमानन्दश्चित् सदात्मेत्येभिश्चतुर्गुणैरुपास्यो[3] भगवान् विष्णुर्विधीयते । तैरनुपास्य तत्फलासिद्धे. । गुणैरुपासना गुणं[4] सह भगवद्ध्यानम् । तुशब्दात् पूर्णत्व नाम वैलक्षण्य गुणाना स्मर्तव्यम्[2] । अय चतुर्गुणोपास्तेरशक्यत्वे[5] आनन्दादीना-

---

1 "आनन्दादय –" इति पञ्चममधिकरणम् । "आत्मशब्दाच्च" इति तु सप्तमाधिकरणे चतुस्सूत्रे द्वितीय सूत्रम् । "आध्यानाय प्रयोजनाभावात्" (३ ३ १५) इति प्रथम सूत्रमुपरिष्टाद् व्याकरिष्यते । अतश्च प्रायो नात्राधिकरणक्रमविवक्षा । यथार्थक्रम विषयोपक्षेपणात् । अत एव ह्यधिकरणक्रमेण सूत्रानुपादान सूचयन् सूत्राणीत्येवाह । नाधिकरणानीति ।

2 एतेन "भूम्न ऋतुवज्ज्यायस्त्व तथाच दर्शयति" (३ ३ ५९) इत्यधिकरण त्रिश व्याख्यातम् । "भूम्न ऋतुवज्ज्यायस्त्वमिति वक्ष्यमाणन्यायेन

---

१ "चोपासनानामधि –" क

२ "–नन्दलक्षणम्' क

३ "–पास्यो विष्णुवि –" क

४ "–पासनानुगुणै' क ख ग

५ "–रशक्यत्वादानन्दा –" क "–पास्त्यशक्यत्व आनन्दा –" ख

मात्मगुण एकीकारेणापि कर्त्रश्चदुपास्ति. [1]समस्ति । तथाच योजना – सच्चिदानन्दो विष्णुरात्मेत्युपास्य इति । निर्दोषपरिपूर्णज्ञानानन्दः [1]स्वामी विष्णुरिति ध्यान प्रवचन च कर्तव्यमित्यभिप्राय. ॥ ० ॥

[2]"नवा प्रकरणभेदात् परोवरीयस्त्वादिवत्" (३.३.८.), "सम्भृतिद्युव्याप्त्यपि चात" (३.३.२४.), "समान एव चाभेदात्" (३.३.२०.), "नवा विशेषात्" (३ ३.२२.) इत्यादीनि [2] क्रमाद् बहूपसहारसूत्राणि व्याख्याति –" सुरेश्वरैः। यथाक्रमं बहुगुणैः" इति । अयमर्थः – ये पुनस्तत्फलेऽप्यानन्दोद्रेकपूर्वकान् विशेषानिच्छन्ति, नतु फलमात्रम्, योग्यतायामाधिक्यविशेषात्, तैः सुरेश्वरं-

---

पूर्णानन्द पूर्णज्ञान इत्याद्युपासन प्राप्यते" इति तत्त्वदीपिका । सच्चिदानन्दस्त्वात्मेति मानुषैरुपास्य इति । "तुशब्दस्तु विशेषे" इत्यभिधानम् । इदमुपलक्षणम् । अलौकिकत्व नाम वैलक्षण्यमित्यपि वक्तव्यम् । तेन – "कार्याख्यानादपूर्वम्" (३ ३ १९) इत्यष्टम चाधिकरण व्याख्यातम् ।

1 स्वामीत्यात्मशब्दार्थमाह । "स च पुरुषार्थ परतन्त्रस्य जीवस्य स्वामिन सवाशाल्लभ्यत इति स्वामित्व भगवत उपसहर्तव्य विशेषत । तच्चाऽह – आत्मेति । आदत्त इति ह्यात्मा" इति तत्त्वदीपिका । "आदानार्थत्वत-श्चायमात्मशब्द पति वदेत् । स्वामी मे विष्णुरित्येव नित्यदोपा-स्यमञ्जमा । स्वामी विष्णुरिति ध्यान विशेषणविशेष्यत । कर्तव्य सर्वथैवैतन्न कथञ्चन विस्मरेत्" (४ १ १४–१५) इत्यनुव्याख्याने । "आत्मा विष्णुरिति ध्यान विशेषणविशेष्यत । सर्वेषा च मुमुक्षूणामुपदे-शश्च तादृश" इति भाष्ये (४ १ ३) ब्राह्मवचनम् ।

2 "नवा –" इत्यादि द्विसूत्र तृतीयमधिकरणम् । एतत्सूत्रस्थाने "प्रिय-शिरस्त्वाद्युपचयापचयौ हि भेदे" (३ ३ १३) इति सूत्र पठितुमुचितम् । व्याख्यानस्वारस्यात् । "सम्भृति –" इति द्वादशम् । "समाने –" इति

---

१ "–दुपास्ति । तथाच" क.

२ "इत्यादीनि बहूप –" ग

स्तदयं स्वस्वयोग्यतातारतम्यक्रमानुसारेण सच्चिदादि[1]चतुर्गुणेषु [1]प्रियशिरस्त्वादिविशेषगुणाना सयोगाच्चतु सङ्ख्यात्ययेन बहुभि', बहुप्रकरणेषु बहुशाखासु वा पठितैर्गुणैरुपास्यो भगवान् । न केवलं चतुर्भिरेव । सुरा ईश्वरा येषामृषिगन्धर्वाणा ते सुरेश्वरा उच्यन्ते ।

[2]पुनश्च[2] स्वरूपसुखादिष्वतिव्याप्त[3]स्वादिमहाविशेषलिप्सुभि सुरैरेव लोकेश्वरैर्वह्निवरुण [4]सूर्यसोमादिभिर्यथाक्रम प्रियशिरस्त्वादिसहितेषु भूतिव्याप्त्यादि गुणाना सयोगात् तेभ्योऽपि बहुभिर्महाशाखोदितमहागुणैरुपास्य । न केवल प्रियशिरस्त्वादिसहितैरेव । ऋष्यादिभ्योऽप्येषामाधिक्यात् ।

[3]अथापि पुनर्मौक्तिकेषु स्वगुणेष्वतिसान्द्रत्वादिमहिष्ठविशेषलब्धियोग्यं सुराणामीश्वरैरिन्द्ररुद्राद्यै[5]र्यथाक्रम बहुगुणं. सर्ववेदोपवेदेषु आऽऽदित आऽन्ता-

---

नवमम् । "नवा—" इत्यादि द्विसूत्रमेकादशम् । "यथाक्रम बहुगुणै" इत्युक्तभाष्यक्रमापेक्षया मूलक्रममतिहाय निर्देश । तमेव क्रम दर्शयति— ये पुनरित्यादिना ।

1 प्रियशिरस्त्वादि—" इत्याद्यधिकरण षष्ठ द्विसूत्रम् । तत् तावदादौ व्याख्याति—प्रियेत्यादि ।

2 पुनश्चेत्यादि सम्भृत्यधिकरण व्याख्यातम् । अत्र भूतिव्याप्त्यादीत्यादिशब्देन वीर्येश्वर्यादय । तदिदमपिशब्दोक्त सूत्रे । "अपिशब्दाद् वीर्येश्वर्यादयोऽपि ग्राह्या । द्वित्वमात्रव्यावृत्त्यर्थं किलाग्रगृह्यासूत्रयत्" इति हि तत्त्वदीपिका । "अत एव भूतिव्याप्त्यायो गुणा " इति भाष्ये प्रमाणवचनम् ।

3 "समान एवञ्चाभेदात्" इत्यधिकरणम् । अथापीत्यादि ।

---

१ "सच्चिदानन्दादि—" क

२ "पुन स्वस्वरूप—" ग

३ "—दिष्वभिव्याप्त—" ग

४ "वह्निवरुणसोमादि—" ख "वह्निसोमवरुणसूर्यादि—" ग

५ "—रुद्रादिभिर्यथाक्रम बहुभि सर्वै—" ख ग

दुर्दितद्रव्यगुणक्रियाणा सामान्यरूपैरनन्तरूपत्वसर्वज्ञत्वसर्वकर्तृत्वादिभिरपि महा-गुणैरुपास्यः । नतु [1]सहितैरेव[1] ।

[2]अथ "यथाक्रमं बहुगुणः" इत्येतद् दशगुणितैः शतगुणितैः सहस्रगुणितैरित्यादि-रूपेण गुणाना परिमाणविषयेऽपि द्रष्टव्यम् । नतु[2] सङ्ख्यामात्रविषये । तयोर्यो-पासकविषयेऽप्येतद् विशेषणमिष्यते । तदा यथाऽऽत्मजातिनमं बहवो हि भक्तयादयः शमादयो वैराग्यादयश्च स्वगुणा येषामृष्यादीनामिति बहुव्रीहिः ॥ ० ॥

[3]अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम्" (३.३.५७.), "मन्त्रादिव[४] वाऽविरोधः." (३.३.५८.), "अङ्गेषु यथाऽऽश्रयभावः" (३.३.६३.) इत्या-द्यङ्गदेवोपास्ति[3]सूत्राण्यप्यनेनैव वाक्येन व्याख्यातानि लक्ष्यन्ते । तथाहि— अप्रधानेऽपि गुणशब्दप्रवृत्तेः [4]बहुगुणा इति बहवः परिवारजना अप्युच्यन्ते । यथात्माधिक्रयक्रमं तैरपि सहैव भगवान् भक्तैरुपास्यः । एकशब्दस्य प्रधानेऽपि

---

1 प्रियशिरस्त्वादिसहितै , भूतिव्याप्त्यादिसहितैश्च चतुर्गुणैरेव ।

2 नवा विशेषादित्युक्तमधिकारिविशेषमाह—अथ यथाक्रममित्यादि । एतेनैव "नवा प्रकरणभेदात्—" इत्यधिकरण च व्याख्यातम् ।

3 "अङ्गावबद्धा—" इत्याद्यष्टाविंशमधिकरणम् । "मन्त्रादिवत्—" इत्येकोनत्रिंशम् । "अङ्गेषु—" इत्यादि चतु सूत्र चतुस्त्रिंशम् ।

4 "अप्रधानानि च गुणा निगद्यन्ते निरुक्तिगै" इत्यभिधानम् ।

---

१ "न रूप . . दिसहितैरेव ।" घ मध्ये क्रियादिचिद् वाक्यभागो लुप्त ।

२ "नतु तेषा सङ्ख्या—" क ख. घ

३ "—देवतोपास्ति—" ग

प्रसिद्धेरनेकपर्यायस्य बहुशब्दस्याप्यप्रधानवाचकत्व सिद्धयति[1] । तस्माद् बहुशब्देनाप्यप्रधानभूता अङ्गदेवा[1] गृह्यन्ते । तेषा गुणैरपि यथाविधिक्रम स एवोपास्य इति वा[2] ॥ ० ॥

---

1 ननु यद्येव सिद्धयति, सिञ्जिनीपदस्याप्रधानमर्थ इत्यपि सेत्स्यति । कथम्? न्यायसाम्यात् । यो हि यस्यार्थस्तत्पर्यायस्यापि सोऽर्थ इतिन्याय-साम्यात् । कथम्? अप्रधान हि गुणपदस्यार्थ । सिञ्जिनीति गुणपर्याय । "गुणशब्द सिञ्जिन्या प्रयोजयन्त्यप्रधानेऽपि' इति ह्यभिदधति । तस्मात् सिञ्जिनीत्यप्रधान स्यात् । न स्यात् । कुत ? अपर्यायत्वात् । सिञ्जिनीति न गुणपर्याय । गुण इति हि सिञ्जिनीपर्याय । कथमेतत्? परितो ह्यर्थ स्याऽयो पर्याय । गुणशब्दस्य यावन्तोऽर्थास्तावतो न वदतीति सिञ्जि-नीत्यपर्याय । सिञ्जिनीशब्दस्य तु यावन्तोऽर्थास्तान् वदतीति गुण इति सिञ्जिनीपर्याय । एवमिहापि । अनेकशब्दस्य यावन्तोऽर्थास्तान् सर्वानपि-वदतीति बहुरनेकपर्याय । युक्त चैतत् — बहुष्वप्रधानेषु एको हि प्रधानो भवति ।

ननु एक इति एकत्वसङ्ख्याया वर्तते । अनेक इति तु न द्वित्वे । तेन नञा तद्भिन्नार्थबोधो न भवतीत्यप्रधानमपि नार्थं स्यात् । स्यादेव । तर्हि द्वित्वमपि स्यात् । न स्यात् । नह्येकस्माद् भिन्नोऽनेको भवति । किन्तु यस्य प्रतियोगी नैक सोऽनेको भवति । अत एव द्विवचनस्य प्रवृत्ति ।

कथ तर्हि अनेकाल्, अनेकज , अनेकगोत्र इति, कथञ्चानेकपो द्विप इति? ननु भवतामपि कथमनेकाग्र ? एकाग्रो न भवतीति । समान समाधानम् । एकाल् न भवति । एकजो न भवतीति द्विजोऽनेकज । एकगोत्रो न भवतीति द्व्यामुष्यायणोऽनेकगोत्र । एकपो न भवतीति द्विपोऽनेकप । सर्वत्र हि समस्त पद नना समस्यते । कथ तर्हि "अनेकमन्यपदार्थे" इति । बहुव्रीहिणा समासेन भवति । अनेकोपसर्जन ह्यनेकम् । उपसर्जनवचन हि तत् । एव यत्रक्वचिदपि चेत् प्रयोगस्तदपि गौणतया व्याख्येयम् । सङ्ख्यावाच्यनेक-शब्दो बहुवचनान्त इति वदन् वैयाकरणोऽप्यत्रैव किलान्तत आजगाम ।

2 यथाविधिक्रममित्येतेनैव "नवाऽतत्सहभावश्रुते" (३ ३ ६५) इति

---

१ "देवता गृह्यन्ते" ख

[1]"उपसंहारोऽर्थाभेदाद् विधिशेषवत् समाने च" (३.३.६.), "आध्यानाय प्रयोजनाभावात्" (३.३.१५.), "सर्वाभेदादन्यत्रेमे" (३.३.११.), "सम्बन्धादेवमन्यत्रापि" (३.३.२१.) इत्यादीनि[1] सर्वोपसंहारसूत्राणि व्याख्याति—"ब्रह्मणा त्वखिलैर्गुणैः । उपास्यः" इति । य एते[2] सुरेश्वरैरुपास्यमाना आनन्दाद्याः प्रियशिरस्त्वाद्यैः सम्भृत्याद्यैः सर्वरूपत्वाद्यैश्च सहिताः सर्वकर्तृत्वान्ताः पूर्वोक्ता गुणाः[3] तैष्वेव प्रायशः सर्वशब्दवाच्येषु पुनस्तदेतत्कर्तृत्वादीनां क्रियाविशेषाणामपि गुणानां संयोगादखिलैः सम्पूर्णसङ्ख्याकैः सर्ववेदेष्वाद्यन्तत आऽक्षरादा स्वरादा घोषाच्चापुनरुक्त्योदितैर्निर्दोषपरिपूर्णगुणैः[4] रुपास्यः परमपुरुषो विष्णुः सर्वाधिकार्यधिपतिना[2] चतुर्मुखब्रह्मणा, नैवान्यैः

द्विसूत्रं पादान्त्याधिकरणं पञ्चत्रिंशमपि भाषितम् । अङ्गदेवतानामङ्गेषूपासनम्, तदवराणा नवेति व्यवस्थितविकल्पस्यैव क्रमस्य तत्राभिधानात् ।

1 "उपसंहारः—" इत्यादि द्विसूत्रं द्वितीयमधिकरणम् । "आध्यानाय—" इति सप्तमं चतुस्सूत्रमिति (१५–१८.) इति पूर्वंप्ररुतम् । "सर्वाभेदात्—" इति चतुर्थं द्वितीयम् । "प्राप्तेश्च समञ्जसम्" इति प्रथमम् । आद्यमपहाय द्वितीयग्रहणं तु भाष्ये तस्य मुखतो व्याख्यानात् । "सम्बन्धादेवमन्यत्रापि" इति दशमाधिकरणम् । "सर्वे गुणाः सर्वदैव हृद्युपास्याः" इत्युपसंहारे श्रुतिः । "आप्त्वा धिया ध्यानार्थं हि सर्वे गुणा उच्यन्ते" इति सप्तमाधिकरणे तत्त्वदीपिका । "गुणास्त्रैविक्रमाद्याश्च संहर्तव्या न संशयः । विरिञ्चस्यैव नान्यस्य स हि सर्वगुणाधिकः" इति दशमाधिकरणे भाष्ये बृहत्तन्त्रवचनम्।

2 'ब्रह्मणा तु' इति भाष्यस्यार्थं उच्यते—सर्वाधिकार्यधिपतिना चतुर्मुखब्रह्मणेति । नैवान्यैरिति च । "तु स्याद् भेदेऽवधारणे" इत्यभिधानात् ।

---

१ "इत्यादिसर्वो—" ग.
२ "एत उपास्य—" ग.
३ "पूर्वोक्तगुणाः" घ.
४ "—पूर्णगुणै—" ग.

[1]सामान्याधिकारिभिरेवमुपास्य । "सम्पूर्णोपासनाद् ब्रह्मा सम्पूर्णानन्दभाग् भवेत् । इतरे तु यथायोगम्—" (पाद्म०) इति वचनात्[1] ।

श्रियादीना विशेषसामान्यविभागश्चानुव्याख्याया व्याख्यात—"ब्रह्मा सर्वैर्गुणैश्चैव क्रियासामान्यतश्च गो. । गुणसामान्यतो रुद्रो द्रव्यसामान्यत. परे" (३ ३ १७१) इति । तदर्थश्च नयचन्द्रिकाया[2] गुरुभिरेव व्यक्त विवृत—

"ब्रह्मेत्यादेरयमर्थ—ब्रह्मा तु सर्ववेदोदितं सर्वविशेषसहितंगुणक्रियाशाद्यात्मकं सर्वगुणं सहितत्वेन विष्णुमुपासीत । ब्रह्माणी तु तत्र क्रियाणा सामान्यत उपास्ति कुर्यात् । अन्येषा विशेषत एव । यथा घटस्रष्टा पटस्रष्टेत्यादिविशेषान् विना सर्वस्रष्टेत्यादीनाम् । रुद्रो गुणाना सामान्यत

अत्र तुरवधारयन्नयोग च व्यवच्छिनत्ति । इतराधिकारिभ्यो भेद च बोधयति । स च भेद "इयदामननात्" (३ ३ ३५) इत्यष्टादशोऽधिकरणे पञ्चभि सूत्रै सूत्रित । तेनैतदप्यधिकरण भाषित भवतीति वक्ष्यति । "स ह्येषा भूताना वरिष्ठो नह्यस्मात् कश्चनोपरि विना नारायण देव देवी च परमा श्रियम्" इति हि श्रुति । विष्णोस्तत परत्व तु "एष तु वा अतिवदति' इति श्रुतौ तुशब्देन विशेषणादेव ज्ञायत इत्येतदपि तुशब्देनैव स्फोरयामास । नित्यमुक्ताया श्रिय सकाशादस्य वैलक्षण्य च तुशब्देनैवाऽह । "देवी च परमा श्रियम्" इति श्रुते । तथाच "कामादितरत्र तत्र चाऽयतनादिभ्य" (३ ३ ४०) इत्यादि त्रिसूत्रमेकोनविंशमप्यधिकरण कृतार्थम् । "सर्वायतना सर्वकाला सर्वेच्छा न बन्धका मैषा प्रकृति" इति च श्रुति । एतदपि टीकाकृतोपरिष्टात् विव्रियते ।

1 एतेन सर्वभेदात् सर्वगुणाना भगवदभेदेनोपासनात् ब्रह्मा अन्यत्र इतरविलक्षणे सम्पूर्णानन्दलक्षणे मोक्षे भवतीति सूत्र व्याकृत भवति । कथ तर्हि बहुवचनमिम इति? गतभाविब्रह्मणा बहुत्वात् ।

---

१ "साधारणाधि—" ख

२ "—काया व्यक्त गुरुभिरेव निरूपित" क

उपासीत कुर्यात् । यथा घटज्ञः पटज्ञ इत्यादिविशेषान् विनैव सर्वज्ञ इत्यादि । किमुत क्रियाणाम्? द्रव्याणा तु विशेषत एव । क्रियादीनामपि गुणान्तर्भूतत्वे सत्यपि ज्ञानादीना गुणशब्देन पृथगुक्तिर्ब्राह्मणपरिव्राजकन्यायानुसारात् । परे पार्वत्यादयो द्रव्याणा भगवद्रूपाणामपि सामान्यत उपासीत कुर्युः । किमुत गुणक्रियाणाम्" इत्यादि ।

अत्र तुशब्दाद् ब्रह्मणा दोषाभावैश्चाखिलैरुपास्यः । तदन्यैर्यथाक्रमं सामान्यत एव गुणोक्तन्यायवत् । तुशब्दस्त्वधिकारीयत्तां च सूचयति "इयदामननात्" (३.३.३५.) इति सूत्रिताम् । अथ यावन्तोऽनन्तगुणा[1] ब्रह्मणा गुणिनि हरावुपसंहियन्ते [2]तावतस्तावतोऽनन्तगुणास्तदनन्तगुणेष्वपि प्रत्येकमुपसंहृत्यैव नित्यमुक्ताऽपि प्रकृतिः स्वेच्छयैव स्वपतिं विष्णुमुपास्ते । न केवल विरिञ्चवद् गुणिन्येवानन्तगुणानुपसंहृत्य । सन्त्येव ह्येकस्मिन्नपि[3] गुणे पुनरप्यनन्तास्तद्विशेषगुणयुक्ताः । तथाहि—ब्रह्मणोपसंहियमाणेषु नियाविशेषगुणेष्वेको गुणो घटत्वप्टुत्वं हि । तस्मिन्नेव गुणे [4]तत्परमाणुत्वप्टुत्वाद्यास्तद्विशेषगुणाः पुनरनन्ता युज्यन्ते । एकघटपरमाणूनामपि घटादिद्रव्यवदनन्तत्वात्, तदेकपरमाण्ववयवानामपि[5] तत्परमाणुवदनन्तत्वात्, तदेकावयवानामपि तद्वदनन्तत्वमित्यपर्यवसितिः । नच परमाणुर्निरंशः । दशदिक्सम्बन्धान्यथानुपपत्त्या शून्यत्वाभावान्यथानुपपत्त्या कार्यप्रथिमान्यथानुपपत्त्या च परमाणुरपि साश एवेति सिद्धेः । तस्मादनन्तपदार्थेष्वेकैकस्मिन्नेव वस्तुन्यपर्यवसितविशेषावस्थापकत्वाद्या[6]स्तत्तद्विशेषगुणा अपर्यवसिता एव परमेश्वरस्येति निश्चीयन्ते । नच

---

१ "—गुणा गुणिनि" ग
२ "तावत्तावतो—" क ख ग
३ "—स्मिन्नेव गुणे" क
४ "—गुणे तत्तत्पर—" घ
५ "—परमाण्ववयवानामपि तद्वदनन्त्वमित्य—" ग
६ "—द्यास्तद्विशेष—" ख

तेषामल्पत्वमेवेति शङ्कयम् । अणोरणीयस्त्वेऽप्यैश्वर्यातिरेकेण महतोऽपि महीयस्त्वोपपत्तेः । तथाचोक्तमनुव्याख्याने "—ते चाखिलविलक्षणाः । सर्वे सर्वगुणात्मनः सर्वकर्तार एव च । तथाऽपि सविशेषाश्च—" (३.२.१६७-८.) इत्यादि । नच देव्या अप्येवमे[1]वमुपास्तेति विधिर्विज्ञेयः । नित्यमुक्तत्वेन तदतीतत्वात् । [1]कादाचित्कमुक्ता अपि कृतकृत्यत्वात् स्वेच्छयैव[2] ह्युपासते, कर्म वा कुर्वन्ति । अत[3] एव ह्यधिकारीयत्तामुक्त्वैव प्रकृतिप्रस्तावः कृतः ॥ ० ॥

अथ येषामेवमुपासीतेति विधिर्विज्ञायते बद्धत्वात्, तैस्तदर्थं किं कार्यम्, उपास्य वा किमेषा स्यादित्यनयोरुत्तर वितरति—[2]"सर्ववेदान्तप्रत्यय चोदनाद्यविशेषात्" (३ ३.१.), "प्रदानवदेव तदुक्तम्" (३.३.४४.), "लिङ्गभूयस्त्वात् तद्धि बलीयस्तदपि" (३ ३ ४५.), "पूर्वविकल्पः प्रकरणात् स्यात् क्रियामानस-

---

१ नित्यमुक्तत्वेनेतरवैलक्षण्यात् तुशब्देन प्रकृता रमा अखिलैर्गुणैरनन्त विशेषैर्हरिमुपास्त इति प्रस्तुतम् । इदानी तत्प्रस्तावात् कादाचित्कमुक्ता अपि तेनैव तुनोच्यन्त इत्याह—कादाचित्केत्यादि । एतेन "हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दस्तुत्युपगानवत्" (३ ३ २७) इति द्विसूत्र चतुर्दशम्, "छन्दत उभयाविरोधात्" (३ ३ २६) इति त्रिसूत्र पञ्चदश चाधिकरण सगृहीतम् । एतत्सग्रहायैव च "कर्म वा कुर्वन्ति" इत्याह । कर्म कुर्वन्ति, नवा कुर्वन्ति । "स्वेच्छया कुर्वन्ति नवा" इति भाष्यात् ।

२ "सर्ववेदान्त—" इत्यादि (१—५) पञ्चसूत्री प्रथममधिकरणम् । "प्रदानवदेव—" इत्येकविंशम् । "लिङ्गभूयस्त्वात्—" इत्यादि त्रीणि सूत्राण्येकमधिकरण द्वाविंशमिति भाष्यमतमिति भाति । प्रकाशेष्वत्राधिकरणभेदस्यानुल्लेखात् । तथाऽपि न्यायमालायाम्—" पुसाम्य प्राप्तसन्त्याग " इति, "विशेषोक्तिरमानत्वम्" इति च पृथगेव पूर्वापरपक्षयुक्तिकथनात्,

---

१ "अप्येवमुपा—" ख
२ "—यैवोपासते" ग
३ "एवाधिकारी—" क ख ग

वत्" (३.३.४६.), "तन्निर्धारणायंनियमस्तद्दृष्टेः पृथग्ध्यप्रतिबन्धः फलम्" (३.३.४३.) इत्यधिकरणानि । "सर्ववेदैश्च सर्वैरपि यथाबलम् । ज्ञेयो विष्णु." इति । स्वस्वयोग्योपासनर्थं सर्वैरप्यधिकारिभिर्यथाशक्त्यधीतं· सर्ववेदैर्यथाशक्ति विचार्यमाणं· सर्ववेदान्तैश्च विष्णुः सम्यग् ज्ञेय । चशब्दात् तदनुकूलतर्कैश्च[1] । नह्यज्ञातस्योपासन कर्तुं शक्यम् । [2]तच्च ज्ञानमाचार्योपदेशशक्त्यनुसारेणैव[1] भवति । [3]तथैव स्वोत्साहशक्त्यनुसारेण च । [4]गुरूपदेशास्तु

तदनुसारेण "लिङ्गभूयस्त्वात् –" इत्येव सूत्रमेकमधिकरणम्, "पूर्वविकल्प –' इत्यादि द्वे च सूत्रे अपरम् । त पक्ष विवक्षित्वाऽत्र ते सूत्रे उल्लिलेखेति सुवचम् । अध्यायपादयोरिवाधिकरणानामनियते । "विद्यैव निर्धारणात्" (३ ३ ४८) इत्यादि त्रिसूत्र त्रयोविशमधिकरण पुरैव व्याख्यातम् – "ज्ञानेनैव पर पदम्" इति । "तन्निर्धारण –" इत्यादि विशमधिकरणम् ।

1 तथाच श्रुति – "नानावेदैरितिहासैः पुराणैः सुज्ञेय एको भगवान् युक्तिभिश्च" इति । "सर्वान् वेदान् सेतिहासान् सपुराणान् सयुक्तिकान्" इति स्मृतिश्च । तदनेन प्रथमाधिकरणार्थं उक्त ।

2 मूले यथाबलमिति यथोपदेशबलमित्यर्थं । तेन "प्रदानवदेव –" इति व्याख्यातमित्याह – तच्चेत्यादि । "आचार्यवान् पुरुषो वेद" इति श्रूयते ।

3 यथाबलमिति यथोत्साहबलमिति चार्थं । तेन 'लिङ्गभूयस्त्वात् –" इत्यपि व्याख्यातमित्याह – तथैवेत्यादि । प्रसादानुगृहीतेन स्वप्रयत्नानुमारेण । नच प्रसादमात्रेण पूर्यते । यद्यपि गुरुप्रसादो बलवान् । "तथाऽपि श्रवणादिश्च कर्तव्यो मोक्षसिद्धये" इति स्मरणात् ।

4 इदानी "पूर्वविकल्प –" इत्यादि व्याख्याति – गुरूपदेशास्त्वित्यादि । यथाबलमिति यथागुरुप्रसादबलम् । यथाबल पूर्व उत्तरो वा । तत्र उत्तमगुरुणा यथात्मबल शिष्यग्रहण उपदेशे च सति तदनुसारेण वेदैर्ज्ञेय । उत्तमगुरोरलाभे यथात्मबल स्वयमेव वेदैर्ज्ञेय । तदेतदुक्तमनुव्याख्याने – "मतिश्रुतिध्यानकालविशेष गुरुरुत्तम । वेत्ति तस्योक्तिमार्गेण कुर्वत स्याद्धि

---

१ "–सारेण भवति" क

तत्प्रसादबलानुसारेण हि सफलो लक्षित । समग्रानुग्रहबलानुसारेण गुरुरपि पूर्वप्राप्त उत्तरो वेति निर्णीयते । तत्रोत्तमगुरोरात्मशक्त्यनुसारेण शिष्यग्रहणं शक्यम् । अवरस्य तूत्तमानुज्ञा[1]बलानुसारेणेति विशेष: । [1]शिष्यस्यापि

दर्शनम्" (३ ३ ७२) इति, "स्वतोऽधिकाभावे स्वयमेव समभ्यसेत्" (३ ३ ७७) इति च । यथाबलमिति यथानुज्ञाबलमिति चार्थ । उत्तमानुज्ञयाऽवरेणाऽपि क्वचित् गुरुणा कृत उपदेशे तदनुसारेण वेदेज्ञेय । 'समग्रानुग्रहाभावात् सत्यकाम स्वक गुरुम् । ऋषभाद्यनुज्ञया चैव प्राप तस्माद्धि युज्यते" इति च भाष्ये ३ "असमग्रानुग्रहे तूत्तमस्य तदनुज्ञयाऽवर प्राप्य" इति तत्त्वदीपिका । उपलक्षणमिद सदृशगुरोरपि । सदृशयो पूर्वपरयो पूर्वानुज्ञयैव पर प्राप्य । "समे विकल्प एव स्यात् पूर्वानुज्ञा च सर्वथा" (३ ३ १८६) इति ह्यनुव्याख्याने ।

1 यथाबलमिति यथास्वयोग्यतावलमिति च व्याख्याति – शिष्यस्यापीत्यादि । एतेन – "यावदधिकारमवस्थितिराधिकारिकाणाम्" (३ ३ ३२) इति द्विसूत्र सप्तदश चाधिकरण व्याख्यात भवति। तथाहि भाष्ये– "ज्ञान चोपासन चैव मुक्तावानन्द एव च । यथाधिकार देवाना भवन्त्येवोत्तरोत्तरम्" इत्यध्यात्मवचनम् । "तारतम्य विमुक्तिगम्" इति पूर्वमप्येतत् कटाक्षितम् । एतेनैव "पुरुषविद्यायामपि चेतरेषामाम्नानात्" (३ ३ २५) इत्यादि द्विसूत्र त्रयोदश चाधिकरण भाषितप्रायम् । योग्यतावशादुपासनाभेद इति हि तत्राप्युच्यते ।

"एक आत्मन शरीरे भावात्" (३ ३ ५५) इत्यादि द्विसूत्र सप्तविशमधिकरणमप्यत्र लेशत स्पृष्टम् । अशाशिनोरेकत्वादनादियोग्यतावशादेव फलमिति हि तत्राप्युच्यते । "नाना शब्दादिभेदात्" (३ ३ ६०) इत्येकत्रि। स्फुटमेव भाषित भवति । "शब्दोऽनुमा तथैवाक्षो योग्यताभेदत सदा । ब्रह्मादीनामेकमर्थं बहुधा दर्शयन्ति हि" इति हि तदर्थ ।

यथाबलमिति यथेच्छाबलमिति व्याख्याने च "विकल्पो विशिष्टफलत्वात्" (३ ३ ६१) इति द्वार्त्रिशम्, "काम्यास्तु यथाकाम समुच्चीयेरन्

---

१ "तूत्तमाज्ञा –" क ग

स्वयोग्यताबलानुसारेणैव स्वोत्साहस्तत्त्वज्ञानसग्रहस्तत्फल च स्यु । [1]तस्मा-दाचार्यवर्यत[1]स्तत्परिचर्यापूर्वक सच्छास्त्रश्रवणादि कृत्वा तत्तज्ज्ञानसशयादीन् व्युदस्य परोक्षत एव भगवान् प्रयमतो ज्ञेय । अपिचैव सर्ववेदार्थ[2]वित्त्वाद् ययायोग्य सर्ववेदशब्दितै. सर्वाधिकारिभिर्ययात्मध्यान[3]बलमपरोक्षतोऽपि[4] भगवान् विष्णुर्ज्ञातु शक्य. स्यात्[2] । एतदेव ह्यपरोक्षज्ञान मोक्षसाधनमिति निर्धारितम्' ॥ ० ॥

नवा पूर्वहत्वभावात्" (३ ३ ६२) इति त्रयस्त्रिश चाधिकरणे व्याख्याते एव ।

1 "तन्निर्धारण—" इत्यादि व्याख्याति—तस्मादित्यादि । "श्रुत्वा मत्वा तथा ज्ञात्वा तदज्ञानविपर्ययौ । सशय च पराणुद्य लभते ब्रह्मदर्शनम्' इति हि ब्रह्मतर्के ।

2 ययाबलमित्येतत् ययाभक्त्यादिसाधनसम्पद्बलमिति च व्याख्येयम् । ता विना केवलश्रवणादिनाऽपरोक्षानुदयात् । तदेतदाह—"अनुबन्धादिभ्य" (३ ३ ५१) इति चतुर्विशमधिकरणम् । अनुबन्धो भक्ति । "भक्त्यैवैन जानाति, भक्त्यैवैन पश्यति, भक्त्यैव बन्धाद् विमुच्यते' इति हि श्रुति । "तद्भक्तितारतम्येन' इति पूर्वमप्येतत् कटाक्षितम् । एतेनैव "परेण च शब्दस्य ताद्विध्य भूयस्त्वात् त्वनुबन्ध" (३ ३ ५४) इति षड्विश चाधिकरण समग्राह्येव । भक्ते करणत्व हि तत्रोच्यते ।

3 निर्धारित "ज्ञानेनैव पर पदम्" इति पूर्वमेव । ज्ञानेन पर पद यात्येव इति चान्वय । तेन "अनियम सर्वेषामविरोधाच्छब्दानुमानाभ्याम्" (३ ३ ३२) इति षाडश चाधिकरण गतार्थम् ।

---

१ '—वर्यस्त परिचर्या—" क
२ "—वेदान्तार्थ—" क
३ "—भियंथाध्यान—" ग
४ "—तोऽपि विष्णु—" क

"यथावल ज्ञेय." इति सामान्यत उक्त ज्ञानविशेष विस्पष्ट चाऽह – [1]"प्रज्ञान्तर-पृथक्त्ववद् दृष्टिश्च तदुक्तम्" (३ ३ ५२) इत्यधिकरणम् । "विशेषस्तु ज्ञाने स्यादुत्तरोत्तरम्" इति । मनुष्यादीनामुपासनाया यद्वदुत्तरोत्तर विशेष उक्तस्तद्वदेव तेषामपरोक्षज्ञानेऽपि तज्जन्ये यथाक्रममुत्तरोत्तरमाधिक्य नाम विशेष स्यात् । तुशब्दात् तत्फलेऽपि मोक्षे तद्वद् विशेष स्यात् । [2]देशकाल-विशेषाच्च तेषा ज्ञाने[1] विशेष इष्यते । देहाद् बहिरन्त सर्वत्र च ब्रह्माण्डे तदावरणे च तद्बहिश्चेति देशतो विशेष । तज्जन्मनि तन्मन्वन्तरे तत्कल्पे च तत्परे[2] तत्पूर्वपरे ततोऽपि पूर्वस्मिन्नित्यादिक कालतो विशेष । उभयतोऽप्युत्त-रोत्तरमाधिक्येनैव तेषा ज्ञान जायत इत्यर्थ ॥ ० ॥

एवञ्चं[3] तादृशमोक्षसिद्धये यथाशक्त्युपासन कार्यमिति पादाभिप्राय ॥ ० ॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचितस्य
श्रीब्रह्ममूत्रसग्रहभाष्यस्य टीकाया
नैकिल्मार्यदासकृतायानन्दमालाया
तृतीयाध्यायस्य तृतीय पाद

---

1 'प्रज्ञान्तर –' इत्यादि द्विसूत्र पञ्चविशमधिकरणम् ।

2 तथाहि भाष्ये – "अन्तर्दृष्टयो बहिर्दृष्टयोऽवतारदृष्टय सर्वदृष्टय इति । देवा वाव सर्वदृष्टयस्तेषु चोत्तरोत्तरमाब्रह्मणोऽन्येषु तु यथायोगम्' इति कमठश्रुति ।" दृष्टयैव ह्यवताराणा मुच्यन्ते केचिदञ्जसा । दर्शनेनाऽन्तरे-णान्ये देवा सर्वत्र दर्शनात्' इत्यध्यात्मवचनम् । 'अन्यया विद्यया मुक्ति मुराणामन्यया नृणाम् । तत्रापि योग्यताभेदात प्रतिभेदा अवान्तरा' इति मानसहितायाम् । 'समोऽपि भगवान् स्वबिम्बदर्शन एवैन मोचयति इति च श्रुति ।

---

१ 'ज्ञान विशिष्यते ग
२ "–परे ततोऽपि पूर्वपरे ततोऽपि क
३ 'एवञ्च तादृश –" क ख ग

॥ तृतीयाध्यायस्य चतुर्थः पादः ॥

ॐ॥ उक्तोपास्तिसिद्धस्य भगवदपरोक्षज्ञानस्य स्वभावसामर्थ्यमस्मिन् पाद उच्यते ।

साधनान्तरविरोधेऽपि मोक्षपर्यवसायित्वं स्यादेवास्येति प्रत्याययितुम् — "पुरुषार्थोऽत. शब्दादिति बादरायणः" (३.४.१.) इत्यधिकरणम्[1]। "सर्वेऽपि पुरुषार्थाः स्युर्ज्ञानादेव न संशयः" इति । यदेतदुक्तोपास्तिसिद्धं निर्दोषं विष्णुविषयमपरोक्षज्ञानं तस्मादेव ज्ञानात् साधनान्तरमन्तरेणापि पुरुषार्थाश्चत्वारोऽपि स्युः । तद्दर्शिनामिति शेषः । तत्राप्यधि[1]कानामधिकयेनेति विशेषः प्रागेव तुशब्दात् सूचित· । स्वस्वजात्यनुसारेण प्रारब्धकर्मानति[2]क्रम्येत्यपि विशेषो ग्राह्यः । अपिशब्दो जैमिन्यादिमतेषु[3] विवक्षितविशेषसूचकः[4] । ज्ञानादेव मोक्षो[5] नान्यद्वारेण स्यात्, स्वर्गादयः कर्मद्वारेणेति हि [6]तद्विशेषः । तर्हि तत्पक्षे मोक्षोऽपि कर्मद्वारेणैव स्यादिति च सशयो मा भूदित्यभिप्रायेण "न सशयः" इत्युक्तम् ॥ ० ॥ १ ॥ ० ॥

---

1 "पुरुषार्थं —" इत्यादि नवसूत्र प्रथममधिकरणम् । "ज्ञानेनैवाऽप्यते सर्वं धर्मेण त्वधिक भवेत् । इति प्राह महायोगी पुमर्थाना विनिर्णयम्" इति पुराणवचनम् ।

---

१ "तत्राप्यधिकाराधिक्येन विशेष" ग

२ "—क्रमीति —" ख

३ "जैमिन्यादिषु विवक्षित —" ख

४ "अपिशब्देन जैमिन्यादिमतेषु विवक्षितविशेष सूचित ।" ग.

५ "मोक्षोऽनन्यद्वारेण" ख

६ "—णेति तद्वि —" क ख ग

[1]नचैतादृशे ज्ञाने सर्वजन्तूनामधिकारिणः शास्त्रकृताः । सोम इव पिपन्त एवेति विभागश्रवणात् । एव चेत्[2] विलक्षणमस्त इति चेत्, "सर्वेषेदञ्च ज्ञेय." इति पुरस्तादुक्तत्वादध्ययनवन्त एव ज्ञानाधिकारिण इति साधिम भवति। "यथाबलम्" इति विशेषणात् तत्तारतम्य च तत्रैवोक्तम् । [3]नचानधिकारिणस्तज्ज्ञान क्वचित् गृह्णन्ति । सर्वथाऽपि स्वभावस्यानभिभवात्' । अधिकारिभिरप्यत्यधिकार न

---

1 "अगावंत्रिवी' (३ ४ १०.) इत्यादि चतुस्सूत्र द्वितीयमधिकरणम् । तत्र प्रथमसूत्रावयवमाह – नचेति । "विभाग शतवत्" (३ ४ ११) इति सूत्रार्थं सोम इवेति । "नवकोटयो हि देवाना तेषा मध्ये शतस्य तु । सोमाधिकारो वेदोक्तो यज्ञणी हं शतादिके । यथा तथैवामरद्वेषा प्रजानामु कियान् जन । ज्ञानाधिकारी सम्प्रोक्तो विष्णुपादैकमानव" इति स्मृति । "अध्ययनमात्रवत" (३ ४ १२) इति तृतीयम् । तदेतत् पूर्वपाद एव भाषितमित्याह – एवमित्यादि । "नाधिकेषान्" (३ ४.१३.) इत्यपि व्याख्यातमेवेत्याह – यथाबलमित्यादि ।

2 "गर्वयाऽपि तु त एवोभयसिद्धान्" (३ ४ ३४) इति सप्तसूत्रमेवमधिकरण चतुर्थम् । तदेतन्निर्वक्ति – नन्वेत्यादि ।

3 तथाच सूत्रम् – "अनभिभव च दर्शयति" (३ ४ ३५) इति । "अन्तरा चापितु तद्दृष्टे " (३ ४ ३६) इति च । तदेतत् "अपि स्मर्यते" (३ ४. ३७) "असुरा आसुरेणैव स्वभावेन च कर्मणा । ज्ञानेन विपरीतेन तमो यान्ति विनिश्चयात् । देवा दैवस्वभावेन कर्मणा चाप्यसशयम् । सम्यग् ज्ञानेन परमा गति गच्छन्ति वैष्णवीम् । नानयोरन्यथाभाव क्वचित् क्वापि विद्यते । मानुषा मिश्रमतयो विमिश्रगतयोऽपि च" इति । तदेतद् यथाबलमिति व्याख्यातमेव । यस्माद् यथाधिकारमेव ज्ञेयो विष्णुस्तस्मादनधिकारिभिर्न ज्ञेय इति । नन्वधिकार सम्पाद्यते ? ततश्च विष्णुर्जिज्ञास्यते । नेत्याह – यथाबलम् । स्वभावाख्याया स्वरूपशक्तेरनतिक्रमणीयत्वान्नानधिकारिभिरसुरादिभिरपि सुज्ञेय इति । ननु यथाबलमिति

---

१ "एवञ्च विलक्षणा –" क

किञ्चिदप्याकाङ्क्ष्यम्[1] । पतनप्रसङ्गात्[1] । तस्माद् योग्य एव सन्नयोग्येभ्यनायि-
ष्युर्वन् योग्यायैव तद्योग्योपास्तिमुपदिशेत्[2] । तच्चास्य साक्षाद् बिम्बरूप
ह्युपास्तिर्न योग्यम् । बिम्बद्वारभूत एव च तदुपदेष्टुं योग्य । प्रतिबिम्बभूत एव
च श्रोतुम् । सामान्ययोग्यतायां च सामन्योपदेशादि सम्भवेत् । उक्तलक्षणहीना
एव ह्ययोग्या । अत एव हि "मानुषंस्तु", "ब्रह्मणा तु" इत्यादिना तत्तद्योग्यो-
पास्तिमुक्त्वा तुशब्दाभ्यामाद्यन्तयोरधिकारितावत्ता सूचयाम्बभूव ॥ ० ॥ २ ॥
॥ ० ॥ ४ ॥ ५ ॥ ० ॥ ८ ॥ ० ॥

हेतुमाह । प्रतिज्ञा तु युतोऽयगता नानधिकारिभिरसुरादिभिरय मुज्ञेय
इति । कि समुच्चीयते? उतम्बित् स्वरूपोत्पादनीयते? नोभयमपि ।
किन्तर्हि? अध्याह्रियते । अध्याहारे सर्वोऽपि सर्वस्यार्थो भवेत् । न भवेत् ।
उक्त हि "शावकाशे न तद् भवेत्" इति । का प्रतिपत्ति ? प्राप्ते हि पूर्वपक्षे
सिद्धान्त प्रसरति । स्फुरितपूर्वपक्षस्य हेतुकथने नन्वगमं सिद्धान्तोऽपि
स्फुरत्येव। तत्र किमनधिगतम्? येषा पूर्वपक्ष एव न स्फुरति तेषा महता मुखेन
सिद्धान्तकथनेऽपि कि फलम्? नहि मृत्पिण्डबुद्धिभि शास्त्रमधिगम्यते ।

1 एतेन अधिकारिभिरप्यधिकारानतिक्रमेणैवोपास्य इत्यभिदधत् "नचाऽधि
कारिकमपि पतानुमानात् तदयोगात्" (३ ४ ४१) इत्यादि त्रिसूत्र
पञ्चममप्यधिकरण व्याख्यात भवति ।

2 एतेन "अनाविष्कुर्वन्नन्वयात्" (३ ४ ४६) इत्यष्टममधिकरण गृही-
तार्थम् । न केवल ज्ञान यथाबलम्, किन्तु ज्ञापन च यथाबलम् । श्रोतु-
र्योग्याता यावती तावदेवोपदेष्टव्यम् । अयोग्याता तु नोपदेष्टव्यमेव । तथा-
चोक्त न्यायविस्तरे — "नचाऽविष्कारेण कथनादयोग्योऽपि योग्या ज्ञानिनो
भवन्तीत्यास्थानपरुषरादिषु स्थित्वैव प्रस्थनीयम् । नह्येव त्वरमाणे
सिद्धिर्भवति । अयोग्यानामपि श्रवणप्रसङ्गात् । तस्माद् विचार्य योग्याना-
मेवादरेणैव कथित्वा सिद्धिर्भवति' इति । 'त्यक्त्वा त्वरा अल्पविद्या
यदो जनाय योग्याय मदैव विद्वान्" इति च श्रुति ।

---

१ 'किञ्चिदाकाङ्क्ष्यम्" ब

[1]"स्तुतयेऽनुमतिर्वा" (३.४.१४) इत्यादीनि कामचारश्रुतिसूत्राणि व्याख्याति—"न लिप्यते ज्ञानवांश्च सर्वदोषैरपि क्वचित्" इति। अपिच प्रारब्धकर्मवशात्[1] क्रियमाणैः कामक्रोधादिभिर्ज्ञानदोषैः कर्मदोषैश्चाज्ञानिवदपरोक्षज्ञानी न लिप्यते च। यल्लेपे तत्सामर्थ्याद् यथोक्तकालेऽपि मोक्षाभावः प्रसज्येत। कामचारवादभक्षादिसर्वदोषाणामपि ज्ञानफलश्रुतिषेधशक्तिर्न स्यादित्ययं [2]॥०॥ एवं सति गुणदोषाणामाचरणे वर्जने वा न कश्चिद् विशेषस्तस्मेत्यत आह— "शमदमाद्युपेत. स्यात् तथाऽपि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात्" (३.४.२७), "शब्दश्चातोऽकामकारे[2]" (३.४.३१.) इत्यादीनि[3] सूत्राणि व्याख्याति—"गुणदोषैः सुखस्यापि वृद्धिह्रासौ विमुक्तिगौ" इति। यद्यपि ज्ञानादेव[3] मोक्षसिद्धिर्नियता तथाऽपीत्यपिशब्दार्थः। ज्ञानिनः [4]श्रुतिविहितैः शमादिगुणैर्वर्णाश्रमधर्मसहितैर्यथाशक्त्यनुष्ठितैर्ज्ञानैकफले मोक्षे सुखस्य वृद्धिः स्यात्। श्रुतिनिषिद्धैर्ब्रह्महत्यादिदोषैर्यथाकाम[4]माचरितैस्तस्य ह्रासश्च

---

1 "स्तुतये—" इत्यादि तृतीयमधिकरणम्। विंशतिरत्र सूत्राणि (१४–३३)।

2 "कामचारा वामभक्षा कामवादा कामेनैवेम देहमुत्सृज्याथ परात्परमीयु" इति श्रुति। "कामकारेण चैके" (३ ३ १५) इति सूत्रम्। "कामकार कामितचरणम्। तत् कामचारभक्षवादेषु त्रिष्वपि समम्" इति तत्त्वदीपिका।

3 इत्यादीनि यानि सूत्राण्याह तानि व्याख्याति।

4 "एतमात्मानमभिपश्य शान्तो भवेत्" इति, "पश्यन्नपीममात्मान कुर्यात कर्माविचारयन्। यदात्मन सुनियतमानन्दोत्कर्षमाप्नुयात्" इति च श्रुतिविहितं।

---

१ "—कर्मादिवशात्" ग

२ "—श्चातोऽकामचारे" क ख ग.

३ "ज्ञानेनैव" क

४ "कालमाच—" क

स्यात्[1] । वृद्धिह्रासौ तु यथालभ्यस्यापि ज्ञानफलस्य पुनर्महत्त्वाल्पत्वापत्तौ एव । तस्माद् ब्रह्मदर्शिनोऽपि गुणानुष्ठान दोषवर्जन चावश्य कार्यम् ।

अत्राय च विशेषो गवेषणीय[2]—बहुज्ञस्य हि देवगणस्य गुणाचरणप्राचुर्यं दृश्यते । अतो वृद्धिरेव[1] तस्य प्रायेणानुमेया । अल्पज्ञस्य तु नरवरस्य विपर्यय-प्राचुर्याद् विपर्यय । विरिञ्चस्य तु परिपूर्तिरेव सुखस्य प्रमाणसिद्धा । विहिताखिलगुणानुष्ठानात् । नैवच हानि. काचिदपि[2] भवेत् । निषिद्धाखिलदोषवर्जनात् । नीचस्य तूच्चापराधतो विशेषेण च हानिर्भवेत्[3] । अतो दूरादेव परिहरणीय स्वोच्चापराध. । परिचरणीयश्चाऽऽचार्य । सतात्पर्यं यथाशक्ति प्रसक्त्यै विहितमेव सर्वयाऽप्यनुसरणीयम् । अनाचरणीयमेव च निषिद्ध मनसाऽपि । [3]अनापदि विशेषतोऽपि । किमर्थम्? बलृप्तस्यापि ज्ञानफलस्य पुन पूर्णत्वाय पुनरनल्पत्वाय चेति ॥ ० ॥ ३ ॥ ० ॥

---

1 तथाहि श्रूयते—'एतावतोऽधिका नास्ति प्राप्तिरित्यन्तत स्थिता । या स्थितिस्ता समाप्नोति यथाशक्ति प्रयत्नत । विपरीतप्रवृत्तेस्तु तस्या ह्रासोऽधिक भवेत्' इति । 'आनन्दो ह्रसतेऽत्यार्याच्छुभ कृत्वा च वर्द्धते" इतिच पुराणम् ।

2 तदेतत् सर्वं भगवताऽनुभाषितम्—"विकर्मलेपो नैवास्ति सम्यग्दृष्टिमता क्वचित् । गुणहानिरच नैवास्ति ब्रह्मणस्त्वविकर्मत । देवानामपि न प्राय बलृप्तस्य तु कथञ्चन । प्राप्तह्रासो भवेत् क्वापि महता तु विकर्मणा । तयाऽपि तन् बलृप्तमेव तस्मान्न नियमोज्झति । चन्द्रग्रीवयोश्चैव स्वोच्च-दारपरिग्रहात् । प्राप्तहानिरभूत्नैव बलृप्तहानि कथञ्चन । ह्रासोऽपि मानुषादीनामानन्दस्य विकर्मणा । भवेन्मुक्तौ विशेषेण स्वोच्चानाम-पराधत' (अनु० ३४५—७) इत्यादि ।

3 "सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्" (३४१८) इति सूत्र मनसि निधायाह—अनापदि विशेषतोऽपीति ।

---

१ "—रेवास्य" क २ "कदाचिदपि" ग

३ "हानिर्भवति ।" ग

[1]"स्वामिन: फलश्रुतेरित्यात्रेय." (३.४.४४) इत्याद्यधि[१]करणायँ वदन्नध्यायार्थमपि निगमयति – "नृणां सुराणां मुक्तौ तु सुखं कल्पितं यथाक्रमम्" इति । नरादीना सुरान्ताना यथोक्तात्पबहुगुणोपसहारिणामप्रारब्धप्रतिबन्धजन्मनि[२] ब्रह्मदृशा तादृग्जन्मात्यय एव मुक्तिभाजा च सता तत्र[२] मुक्तौ यथाजातिक्रम सुख कल्पितम्, एवामियदेवामियदिति । तुशब्दात्तरावरणानासुराणा चान्धे तमसि यथाक्रम दुःख कल्पितम् । पारिशेष्यान्मध्यमाना नित्यससारे यथाक्रम तदुभयमपि[३] मिश्र कल्पितम्, ईशेनेति शेष सर्वत्रापि ग्राह्य । नच तत्कल्पित क्वचित् कस्याप्यन्यथा भवति ।

---

1 "स्वामिन –" इत्यादि त्रिसूत्र (४४–४६) षष्ठमधिकरणम् । आदिपदेन "कृत्स्नभावात्तु गृहिणोपसहार" (३.४.४७) इत्यादि द्विसूत्र सप्तमम्, "ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात्" (३.४.५०) इति नवमम्, "एव मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृते" (३.४.५१) इति दशम चाधिकरण सगृह्णाति । अष्टम पुरैव व्याख्यातम् ।

2 तुशब्दसूचितौ विशेषावुच्येते – अप्रारब्धप्रतिबन्धजन्मनि ब्रह्मदृशामिति' तादृग्जन्मात्यय एव मुक्तिभाजामिति च । एतेन "ऐहिकम्–" इति नवमम्, "एवम्–" इति दशम चाधिकरण गृहीतम् ।– 'सुराणा तु' इत्यन्वयेन सर्वाश्रमित्वरूप विशेष च तुशब्द सुराणा वक्ति । तेन "कृत्स्नभावात्तु गृहिणोपसहार" इत्यादि सप्तम चाधिकरण गृहीत भवति । 'देवा एव ब्रह्मचारिण" इत्याद्युक्त्वा "सर्ववर्णा सर्वाश्रमा सर्व ह्येते कर्म कुर्वन्ति" इति ह्याह ।

---

१ "इत्यधिकर–" ग

२ "तत्र यथाजन्मादिक्रमम्" ख

३ "–मपि कल्पित मिथम्" क "–मपि नित्य कल्पितम्" ग

[1]केषा तर्हि कियत्सुख कल्प्तमिति चेत्, उच्यते । प्रथम [2]स्वातन्त्र्यादि-[1] गुणेष्ववराणा नराणा न्यूनम् । उत्तमाना सुराणामधिकम् । तुशब्दादत्युत्तमस्य ब्रह्मणोऽत्यन्ताधिकम्[2] । तच्चाऽनन्दश्रुत्युदितप्रकारेण शताधिक शताधिक भवति । नहि भृत्याना स्वामिनां च सता सममेव फल भवितुमर्हति[3]। तस्मादपि नराणा भृत्यवदल्प वेतनफलम् । सुराणा क्षेत्रग्रामविषयस्वामिवत् क्रमाधिक-मायफलम् । ब्रह्मण सार्वभौमवत् करफलम् । अथ [4]सत्रयागेष्वृत्विजामिवाल्प-फलमवराणाम् । यजमानानामिव महन्मध्यमानाम् । तद्गुरूणामिव महत्तम-मुत्तमानामिति वा । [5]शिष्याणां नृणा यथाश्रुत स्वालम्बुद्धिगोचर सुख फलम्,

---

1 इदानी षष्ठाधिकरणप्रमेय विवृण्वन् यथाक्रममित्युदित क्रमविशेषमाह — केषा तर्हित्यादि ।

2 तथाह्यनुव्याख्यानम् — "स्वातन्त्र्यतारतम्येन फल हि फलिना भवेत्" (३४२३६) इति ।

3 तदेतदुक्तम् "स्वामिन फलश्रुरित्यात्रेय" इति । "स्वामी हि फलमश्नुते नास्वामी कर्म कुर्वाण" इति च श्रुति । "नह्यत्र प्रजागत कर्म ज्ञान च प्रतिषिध्यते । प्रत्यक्षविरोधात् । "वर्ता शास्त्रार्थवत्त्वात्' इत्यादेश्च । किन्तु पराधीन प्रतनु चाभिप्रेयते । "स्वामी हि फलमश्नुते" इति च महत्त्वापक्षया । अन्नवानितिवत् । "नास्वामी कर्म कुर्वाण" इति च न प्रमाण-सिद्धप्रवृत्तिफलप्रतिषेध । भृत्येष्वपि वेतनादिफलोपलब्धे" इति तत्त्व-दीपिका ।

4 एतेन "आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते" (३४४५) इति सूत्र विवृतम् ।

5 तथाच सूत्रम् — "सहकार्यन्तरविधि पक्षेण तृतीय तद्वतो विध्यादिवत्" (३४४६) इति ।

---

१ "प्रयत्नस्वातन्त्र्यादि —" ङ ख

२ " — धिकमित्यानन्दश्रुत्यु —" क

तद्गुरुपूर्वकाणा नूजाताना ततोऽष्टद्वयष्टादिगुणम्, तन्नियन्तृणा देवाना सहस्र-लक्षादिगुणम्, तेषामपि नियन्तुर्ब्रह्मणो महौघगुणमित्येषा[1] हि तत्वलुप्ति-र्गुरुवृत्तोक्ता[1] । तुशब्दोऽवधारणार्थश्च । तस्माद् यथोक्तसाधन यथाशक्त्यनु-ष्ठेयमित्यध्यायार्थो निर्णीयते ॥ ० ॥ ६ ॥ ७ ॥ ० ॥ ९ ॥ १० ॥ ० ॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचितस्य
श्रीब्रह्मसूत्रसग्रहभाष्यस्य टीकाया
त्रैविक्रमार्यदामशुतावानन्दमालाया
तृतीयोऽध्याय

---

1 तथाहि गुरुवृत्ते श्रूयते – "मुक्तावष्टगुण शिष्याद् गुरुराप्नोति शोभनम् । तद्गुर्वष्टगुण तस्मात् साधं तावत् ततोऽपरे । देवा सहस्रगुणित क्रमात् तस्माद् यथोत्तरम् । ब्रह्मा महौघगुणितमेव फलविनिर्णय" इति । सहस्र-महौघशब्दौ यथाक्रम परिमाणाधिक्यार्थौ ।

---

१ "–त्येषा वलृप्ति–" क ख ग

॥ चतुर्थोऽध्यायः ॥

ॐ। उक्तः साधनभेदः प्रायेण।[1] फलमाहास्मिन्नध्याये। प्रथमपादेऽनिष्टकर्मक्षयाख्यम्[2]। नित्यनोऽत्यन्त[3] कार्यमवश्यं भाव्यं च यत् तत् साधनं प्रयमतो निगद्यते[4]।

[2]"आवृत्तिरसकृदुपदेशात्" (४.१.१.), "आत्मेति तूपगच्छन्ति ग्राहयन्ति च" ४.१.३.), "ब्रह्मदृष्टिरुत्कर्षात्" (४.१.५.) इत्यादीनि व्याख्यायति—"विष्णुर्ब्रह्म तथाऽऽद्रात्येवं नित्यमुपासनम्। कार्यमापद्यपि ब्रह्म तेन याल्यपरोक्षताम्" इति। विष्णुः ब्रह्म परिपूर्णः, आदाता सर्वस्य स्वामीत्येवं[4]

---

1 "तस्य फलसन्निकृष्टत्वादत्रोक्ति। फलावस्थानुप्रवेशित्वाच्च" इति तत्त्वदीपिका।

2 "आवृत्ति—" इत्यादि द्वे सूत्रे प्रथममधिकरणम्। "आत्मेति—" इत्यादि चतुस्सूत्र द्वितीयमधिकरणम्। "ब्रह्मदृष्टि—" इति द्वितीयाधिकरण एव तृतीय सूत्रम्। भाष्ये मुख्यो व्याख्यानात् पृथग् ग्रहणम्। अत एव इत्यादीनीत्याह। साधिकरणानीति। मूले "विष्णुर्ब्रह्म" इति विष्णुपदग्रहणेन "आत्मा विष्णुरिति ध्यान विशेषणविशेष्यत." इति शास्त्रवचनम्, "ब्रह्मदृष्टया गदाग्रभो विष्णु· गर्वैरपि ध्रुवम्" इति ब्रह्मस्तवंवचन च स्मारयति।

---

१ "—भेद प्रायेण। प्रायेण पुन—" क घ
२ "—पादेऽनिष्टक्षयाख्यम्"—क.
३ "नित्यनोऽत्यन्तमवश्यम्" ग
४ "स्वेष नित्य—" घ

नित्यमुपासन कार्यं मुमुक्षुभि । अय चात्र विशेष – यथा विष्णुर्ब्रह्माऽदाते-त्युपास्य तथा आदाता च ब्रह्म विष्णुरित्युपास्यमित्येतज्ज्ञापनार्थं[1] तथाशब्दः । [2]एवशब्दस्त्वन्यथोपास्तिनिराकरणार्थं.[1] ।

अयमिह मथितार्थं – विष्णुर्मे परिपूर्णं स्वामी, स्वामी मे परिपूर्णो विष्णु' – इत्यन्योन्यविशेषणविशेष्यतयोभयप्रकारेणाप्युपासन कार्यम्, नत्वन्यथेति । ननु अह ब्रह्मास्मि, ब्रह्माहमस्मि इत्येवोभयप्रकारेणोपास्यमिति[3] च मा शङ्कि । तादृगुपास्तेरन्यथाविषयत्वात् । नहि जीवस्य ब्रह्मत्व प्रमाणसिद्धम् । पृथक्त्वस्यैवोपदेशात् ।

सिद्ध हि [2]तत्त्वमस्यादिवाक्ये[4] तदैक्यमिति चेत्, मैवम् । तस्यातत्त्वमस्यादित्वात् । तथाऽपि "[3]अह ब्रह्मास्मि" (बृह २५४) इति वाक्ये कथमिति

---

1 अह ब्रह्मेति दृष्टिर्ब्रह्मदृष्टिरित्येकेषा मत मनसि निधायेदमदितम् । तदैव विव्रियते – अयमिहेत्यादि । कश्चिदन्योऽपि विष्णुरिव स्वामी स्यात् विष्णुरपि स्यादिति मा भूदिति विशेषणविशेष्यतयोपासन कार्यम् । नत्वन्यथा । न केवल विशेषणतया विशेष्यतया वा । नापि विशेषण-प्रहाणेनाहन्तया वेति ।

2 तत्त्वमस्यादिपदघटिते वाक्य इत्यर्थं । एवमुत्तरवाक्येऽपि तस्य अतत्त्व-मस्यादिनाऽगर्भपदघटितत्वाद्भेद एव तन्मान भवतीत्यादिरर्थं ।

3 तथाह्यव्याकृतब्राह्मणे वचनम् – "ब्रह्म वा इदमग्र आसीत् तदात्मान-मेवावेदह ब्रह्मास्मीति तस्मात् तत् सर्वमभवत्" इति । पूर्णमभवदित्यर्थं. । नह्यनाभेदस्य वार्ताऽपि श्रूयते ।

---

१ "–नाय तथा–" क
२ "एवशब्द–" घ
३ "–मिति मा" क
४ "–वाक्येषु" क

चेत्, तत्र हि स्वात्मानमेव तद् ब्रह्म 'अहं ब्रह्मास्मि' इत्यवेत्; नतु जीवम् । नापि जीवस्तदस्मीत्यवेत् । उपक्रमादिविरोधात् ।

नच "ब्रह्म वेद ब्रह्मैव भवति" (आय० ३.२ ९.) इत्युक्तिविरोधः । ब्राह्मण-पूजकोऽपि ब्राह्मणो भवेदितिवत् तद्भाव विना तदन्त[1]र्भावस्यैव विवक्षित-त्वात् । "नहि ब्राह्मणपूजकः स एव ब्राह्मणो भवति" इति हि तत्त्वनिर्णये भगव-तैवोक्तम् । अपरथा[2] [1]"तदेव ब्रह्म परमम्—" (महाना० २.) इत्यवधारण-विरोधाच्च । तस्मान्नाह तद् ब्रह्मेत्युपास्यम् ।

[2]अपिच, यदेतदादेयं चराचरं विष्णोः प्रतीकमेव सत् तच्च ब्रह्मेति नोपास्यम् । तस्याप्यतद्भावात् । तस्मादस्मदुक्तप्रकारेणैव तदुपासनं कार्यम् । तच्च आ

---

1 "तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परम कवीनाम्" इति नारायणोपनिषद्-ग्रहणेनैतदप्याह—यदुपरिष्टात् तस्यामेवोपनिषदि "योऽहमस्मि ब्रह्माह-मस्मि । अहमस्मि ब्रह्माहमस्मि" इत्यादि तदपि व्याख्यातमनयैव दिशेति । यदेतदहेयत्वादिनाऽहमादिपदवाच्य ब्रह्म तदहमस्मि ममाप्यन्तर्यामकमिति । "सर्वान्तर्यामको विष्णु सर्वनाम्नाऽभिधीयते । एषोऽहं त्वमसौ चेति नतु सर्वस्वरूपत" इति वचनात् । "तत्तन्नाम्नोच्यते विष्णु सर्वशास्तृत्वतो हरि" इति च । "विष्णुरादाता" इति पदे आददान आचार्य एतमर्थमेवो-द्दिशति । आत्मशब्दस्य स्वरूपवचितयाऽभेदभ्रमसावकाशत्वेऽपि आदातृ-पदेनाऽदेयभेदस्य स्फुटमवगमात् ।

2 अत एवाऽदेयात् प्रतीकादादातुर्भेदोऽप्युदित स्यादिति "न प्रतीके नहि स." (४१४) इति द्वितीयाधिकरणे द्वितीय सूत्रमपि भाषित भवतीत्याह—अपिचेत्यादिना ।

---

१ "तदन्तरभाव—" घ
२ "अन्यथा" क

दर्शनादा [1]मोक्षाच्चैव विधीयत इति नित्यमित्युक्तम् । नचैतत् कदा-[1] चिदप्युपरन्तव्यम् । किन्तु? अत्यन्तायामापद्यपि यथाज्ञवत्यनुष्ठेयमेव । [2]अपि-शब्दाद् देवैस्तु स्वोत्पत्त्यादिस्थानं भगवदङ्गं च तादृगित्युपास्य [2]मिति सिद्धयति। स विष्णुः यथा यस्मात् स्वाङ्गान्ममाऽदाता स्रष्टा तस्मिन्नेव स्वाङ्गे ममाऽदाता स्थापयिता संहर्ता चेत्युपास्यमिति योजनयैव [3] वा तत्सिद्धिः । तच्चाऽदित्यादीनां सृष्ट्यादिस्थान भगवदङ्ग चक्षुरादीति श्रुतम् ।

[3]ध्यानोपासनमासीनैः कार्यमिति विशेषः सर्वेषामपि सम· । तेनेत्थं कृतेनोपास-नेन ब्रह्मशब्दितो विष्णुस्तेषामपरोक्षता याति । यत्तदुत्तरोत्तर सविशेषमुक्तम· परोक्षज्ञानं तदनेन लायत इत्यर्थः ॥ ० ॥ १ – ४ ॥ ० ॥

---

1 आमोक्षादिति वदता नित्यमिति भाष्यपदेनैव "आ प्रयाणात् तत्रापि हि दृष्टम्" (४ १ १२) इति चतुर्थमप्यधिकरण व्याख्यातमिति सूचि-तम् । "यावन्नारायण प्रति प्रयाणात्मको मोक्षस्तावदुपासनादि कार्यम्" इति हि तत्त्वदीपिका ।

2 "आदित्यादिमतयश्चाङ्ग उपपत्ते" (४ १ ६.) इति चतुर्थमपि सूत्र भाष्येण सङ्गमयति – अपिशब्दादिति । अपिशब्दस्येनिशिरसि योजनेन लब्धोऽयमर्थ. – इत्यप्युपासन कार्यमिति । शक्यमन्यथाऽपि व्याख्यातु विनैव पदच्युतिमपिपदस्येत्याह – स विष्णुरित्यादि । तयेति श्रवणाद् यथेति लभ्यते। यथेत्यानुरूप्येऽनतिक्रमे च वर्तते । य क्रममनुसृत्य सृष्टि "चक्षो सूर्यो अजायत" इत्यादि तस्मिन्नेवाङ्गे तस्य लय इत्यादि ।

3 भाष्ये उपासनमिति सर्वेषामुपपन्नमासनम्, तेन तृतीयमप्यधिकरण व्याख्यातमित्याह – ध्यानेत्यादि । "आसीन सम्भवात्" (४.१.७) इत्यादि चतु सूत्र चैतदधिकरणम् । "स्मरणोपासन चैव ध्यानात्मकमिति द्विधा । स्मरण सर्वदा योग्य ध्यानोपासनमासने" इति च भाष्ये स्मृति ।

---

१ "कदाचिदुप – " क

२ " – पास्य सिद्धयति" क.

३ " – यैव तावत्सिद्धि " क

एवं साधनशेषो[1] निःशेषोऽप्युक्त । अथेदानीं तज्ज्ञान उदितमात्रे भवत् फल-मुच्यते।'"तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्" (४.१.१३.), "अनारब्धकार्ये एव तु पूर्वे तदवधे." (४.१.१५.), "अतोऽन्यदपीत्येवंया-मुभयो" (४ १.१७) इत्यादीनि व्याख्याति—"आरब्धकर्मणोऽन्यस्य ज्ञानेन स्यात्[2] परिक्षयः । अनिष्टस्योभयस्यापि सर्वस्य" इति । उक्तोपासनेन[3] ब्रह्मदृशा यदेतत् प्रारब्धफलमघ पुण्य वा कर्म तस्मादन्यस्य कर्मणः पुण्यपापोभयस्माप्यनिष्टस्य ब्रह्मदृष्टचैव नाश. स्यात् । तयाऽप्यनादि-कालकृतस्यात्यन्तानन्तकर्मण सर्वनाशो न प्राप्यत इत्याशङ्कापरिहारार्थं[4] "सर्वस्य" इत्युक्ति । [2]ज्ञानोत्तरकालीनस्य[5] तदुभयस्यानिष्टस्याश्लेषोऽपि स्यादित्यपिशब्दार्थं ।

[3] अथवा, यत्तदिष्टापूर्तव्यतिरिक्तत्वादप्रियत्वाच्चानिष्टशब्दितमघ ज्ञानादुत्तर

---

1 "तदधिगमे—" इत्येव पञ्चममधिकरणम् । "अनारब्धकार्ये—" इति सप्तमम् । "अतोऽन्यदपि—" इति नवमम् । आरब्धकर्मणोऽन्यस्येति सप्तमाधिकरणार्थं । ज्ञानेन स्यात् परिक्षय इति पञ्चमार्थं । उभयस्यापीति नवमार्थं । अनिष्टस्येति विशेषणादिदमुच्यते—यदग्निहोत्रादिकमिष्ट मोक्षे ज्ञानकार्यनिन्दानुभवविशेषायेति न तस्याश्लेषविनाशाविति । "ज्ञानादेवापवर्गस्तथाऽपि यथायथा कर्म कुरुते तथातथाऽधिको भवति" इति ह्युक्तम् । तथाचाष्टममप्यधिकरण सगृहीतम् ।

2 परिक्षयोऽपि स्यात् । अपिनाऽश्लेषोऽपि स्यादित्याह—ज्ञानेत्यादि ।

3 परिक्षयपदेनैवोभयसग्रहसम्भवे किमपिनाऽऽवृत्तेन? तर्हि तथैवार्थं स्यादि-त्याह—अथवेति ।

---

१ "साधनविशेषो—' क ख ग

२ "ज्ञानादेव" क, "ज्ञानेनैव" ग

३ "—नेन यदेतद् ब्रह्मदृशा प्रार—" ग

४ "—शङ्कानिवृत्त्यर्थम्" क

५ "—कालीनस्यानिष्ट—" ख

पूर्वं च तदघस्योभयस्यापि[1] ज्ञानेनैव परिक्षयः स्यात् । परिक्षयो नामोत्तराघस्य परितोऽपगमात् कर्तुरसङ्गः । पूर्वस्य भस्मीभाव इत्युभयथाऽपि स्यात् । अथोत्तरस्य परितोऽभावः पूर्वस्य क्षयश्चेत्युभयसमुच्चयो वा परिक्षयः । [1]पश्चादनिच्छाविषयत्वादनिष्टशब्दितस्य पूर्वोत्तरपुण्यस्योभयस्यापि कर्तुरपगम [2]एव परिक्षयः । किञ्च, उत्तराघविवक्षाया परिवादिषु द्विषत्सु स्वस्मादपगम. परिक्षयो नाम । पुण्यविवक्षाया परिवारेषु सुहृत्स्विति विशेष· ।

किमेतत्पूर्वमुत्तर वा पुण्यमनिष्टम्? न तावत् पूर्वम् । "सर्वापेक्षा—" (३.४. २६)इति विधे । नाप्युत्तरम् । अग्निहोत्रादिसूत्रविरोधात् । तस्मादभीष्टमेव पुण्य सर्वमपीति चेत्, सत्यमकाम्यम् । काम्यमपि किञ्चित् पुनरार्जने भोजने वा सावसर चेत् तदिच्छायामिष्टम् । नो चेत् तदनिष्टम् । स्वार्जितमहासुख[3]प्रतिबन्धकत्वात् । नहि स्वालम्बुद्धिगोचरसुखे सुसाधिते सत्यपि पुनरार्जनेच्छा जायते । नैरवकाश्यात् । नापि न्यूनभोगेच्छा, पूर्ण[4]सौलभ्यात् । अतोऽनिष्टत्वात् क्षीयत एव तादृशं पुण्यमपि पापवत् । तस्मादेतद्विवक्षयैव

---

1 क्षिधातुर्निवासे गतौ च वर्तते । तत् क्षयो नामापगम । स च द्विविध । परिवादिष्वपगम , परिवारेषु चेति । तथाच श्रुति —"सुहृद साधुकृत्याम्, द्विषन्त पापकृत्याम्" इति । तदुभयसग्रहायोपसर्गयोजनमित्याह— पश्चादित्यादि । तथाच परिक्षयपदेन च अतोऽन्यदित्यादिनवममधिकरण व्याख्यातम् । अत्र "उभयस्यापि" इत्यपिशब्देन अनिष्टस्यापक्षय इव पुण्यस्य वृद्धिरपि भवतीति गम्यते ज्ञानेनैव । तेन "यदेव विद्ययेति हि" (४ १ १८) इति दशम चाधकरण सगृहीतम् । तथाच श्रुति —"यदेव विद्यया करोति तदेव वीर्यवत्तर भवति" इति ।

---

१ "तदघस्य पूर्वस्यापि" क
२ "कर्तुरसङ्ग एव" ग
३ "—महत्सुख—ख
४ "पूर्णस्य सौल—" ग

"उभयस्यापि" इत्युक्तम् । [1]अपिशब्दाद् ब्रह्मद्विषां पुण्यस्यापि तद्वत् परिक्षयः स्यात् ॥ ॥ ० ॥ ५–१० ॥ ० ॥

प्रारब्धकर्मक्षयः कथमित्यत आह – [2]"भोगेन त्वितरे क्षपयित्वाऽथ सम्पत्स्यते" (४.१.१९.) इति[1] सूत्रम् । "अन्यस्य भोगतः" इति । ज्ञानस्वभावादेव परिक्षयिण उक्तादन्यस्य प्रारब्धकर्मणः पुण्यादेरनिष्टत्वेऽपि भोगादेव परिक्षयः स्यात् । अनारब्धेष्टशुभसङ्घावे पुनरारभ्य भुक्त्वैवास्यापि क्षपणम् । नो चेत् प्रारब्धस्य भोगत इत्येव वक्तव्यत्वात्, तत्क्षपणस्य गत्यन्तरानुक्तेश्च । अत्र परिक्षयः शोषणमल्पीकार इत्युपमर्दोऽप्युक्त एव स्यात्[3] । भोगोपमर्दाभ्यां तत्क्षपणमित्यर्थः । उपमर्दे भोगलाघवमधादेः, नो चेत् कृत्स्नभोग इत्येव विशेषः । सर्वथा तत् क्षपयित्वा हि ब्रह्म सम्पत्स्यते[2] ।

एवं सर्वकर्मक्षयवचनात् पादार्थनिगमनं च कृतं भवति ॥ ० ॥ ११ ॥ ० ॥ ० ॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचितस्य
श्रीब्रह्मसूत्रसंग्रहभाष्यस्य टीकाया
नैर्विघ्नमार्यदासकृतावानन्दमालायां
चतुर्थाध्यायस्य प्रथम पाद

---

1 अथचार्थान्तरमप्याह – अपिशब्दादित्यादि । एतेन "इतरस्याप्येवमसंश्लेषः पाते तु" (४ १ १४.) इति षष्ठमप्यधिकरण संगृह्णाति ।

2 "भोगेन –" इत्यन्तिममेकादशमधिकरणम् ।

3 एतेन "उपमर्दं च" (३ ४ १६) इति तृतीयस्य चतुर्थे तृतीयाधिकरणस्य तृतीय सूत्र च कटाक्षयति । "आत्मानमभिपद्योपमृद्य पुण्य च पाप च काममाचरन्तो ब्रह्मानुव्रजन्ति" इति च तुरश्चतिर्भाष्ये ।

---

१ "इति । "अन्यस्य –" क

२ "सम्पद्यते" क. ख ग

॥ चतुर्थाध्यायस्य द्वितीयः पादः ॥

॥ यथोक्तानिष्टकर्मक्षयिणा ज्ञानिनां देहमोक्षोऽस्मिन् पाद उच्यते ।

[1]"वाङ्मनसि दर्शनाच्छब्दाच्च" (४.२ १.), "अत एव च सर्वाण्यनु" (४.२. २.), "तन्मन. प्राण उत्तरात्" (४.२.३.) इत्यादीन्युत्तरोत्तरप्रवेशसूत्राणि व्याख्याति – "**उत्तरेषूत्तरेष्वेव यावद् वायुं[1] विमुक्तिगाः । प्रविश्य भुञ्जते भोगांस्तदन्तर्बहिरेव वा**" इति । जीवन्मुक्ति प्रागेव गतवन्तो देवा विशिष्टामपि मुक्ति गच्छन्तः परान्तकाल उत्तरेषूत्तरेषु स्वस्वबिम्बभूतेष्वेव[2] देवेषु प्रविश्य स्व स्व लिङ्गदेहं तत्र क्षपयित्वा चिदानन्दात्मकदेहेन तास्तानभीष्टभोगान् भुञ्जते । यावद् वायुं प्रविशन्ति तावदन्तश्चायं प्रवेशः । नातोऽधिकः । नहि ततोऽधिकोऽधिकारी कोऽप्यस्ति[2] । इयदेवत्यामननात् । तस्मात् तत्तद्द्वारेण[3] तमेव प्रविश्य भुञ्जते । नच तत्प्रवेश विना तदन्येषा भोगः सम्भवति । लिङ्गभङ्गसापेक्षत्वात् । अतस्तदनन्तरमेव भोग इति नियमः ।

---

1 "वाङ्मनसि –" इति प्रथममधिकरणम् । "अत एव –" इति द्वितीयम् । "तन्मन –" इत्येक तृतीयम् । आदिपदेन "भूतेषु तच्श्रुते" (४ २ ५) इति पञ्चमम्, "नैकस्मिन् दर्शयतो हि" (४ २ ६) इति षष्ठम्, "तानि परे तथाह्याह" (४ २ १५) इति नवम चाधिकरण सगृह्णाति ।

2 "विम्बे लयो यन्नियतश्च मुक्तौ चिदात्मना तद्वशता च सर्वदा" इति चानुव्याख्यानम् । "भूतेषु देवा विलीयन्ते" इति च श्रुति । "पृथिव्यामृभवो विलीयन्ते वरुणेऽश्विनावग्नावग्नयो वायाविन्द्र सोम आदित्यो

---

१ "यावद्वायु" क ख

२ "कोऽप्यधिविद्यते ।" क

३ "तस्मात् तद्द्वारेण" क ख घ

अथ विकल्पः – तदन्तः स्थित्वा, तद्बहिर्निर्गत्य वेति? उभयथाऽपि, "तदन्तर्बहिरेव वा" इति । पुनरपि, वाशब्दादेवशब्दाच्च पुनश्चायं नियमः – प्रलये सर्वेषामप्यन्तरेव स्थितिः । पुनः सृष्टौ केषाञ्चिद् बहिरेवेति । पुनरपि वाशब्दात् सृष्टिकाले केषाञ्चिदन्तर्वा बहिर्वा इति च विकल्पो भवति ॥ ० ॥ ॥ १–३ ॥ ० ॥ ५ ॥ ६ ॥ ० ॥ ९ ॥ ० ॥

एव चेत् सर्वाधिको वायुः कथं भुंक्त इत्यत आह – [1]"सोऽध्यक्षे तदुपगमादिभ्यः" (४.२.४.) इति सूत्रम् । "वायुर्विष्णुं प्रविश्यैव" इति । अयं भावः – सोऽयं वायुशब्दितो विरिञ्चः[2] किं स्वात्मानमेवाऽश्रित्य भुंक्ते, उत परं प्रविश्येति

बृहस्पतिरित्याकाश एव साध्या विलीयन्ते" इति महोपनिषत् । अग्न अग्नय इत्यग्निपुत्रा । चतुर्वेदशिखा च – "मृत्यव पृथिव्या वरुण आपोऽग्नयस्तेजसि मरुतो मारुत आकाशे विनायका विलीयन्ते" इति । वायौ मारुत इति च प्रधानवायौ । "प्रधानवायुस्त्विह वायुनामा" इति ह्यनुव्याख्यायाम् । मरुत इति भूतवायव । इन्द्र. सोम आदित्यो बृहस्पतिरित्यादय क्रमश. प्रधानवायौ । अमरचानुव्याख्याने –

"सोमस्तु वारीशयुतोऽग्निरुद्ध
विशत्यसौ काममसौ च वारुणीम् ।
सा शेषदेव स गिर च सैव
वायु विशत्यञ्ज इतीह निर्णय" (४.२.१२३.) इति,

"सूर्योऽग्नियुक्तो गुरुमाप्य तेन
शक्र सहैनेन सुपर्णपत्नीम् ।
तया सुपर्णं सह तेन वाणी
ब्रह्माणमेतद्गत एव यानि" (४.२.१२६) इति च ।

विनायका इति विनायकपुत्रा । अग्नय इतिवत् ।

1 "सोऽध्यक्षे –" इति चतुर्थमधिकरणम् ।

2 एतदप्युक्तम् – "उमागिरीशावपि भारतीरा-
विति स्म वाग् वेदगना ब्रवीति ।

संशयः । न तावदाद्य उपपद्यते । मुख्येश्वरत्वप्रसङ्गात् । नह्यवान्तरेश्वरस्यापि[1] मुख्येश्वरत्व मनसाऽपि प्राप्तु शक्यम्[2] । "न ते महित्वम् –" (ऋ० ७ ११.१.) इत्यादिश्रुतेः । नैव चास्य तदिच्छा जायते । "[1]न कर्हिचिन्मे मनसो मृषा गति." (भाग० २.६.३३) इत्याद्युक्ते[3] । तस्मात् परमेवाऽश्रयं प्रविश्येति निश्चीयते । स च परो विष्णुरेव । तत्र[3] परमान्तरस्याभावोक्ते[4] । अतः सोऽय वायु. [2]ओप्रेरितो विष्णुमेव प्रविश्य तत्र स्वकीय लिङ्गशरीर भक्त्वा, तत सच्चिदादिशरीरत्वेन तत्पुत्रो भूत्वा, तस्मिन्नेव विष्ण्वाख्याश्रये स्थित्वा, तत्सहभोगनामकान् सर्वानपि भोगान् भुक्ते । नच पुनस्तदन्तर्बहिर्वेति विकल्प । ततो निर्गमेऽपि सर्गे तस्मिन्नेव रूपान्तरेण[5] स्थित्वोपपत्तेः ॥ ० ॥ ४ ॥ ० ॥ ॥ ७ ॥ ० ॥ ८ ॥ ० ॥

अहीन्द्रपत्नीमहिप विरिञ्च-
पत्नी विरिञ्च च विमुक्तिकाले" (अनु ४ २ १२८)इति।

1 "न भारती मेऽङ्ग मृषोपलक्ष्यते
न कर्हिचिन्मे मनसो मृषागति ।
न मे हृषीकाणि पतन्त्यसत्पथे
यन्मे हृदौत्कण्ठ्यवता धृतो हरि"
इति नारद प्रति ब्रह्मवचन भागवते ।

2 "वायुमादाय सा देवी याति विष्णु परात् परम् । द्वारमात्रा तु सा देवी वायुप्राप्यो जनार्दन" इति सत्तत्त्ववचनात् । अयमेवकारार्थ । विष्णावेव प्रवेश । न पुना रमायाम् । सा तु द्वारमात्रमिति । अत्र मुक्तेर्भोगस्य च वायुपर्यन्तत्वकथनाद् रमाया नित्यमुक्तत्वेन परमपुरुषसाम्यम्, विष्णु-

---

१ "–रस्य मुख्ये–" क
२ "शक्यते ।" क
३ "तत्र पुमन्तर–" घ
४ "–क्ते । सोऽयम्" क ख ग
५ "रूपान्तरे स्थित्वोप–" क

[1]"अविभागो वचनात्" (४ २.१६) इति सूत्रम् । "भोगमैवोत्तरोत्तरम्" इति । उक्तप्रकारेण भगवन्त प्रविष्टाना तत्कामसङ्कल्पापेक्षया सत्यकाम-सङ्कल्पाना च सतामेतेषा योऽसौ पूर्ववाक्ये भुञ्जत इति सामान्योक्तो भोग सोऽयमुक्तक्रमा[1]दुत्तरोत्तरमधिकाधिक[2] एव भवति । चशब्दात् सत्यकामत्वाद्यपि तथा । नच तेषामुक्तगुणतारतम्ये साम्यवाक्यविरोध-शङ्कच । दोषाभावसाम्यस्याभ्युपगतत्वात् ॥ ० ॥ १० ॥ ० ॥

[2]"तदोकोऽग्रज्वलनम्-" (४ २ १७) इत्यादिकमधिकरणम् । "उत्क्रम्य मानुषा मुक्ति यान्ति" इति । मुक्तिकालात् प्रागेव कदाचिन्मानुषलोके जाता देवाश्चात्र मानुषशब्देनोच्यन्ते । न केवल मनुष्यचेतना । ते तावदुभयेऽपि ज्ञानसामर्थ्यात् [3]स्वसुषुम्नयाऽर्कंसुषुम्न[3]मनुसृत्य स्वदेहादुत्क्रम्य तन्मुक्ति

मेवेति तस्या प्रवेशद्वारत्वमात्रकथनेनावरत्व च कथितम् । तेन 'समना चासृत्युपनमादमृतत्व चानुपोष्य" (४ २ ७) इति सप्तममधिकरणम्, "तदापीते ससारव्यपदेशात्" (४ २ ८) इत्यादि सप्तसूत्र (८ – १४) अष्टम चाधिकरणमुपसगृहीतम् । "मत्स्यकूर्मवराहाद्या समा विष्णोरभेदत । ब्रह्माद्यास्त्वसमा प्रोक्ता प्रकृतिश्च समासमा ' इति हि स्मृति ।

1 "अविभाग –" इति दशममधिकरणम् ।

2 "तदोकोऽग्रज्वलन तत्प्रकाशितद्वारो विद्यासामर्थ्यात् तच्छेषगत्यनुस्मृति-योगाच्च हार्दानुगृहीत शताधिकया" (४ २ १७) इत्यारभ्य आपादान्त षट् सूत्राणि (१७-२२) एकमेवादशमधिकरणम् ।

3 तथाहि श्रुति –"सहस्र वा आदित्यस्य रश्मय आसु नाडीष्वाततास्तत्र एतेत सुषुम्नो ब्रह्मयान सुषुम्नायामाततस्तत्प्रकाशेनैव निर्गच्छति" इति ।

---

१ " – त्रमादधिक एव भवति च ।" ख

२ " – त्तरमधिक एव" क घ

३ " – सुषुम्नामनु –" ख. ग

यान्ति । उत्क्रान्त्यैव देहमुक्ति[1] यान्तीत्यभिप्रायः । अस्माच्च देशादुत्क्रम्य अर्चिरादिमार्गेण गत्वा ब्रह्मलोकप्राप्तिरूपां च मुक्तिं यान्ति । मोचकत्वान्मुक्तिशब्दितं ब्रह्मापि यान्ति ।

एवं स्थूलदेहिना मनुष्याणां तत उत्क्रान्त्यैव तन्मुक्तावुक्तायां सूक्ष्मदेहिना देवाना देहस्य का गतिरित्यत आह – "देहक्षयात् सुराः" इति । (अन्ये[2])ष्टारः सुराः प्रवेश्येषु देवेषु स्वदेहस्य क्षयात् तन्मुक्तिं यान्तीति । देवतादेहः[3] प्रवेशकाले क्षीयते[4] । मनुष्यचेतनाश्च प्रागेवोत्क्रम्य ब्रह्मलोकं गताः कथञ्चित्[1] सुरशब्देनोच्यन्ते । तस्मात् तेषामपि लिङ्गभङ्गो बिम्बदेवप्रवेशादिति सिद्धम् ॥

॥ ० ॥ ११ ॥ ० ॥ ० ॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचितस्य
श्रीब्रह्मसूत्रसंग्रहभाष्यस्य टीकाया
श्रीविद्यामायंदासकृतायामानन्दमालायां
चतुर्थाध्यायस्य द्वितीय. पाद.

---

1 दुःखप्रहाणेन सुष्ठुरमणयोगादेवेत्यर्थः । रूढमपहाय योगमात्राश्रयणात् कथञ्चित् ।

---

१ "देहमोक्षम्" ध.
२ घोषेषु सुप्तम् ।
३ "–देहा." स. ग.
४ "क्षीयन्ते" ब ग.

॥ चतुर्थाध्यायस्य तृतीयः पादः ॥

ॐ॥ उत्क्रान्तानां मार्गस्तद्गम्य चास्मिन् पाद उच्यते ।

[1]"अर्चिरादिना तत्प्रयिते" (४.३.१.) इत्यारभ्य "वैद्युतेनैव ततस्तच्छ्रुते" (४.३ ६) इत्यन्तानि मार्गसूत्राणि, "पर जैमिनिर्मुख्यत्वात्" (४.३ १२.), "अप्रतीकालम्बनान् नयतीति बादरायण उभयथा च दोषात् तत्क्रतुश्च" (४.३ १५), "कार्यं बादरिरस्य गत्युपपत्ते" (४.३.७.), "कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्" (४ ३ १०.) इत्यादीनि गम्यसूत्राणि चेति पादपरि[1]पठितानि सर्वाणि व्याख्याति – "अर्चिरादि पथा वायुं प्राप्य तेन जनार्दनम् । यान्त्युत्तमा नरोद्यावा ब्रह्मलोकात् सहामुना" इति । अय भाव – अतीतपादे सर्वेषामप्यधिकारिणा[2] स्थूलदेहादुत्क्रमण-

---

1 "अर्चिरादिना –" इति प्रथममधिकरणम् । "वैद्युतेन –" इति पञ्चमम् । मध्ये च "वायुशब्दादविशेषविशेषाभ्याम्" (४ ३ २) इति द्वितीयम् । "तडितोऽधि वरुण सम्बन्धात्" (४ ३ ३) इति तृतीयम् । "आतिवाहिकस्तल्लिङ्गात्" (४ ३ ४) इत्यादि द्वे सूत्रे चतुर्थमधिकरणम् । एतानि पञ्च गतिप्रकारप्रतिपादकानि । "कार्यं बादरिरस्य गत्युपपत्ते" (४ ३ ७) इत्यारभ्य 'विशेषं च दर्शयति" (४ ३ १६) इति यावत् आपादान्त दश सूत्राण्येक षष्ठमधिकरण गम्यप्रतिपादकम् ।

2 येषामर्चिरादिपथचलन विहित तेषा सर्वेषामित्युपलक्षणम् । अन्यथा स्वविग्वेषु देहलये गतिरसमानवसरात् ।

---

१ "पादस्थितानि" घ

मस्तीत्युक्तम् । ते चात्र व्याप्तिदृष्टयोऽव्याप्तिदृष्टयश्चेति द्विविधा[1] । तत्र व्याप्तिदृष्टयस्तु[1] ऋषिगन्धर्वप्रवरपूर्वका देवपर्यन्ता उच्यन्ते । अव्याप्ति-दृष्टयो मनुष्योत्तमाद्या ऋषिगन्धर्वान्ता एव । उत्तमा अधमाश्चेति यावत् । ते तावदुभयेऽपि अर्चिरादिना पथा ऊर्ध्वं गत्वाऽन्तत[2] विद्युत्पतिमेव पर वायु प्राप्नुवन्ति[2] । ततस्तेनैव गमयित्रा ब्रह्माख्य गम्य यान्तीत्येतावत् समम् । [3]तत्र विशेष – व्याप्तिद्रष्टार उत्तमा साक्षात् परमेव ब्रह्म जनार्दन प्रथमत एव यान्ति । अन्ये नरोत्तमपूर्वका कार्यमेव ब्रह्म चतुर्मुख तत्काले यान्ति । तत्र[3] पुनर्यावद्ब्रह्मलय स्थित्वा तल्लोकादमुना ब्रह्मणा सह गच्छन्तस्त जनार्दनमपि यान्तीत्येव विशेष ।

[4]"अर्चिरादि" इति क्रियाविशेषणम् । तदादिश्रयितेन पथेत्यर्थः । तत्राऽदि-शब्द[4]परिगृहीताश्चाऽतिवाहिकाद्या विद्यन्ते । तथाहि ब्रह्मतर्के –

---

1 एतेन "अप्रतीकालम्बनान् –" इत्यादिसूत्रप्रस्तुत प्रमेयजातमाह । "अप्रतीका देवतास्तु ऋषीणा शतमेव च । राज्ञा च शतमुद्दिष्ट गन्धर्वादि-शत तथा । एतेऽधिकारिणो व्याप्तिदर्शनेऽन्ये नतु क्वचित्" इति भाष्ये गारुडवचनम् ।

2 एतेन प्रथमे चत्वारो नया सगृहीता । मूले तेनेति सव्यवच्छेदम् । तेन "वैद्युतेनैव –" इति पञ्चमोऽपि नय सुसग्रह इत्याह – तत इत्यादि ।

3 तत्र विशेष इत्यादि षष्ठाधिकरणानुसरणम् ।

4 अर्चिरादिपथेति कथम्? समासजमनित्यमिति वदन्ति । तेन "ऋक्पूरप्पू-पथाम –" इति न प्रसरतीति भवति । नैतद् भवति । "पथो विभाषा" इति पृथग् योगात् । किं तेन? तेनेद गम्यते – नञ्समास एव पथो विभाषेति

---

१ "–दृष्टय ऋषि–" क

२ "गत्वा तत" ग.

३ "तत्र याव–" क

४ "–शब्दगृही–" क

[1] "उत्क्रान्तस्तु शरीरात् स्याद् गच्छत्यर्चिषमेव तु ।
ततो हि वायो पुञ्च च योऽसौ नाम्नाऽऽतिवाहिक ।
ततोऽह पूर्वपक्ष चाप्युदक् सवत्सर तया ।
तटित वरुण चैव प्रजाप सूर्यमेव च ।
सोम वैश्वानर चेन्द्र ध्रुव देवीं दिव तया ।
ततो वायु पर प्राप्य तेनैति पुरुषोत्तमम्" इति ॥ ० ॥ १–६ ॥०॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचितस्य
श्रीब्रह्मसूत्रभाष्यस्य टीकाया
श्रीविद्यानिधिदासकृतायामानन्दमालाया
चतुर्थाध्यायस्य तृतीय पाद

योग पृथगभिधानेति । नैनद् गम्यत यदुपिप्रयोगसिद्धयर्थमाह हि—आगमजमनित्यमिति, समागजमनित्यमिति । अथापि तुष्यतु भवान्, गमागमानान्तरमुच्यते—'अर्चिरादि इति क्रियाविशेषणम् ।

[1] तदय गर्वोऽपि पादार्थो बहुतर्वं त्रिभि स्तावं समाम्नात । अत्र भाष्ये धैरेन निबद्ध ।

॥ चतुर्थाध्यायस्य चतुर्थः पादः ॥

ॐ॥ उक्तप्रकारेण मुक्तानां तदुभयेषां भोगमाहास्मिन् पादे ।

[1]"सम्पद्याविर्भाव स्वेन शब्दात्" (४ ४ १), "सङ्कल्पादेव च तच्छ्रुतेः" (४ ४ ८), "ब्राह्मेण जैमिनिरुपन्यासादिभ्यः" (४ ४ ५), "चितिमात्रेण तदात्मकत्वादित्यौडुलोमिः" (४ ४ ६), "प्रदीपवदावेशस्तथा हि दर्शयति" (४ ४ १५), "जगद्व्यापारवर्जम्" (४ ४ १७), "अत एव चानन्याधिपतिः" (४ ४ ९), "स्थितिमाह दर्शयतश्चैव प्रत्यक्षानुमाने" (४ ४ २१), "भोग मात्रसाम्यलिङ्गाच्च" (४ ४ २२), "अनावृत्तिः शब्दादनावृत्तिः शब्दात्" (४ ४ २३) इत्येतानि तदन्तरितानि च सूत्राणि व्याख्याति-

"यथासङ्कल्पभोगाश्च चिदानन्दशरीरिणः ।
जगत्सृष्ट्यादिविषय महासामर्थ्यमप्यृते ।
यथेष्टशक्तिमन्तश्च विना स्वाभाविकोत्तमान् ।
अनन्यवशगाश्चैव वृद्धिह्रासविवर्जिताः ।
दुःखादिरहिता नित्य मोदन्तेऽविरत सुखम्" इति ।

---

1 भाष्ये यया विशेषणान्युपात्तानि तेनैव क्रमेण सूत्राण्यनूवादाधिकरणक्रम-मविवक्षित्वा – सम्पद्येत्यादि । अथ चात्राधिकरणप्रक्रम – "सम्पद्य –" इत्यादि त्रिसूत्र प्रथमाधिकरणम् (१–३) । तदेतद्व्याख्यातम् – यथासङ्कल्पभोगाश्च । 'यथाकाम सर्वान् कामाननुभवति" इति सौपर्ण-श्रुति ॥ ० ॥ "अविभागेन दृष्टत्वात्" (४ ४ ४) इति द्वितीयमधि करणम् । एतदपि 'सहामुना' इति पुरैव व्याख्यातम् । "सोऽश्नुते सर्वान् कामान्सह ब्रह्मणा" इति श्रुति । अत्रार्थे अमुनेति परमात्मना ॥ ० ॥ 'ब्राह्मेण –" इत्यादि त्रिसूत्र तृतीयमधिकरणम् (५–७) । तदेतद्

अत्रायमभिसन्धिः—उक्तप्रकारेण भगवन्तं नारायण सम्पद्यानादिसंसारसागरान्मुक्ता अविहायैव हरिमविरत सुख मोदन्ते । [1]यथाकाम रमन्ते, यथाकाममुपरमन्ते । तत्रोभयत्रापि सुखमेव । यथाकामत्वात् । नचैतेषा[1] [2]भोगस्तदा-

---

व्याख्यातम्—चिदानन्दशरीरिण । "मर्त्यं देह परित्यज्य चितिमात्रात्मदेहिन" इत्याद्या स्मृतिरेतदेवाऽह ॥ ० ॥ "सङ्कल्पादेव—" इत्यष्टम सूत्र चतुर्थमधिकरणम् । एतदपि निगदव्याख्यातम्—यथासङ्कल्पभोगाश्च । "स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितर समुत्तिष्ठन्ति" इत्यादिश्रुते ॥ ० ॥ "अत एवच—" इत्यादि नवम पञ्चमम् । तदेतद् व्याख्यातम्—अनन्यवशगाश्चैव विना स्वाभाविकोत्तमान् । "परमोऽधिपतिस्तेषा विष्णुरेव न सशय । तत प्राणादिनामान्ता सर्वेऽपि पतय क्रमात्" इति स्मर्यते च ॥ ० ॥ "अभाव बादरिराह ह्येवम्" (४४१०) इत्यादि सप्त सूत्राणि (१०–१६) षष्ठमधिकरणम् । एतदप्युक्तमेव—दु खादिरहिता चिदानन्दशरीरिण । इदमुपरिष्टाद् व्याख्यास्यते चिदचिच्छरीरपरतया ॥ ० ॥ "जगद्व्यापारवर्जम्" इत्यादि चत्वारि सूत्राणि (१७–२०) सप्तमम् । एतदुक्तम्—जगत्सृष्टचादिविषय महासामर्थ्यमप्यृते यथेप्टशक्तिमन्तश्च ॥ ० ॥ "स्थितिमाह—" इत्यादि द्वे सूत्रे अष्टमम् । एतद् व्याख्यातम्—वृद्धिह्रासविवर्जिता । "न ह्रसते न वर्द्धते' इति श्रुति । "न हीयते यत्र गत्वा यत्र गत्वा न वर्धते" इतीतिहास ॥ ० ॥ "अनावृत्ति शब्दादनावृत्ति शब्दात्" इति नवममधिकरणम् । तदेतदुक्तम्—नित्य मोदन्तेऽविरत सुखम् । "नच पुनरावर्तते नच पुनरावर्तते", "सर्वान् कामानाप्त्वाऽमृत समभवत् समभवत्" इत्याद्या श्रुतय ॥ ० ॥

1 तदनेन "यथाकाम रमते यथाकाममुपरमते" इति श्रुतिवचन स्मारयति। तदेतत् सूत्रे "भोगमात्रसाम्यलिङ्गाच्च" इत्युक्तम् ।

---

१ "नचैते भोगा—" क

२ "भोगास्तदा—" क ख ग

तदोत्साहसाध्य [1] । किन्तु यथासङ्कल्प [2] एव । योयो भोगस्तैरिष्यते स सङ्कल्पादेव समुत्तिष्ठति, प्रयत्नमकृत्वाऽपीत्यर्थं [1] । चशब्दोऽवधारणे ।

नच तेषा भोगस्यैवासम्भव, शरीररहित्यादिति वाच्यम् । मत्सच्चिदानन्द-सन्दोहात्मकस्य ब्रह्मणस्तादृशमेव शरीरमेतेषा स्वभोगायतनमविरोधेन सम्भवति [2]। अपिच, तत पृथगेव चिदानन्दात्मक स्वशरीर च तेषा सर्वेषामस्ति। तेनैव, अन्येनापि वा भुञ्जते । उभयथा च श्रुत्युक्ते ।

[3]अचिच्छरीरमपि [3] किञ्चित् तेजिष्ठ सुखैकायतन स्वेष्टत्वेन [4] प्रवेष्टु शक्यम् ।

---

1 "भोगेप्टौ भोगे तदनिष्टावुपरम च न प्रयत्नापेक्षा" इति हि तत्त्वदीपिका ।

2 चिदानन्दो हि भगवान् । यत् तस्य शरीर तदपि चिदानन्दावेव । तेन चिदानन्दशरीरेण शरीरिणो मुक्ता चिदानन्दशरीरिण । स्वयमेव च चिदानन्दात्मकशरीरा चिदानन्दशरीरिण । एतेन "ब्राह्मेण जैमिनि –", 'चितिमात्रेण–' इति सूत्रे व्याख्याते । अत एवोभयाम्नानात् "एवमप्युपन्यासात् पूर्वभावादविरोध बादरायण" (४४७) इत्यपि सूत्र सगृहीतमेव ।

3 अथेदानी 'भाव जैमिनिर्विकल्पाम्नानात्" (४४११) इत्यपि सूत्रमनेनैव भाष्यपदेन व्याचिख्यासदाचार्य इत्याह–अचिच्छरीरमपि । शरीरमिति जड विवक्ष्यते । चिदिति विकल्पाम्नानम् । तच्च केवलमानन्दार्थम् । न ससार इव दु खभोगाय च । "ज्योतिषैव रूपेण चिता वाऽचिता वा' इति विकल्पमाम्नाय "आनन्दी ह्येवैष भवति नानानन्द कञ्चिदुपस्पृशति' इति व्यवच्छेदात् । एतेनैव "द्वादशाहवदुभयविध बादरायणोऽत" (४४१२) इत्यपि समग्राहि ।

---

१ 'साध्या ।" क ख ग

२ "–सङ्कल्पा एव" क ख ग

३ "–मपि यत्किञ्चित् तनिष्ठम्" क

४ 'स्वेप्टत्वे प्रवेप्टुम्" घ

नान्यथा[1] तदस्ति । तथाच योजना[2] — आनन्दार्थं शरीरिणश्चेदित्यन्वय. । सुखैकभोगार्थं जडशरीरिणो चेत्यर्थ. । एतद्भावाभावपक्षयोर्जाग्रत्स्वप्नयोरिव[1] भोग. सम्भवति । नच तत्र दुःखसृष्टिराशङ्कनीयेति "दुःखादिरहिता." इत्युक्तम् । आदिशब्दात् तत्कारणभूत पापम्, सुखानुत्पत्ति, तन्नाशश्चेत्यादि-दोषा गृह्यन्ते । अतस्तैरपि रहिता इत्यर्थ. । युक्त चैतन्मुक्तानां प्रदीपवत्, शुभ-स्यैव भोगो नान्यस्येति[2] । दीपस्य स्वभावशक्त्या तथात्व सम्भवति, नहि मुक्ताना-मिति मा भूत् । यथेष्टकर्मणि यथेष्टा च स्वभावशक्तिर्मुक्तानामप्यस्ति । यशब्दान्नच काचिदशक्ति । सर्वकामावाप्तिश्रुते । एव चेत् यदाकदाचिज्जग-न्निर्माणकर्मापि कुर्वन्ति, इच्छाया सत्या सुकरत्वादित्येतदपवदति — "जगत्—" इत्यादिना । यत्तज्जगत्सृष्टिस्थित्यादिव्यापारविषय महासामर्थ्यमीश्वरैकाश्रय प्रसिद्ध तदुत एव तेषामेषा यथेष्टशक्ति प्रतिज्ञायते । अपिशब्दाज्जीवयोग्यमपि विकारविषयमृते[3] । तथोरत्युच्चनीचत्वेनायोग्यत्वात्[3] । नचायोग्यमपि[4]

---

1 एतेन "तन्वभावे सन्ध्यवदुपपत्ते" (४४१३), "भावे जाग्रद्वत्" (४४१४) इति सूत्रे मनसि करोति ।

2 तदनेन "प्रदीपवत्—" इत्यादि विवृतम् । दीपिकाया सम्भवदपि वाप्यर्थं यथा न प्रदीपो भुक्त इति ।

3 'विकारावर्ति च तथाहि दर्शयति" (४४२०) इति सूत्रमेतेन व्याख्या-

---

१ "नान्यथा । तथाच' घ

२ "योजना । चिद्रूपा अपि आनन्दविशेषभोगार्थं जडशरीरिणोऽपि कदाचिद् भवन्तीति । एतद्भावा—" ब ख ग

३ "—त्वेन योग्यत्वात्" इति बोधेषु पठ्यते । "अयोग्यत्वात्" इति भाष्ये प्रमादलिखितमिति भाति ।

४ "नचायोग्य विमु—" ब "नचायोग्यमपि मुक्ता—" घ

विमुक्ता इच्छन्ति । निर्दोषत्वनियमात् । मनोदोषादेव ह्ययोग्यमिच्छन्तो हन्यन्ते । तस्मात् तदुभयमृतेऽपि यदात्मयोग्यं सामर्थ्यं शुभाशुभयोर्भोजन-वर्जनादौ निर्विघ्नकरत्वादिना निर्वाहक स्यात् तदेवान्नाभिप्रेयत इति नाति-प्रसङ्ग. ।

नच मुक्तानामन्येऽधिपतयो भवन्ति, अनिष्टत्वात् । स्वयमेव स्वाधिपतय इति स्ववशगा[1] एव । अतः शुभानुभवादेर्नियमविपर्यय परतोऽपि नाऽपद्यते । नच बद्धा मुक्ताधिपत्यमर्हन्ति, अयोग्यत्वादिति चशब्दार्थः । न तावता नैराधि-पत्यमधिमुक्त्याशङ्क्यम् । योग्यान् विनैवान्याधिपतिनियेधात् । के तर्हि केषा[2] गुरव ? ये येभ्यः स्वाभाविकगुणैरुत्तमा गुरुपरमगुर्वादय.[1] परमपुरुषो विष्णुश्च ते तेषामधिपतय एव क्रमाधिका अभिधीयन्ते[3] । यत्प्रेरिता. शिष्यप्रशिष्याद्या-स्तरुणतराः सुरतरुसुरभिसुमनोमालभारिणः[2] [4] सुखमविरतमपि सरामा[1] मोदन्ते । अतस्तान् विनैवान्याधिपतिनिषेध. कृत. ।

तम् । "प्रकृतिविकारशरीराद्यभिमानिषु जन्ममृत्यादिविकारवत्सु समारिषु व्यापारो मुक्ताना न विद्यते" इति तत्त्वदीपिका ।

1 भाष्येऽप्येतदुक्तम् — "आचार्याश्चैव सर्वेऽपि यैर्ज्ञान सुप्रतिष्ठितम्' इति वाराहवचनम् ।

2 "इष्टकेषीकामालाना चितितूलभारिषु (पाणि० ६ ३ ६५) इति सुमनो-मालभारिण ।

---

१ "स्ववशा एव" क

२ "केषा दाधिपत्य मानुषेषु ये येभ्य " घ मध्ये अक्षराणि गलितानि।

३ "अधीयन्ते" क ख घ

४ " — सुमनोमनोहारिण " क

५ "सुरामा मो — " ख

नच जीवन्मुक्ताविव[1] मुक्तावपि पुन-पुनरुपास्तौ फलस्य वृद्धिः स्यात् । नापि विपर्ययेण ह्रासः । विधिनिषेधयोर्मुक्तेष्ववृत्तेरित्येदभिप्रायेण "वृद्धिह्रास-विवर्जिता." इत्युक्तम् । वृद्धिह्रासाभ्या विशेषतो वर्जिताः सामान्यतः सहिता इत्युपसर्गार्थः । तस्मादेव सम्प्राप्तसम्पदा[2] क्रमाधिकानामध्वयदेव वृद्धि-ह्रासावतिमर्यादौ कदाचिदपि न भवेताम् । समर्यादौ तु स्यातामेव[3] । अप्रति-षिद्धत्वात्[3] ।

तस्माद् यथायोग्यपरिपूर्णत्वेन संस्थितिरेव मुक्तानामिति नियम', नच कदाचित् ततः पुनरावर्तन्त इति वक्तुं "नित्यम्" इति विशेषणम् । अविरतमिति तु यावत्संस्थितिनैरन्तर्यमेव[4] मोदस्य दर्शयति । नत्वनन्तकालीनत्वमित्यपुन-रुक्तिः ॥ १ – ६ ॥ ० ॥

[2]उक्तार्थनिगमनार्थं[5] चैतन्नित्यपदम् । यदेतदध्यायचतुष्टय्यामाऽऽदित आऽन्ता-दुदितं सर्वार्थजातं तन्नित्यं निर्णीतम्, नतु सन्दिग्धम्, कुतः? अपरिमितवेद-[6] सिद्धत्वादिति सकलमनाकुलम् ॥ ० ॥ ० ॥

---

1 तथाच भाष्ये – "अवृद्धिह्रासरूपत्व मुक्ताना प्रायिक भवेत् । कादाचि-त्कविशेषस्तु नैव तेंया निषिद्धयते" इति कौर्मं वचनम् ।

2 "नित्य मदातन चोक्त नित्य नियतमेव च" इति शब्दनिर्णय मनसि निधायाऽह – उक्तार्थनिगमनार्थं च ।

---

१ "– विव पुन पुनरपा –" क

२ "– सम्पदा क्रमा –" ख

३ "अप्रतिषेधात्" क

४ "– नैरन्तर्यं मोदस्य" क ग

५ "– निगमन चैत –" ख

६ "– वेदप्रवाहसिद्ध –" घ

अथेदानीमेव परिसमापितं ([1]सग्रहभाष्य भगवानाचार्यं शिष्यशिक्षायं) विज्ञापयन्नात्मकृतं स्वस्वामिनि[2] विष्णौ समर्पयत्युत्तरपद्येन । तदुत्तरेण तु ग्रन्थावसानेऽपि क्रियासमभिहारेण तस्मै नमस्क्रियामाचरति[3] –

"पूर्णप्रज्ञेन मुनिना सर्वशास्त्रार्थसंग्रहः ।
कृतोऽयं प्रीयतां तेन परमात्मा रमापतिः ॥

नमोनमोऽशेषदोषदूरपूर्णगुणात्मने ।
विरिञ्चशर्वपूर्वेड्यबन्धाय श्रीवराय ते" ॥ ० ॥

[1]यस्य त्रिरूपाण्युदितानि वायो-
वेंदे बलज्ञानवतो बळादौ ।
दशप्रमत्याख्यतृतीयरूपी
संक्षेपभाष्यं कृतवान् रमेशे ॥
सम्प्रीयतां तेन कृतेन सोऽयं
रमापतिर्मे परमेष्टदेवः ।
[2]विरिञ्चवाणीविषवासवानां
परात्पराणामपि यः परात्मा ॥

---

1 षडभिश्चरणै प्रथमश्लोकार्थमाह । बळादौ वेदे बळित्थासूक्ते । परमात्मा व्याख्यायते परमेष्टदेव इति ।

2 द्वितीयपद्यस्योत्तरार्धं विवृण्वन्नेव परमात्मशब्दस्यार्थान्तरमाह – विरिञ्चेत्यादि । शर्व एव शेषो भविष्यन्निति न पृथगुक्तः । वासवानमिति बहुवचनमाद्यर्थं ।

---

१ ( ) एतावान् भाग. कोशेषु लुप्त इत्यर्थानुगुण्याय पूरित ।
२ "–स्वामिनि समर्प–" ख
३ "नमस्क्रियां करोति" ख.

[1]अज्ञानदुःखप्रमुखैः समस्तै-
दोषैर्विहीनाय गुणार्णवाय ।
विरिञ्चशर्वेन्द्रमुखैरपीड्य
नमोनमः श्रीरमणाय तुभ्यम् ॥

[2]सत्सौख्यविज्ञानपुरोगपूर्ण-
गुणैकदेहाय पुमर्थदोग्ध्रे ।
अशेषवन्द्याय विशेषतो मे
व्यासाय देवाय नमोनमस्ते ॥ ० ॥

[3]आपादतलमस्तिष्कं[१] निभृतानन्दचिद्घनः ।
नारायणो रमानाथो रमता मे मनोरथे ॥ १ ॥

---

1 द्वितीयश्लोक क्रमाद् व्याख्याति—अज्ञानेत्यादि द्वाभ्या श्लोकाभ्याम् । एतत्पक्षे "—दोषदूरपूर्णगुणात्मने" इत्येक पदम् । विशेषणयो समास । ईड्येति वन्द्यायेति च भिन्ने पदे इति कृत्वा व्याख्यानम्—विरिञ्च-शर्वेन्द्रमुखैरपीड्य ।

2 पूर्णगुणात्मने इति भिन्न वा पदमिति तदर्थमाह—सत्सौख्येत्यादि । आत्मशब्दो देहवचनश्चात्र भवति । विरिञ्चशर्वपूर्वेड्यवन्द्यायेति समस्त वा पदमिति तदर्थं निर्वृते—पुमर्थदोग्ध्रे अशेषवन्द्याय । विरिञ्चादिभि-रशेषैरीड्यैरपि वन्द्याय । इद परात् परायामिति विशेषणात् पूर्वमेव सूचितम् । अशेषैरीड्याय च वन्द्याय च । पुमर्थदोग्धा हि स्तूयते । "वृष्णे चोदस्व सुष्टुतिम्" इति हि श्रूयते । तदनेन श्लोकेन चतुर्लक्षणस्य शास्त्रस्य सर्वोऽप्यर्थ. सुगृहीतो भवति । तदर्थमेव चैव व्याख्येयम् । वन्द्यायेति भिन्न पदमिति कृत्वा पुनरर्थान्तरमाह—विशेषतो मे वन्द्याय व्यासायेति । "जगद्गुरुणा गुरुभञ्जसैव विशेषतो मे" इति ह्युक्तम् । एतेनान्तेऽपि शास्त्रप्रभवो गुरुरपि प्रणतो भवति ।

3 इदानी स्वयमन्ते मङ्गलान्याचरति । साक्षात्कृतप्राणप्रमुखावतारश्रीमुख-

---

१ "—मस्तिष्कान्निभृ—" ग

नन्दयन् मन्दहासेन सुन्दरीमिन्दिरा हरि ।
[1]अमन्दानन्दनिष्यन्दी रमता मे मनोगृहे ॥ ३ ॥

दोर्दण्डख(ण्डिता[2])रात्ति पालयन् भुवनत्रयम् ।
आनन्द[3] .रे ॥ ३ ॥

ज्ञानिभिर्हृदयाम्भोजे निर्मले रत्नविष्टरे ।
दृष्ट निविष्ट मुत्पेष्ट सन्दिदृक्षे रमेश्वरम् ॥ ४ ॥

नन्तारोऽनन्तगरुडब्रह्मरुद्रपुरोगमा ।
यस्यामु सतत[4] देव शुश्रूषेऽह रमावरम् ॥ ५ ॥

सत्सूनृतनिकरार्यो य सर्ववेदार्थवृंहित ।
त सद्भि प्रोदित सन्त प्रविविक्षे रमापतिम् ॥ ६ ॥

येनाय सकलोऽप्यर्थो भाषितोऽप्यनुभाषित ।
प्रोदितश्चापि त मध्व प्राणेदा प्रणमाम्यहम् ॥७॥

समुद्गतसच्छास्त्रप्रवचनानुभूतप्रभूतानन्दा पूर्वं स्वगुरुपरमगुरव सुदृढश्रद्ध समयत्यादर च यत्सच्छास्त्रमवृणत तदप्युपश्लोकयति महता सरम्भेणेति मङ्गलम् ।

इत्थमाचार्यगोविन्द प्रसृप्टा शब्दतोऽर्थत ।
वितेने विमला व्याख्या विदुषामेव तोषणीम् ॥
इत्याचार्यगोविन्दस्य धृतिपु
आनन्दमालाटिप्पनी समाप्ता

---

१ "अमितानन्द–" क २ लुप्ते अक्षरे कोशेषु ।
३ अक्षराणि लुप्तानि । 'आनन्दरूपी भगवान् रमता चित्तमन्दिरे' इति पाठक्रमविच्छेदाय ।
४ "यज्ञानुगा स्मुन्द देवम्" ग

विष्णोः प्रसादैकबलात् सर्वशास्त्रार्थसंग्रहम् ।
यदचकार नमस्तस्मै पूर्णप्रज्ञाय नित्यशः ॥ ८ ॥

यत्प्रसादप्रासारेण दारुयोवेव मे मतिः ।
तट्टीकां रचयामास लेशेनापि सुदुष्कराम् ॥ ९ ॥

इमामानन्दमालाख्या स्वरूपानन्दमालिने ।
दीपमालामिवात्यल्पा जगद्दीपाशुमालिने ॥ १० ॥

सुरैः सम्पद्भिरर्च्याय मानुषैरम्बुविप्लुषा ।
समर्पयामः पूर्णाय विष्णवे सर्वजिष्णवे ॥ ११ ॥

आ मेरोराण्डभाण्डात् सुरवरनिकरास्थानसस्थानमान्यात्
अन्यान्यानेकविद्वत्प्रवरशतशतोकीर्ति[1]कर्पूरपूरात् ।
आ प्रन्यादाब्दवर्णाद् रथचरणधरार्याद् विशेषैः समर्थात्
षवासौ वादीन्द्रसिंहः पटुतम उत यः खण्डयेन्मध्वशास्त्रम् ॥ १२ ॥

आ देवादा च मर्त्याद् बहुदिवसमणेः [2] ....प्रभाया
को वा वादीन्द्रसिंह. कविकुलतिलकः कोऽयया मध्वशास्त्रे ।
जल्पे जाज्वल्यमानो [3].....पक्षपाती
जिज्ञासुर्जानिसारं सफलमनुपिबेन्मानुषो वा लयाब्धिम् ॥ १३ ॥

आऽब्जोत्थादा प्रधानात् सकलचिदचितो भाविताः सत्पदार्थाः
क्षुद्रायं वै दिशेषुः परपुरुषवशा ह्यातृणादा करीषात् ।
सर्वेषा योग्यसृष्टिस्थितिलयनियमाज्ञानदृग्बन्धमोक्षं
शुभदिकः स्वतन्त्रो हरिरिति सुमते[4] तच्च शास्त्रं प्रमाणम् ॥ १४ ॥

---

१ "–शतशतलिकीर्ति–" ग
२ लुप्तान्यक्षराणि । ग पुस्तके तु "कीटके वा" (?) इतीव पठ्यते ।
३ लुप्तान्यक्षराणि सर्वेष्वपि कोशेषु । ४ "सुमते" ग

सत्य सत्य तदित्थ शपथशतयुत वच्मि हस्तावुदस्तौ
अस्तव्यस्तोक्तिरास्तां शृणुत शृणुत हे मानवा माऽवमान्य[1] ।
स्वामी सर्वस्य विष्णु ववचन च सदृशो नाधिकस्तस्य हि स्यात्
सत्ये[2] भातीति सत्य श्रुतिपतिलिखिता वैजयन्ती जयन्ती ॥ १५ ॥

वन्दे विष्णु सुरेश स्वजनपरिवृत ताश्च वन्दे क्रमेण
श्रीभूरूपा तदिष्टामय विधिपवनौ तत्प्रिये वाग्द्युदेव्यौ ।
पक्षीशाहीशरुद्रास्तदुदितदयिता या सुपर्ण्यादिसञ्ज्ञा
शक्रादीन् काममुख्यानपि सकलसुरान् तद्गुरून् मद्गुरुश्च ॥ १६ ॥

नमस्ते श्रीशास्तु प्रियतम समस्तादपि सदा
नमस्ते प्राणेश प्रणतसुरसङ्घेष्ट शुभद ।
नमस्तद्दासा व परमगुवस्तत्त्वमतिदा
नमस्तद्दासा व [3] पुनरिति गुरुभ्यो मुहुरपि ॥ १७ ॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचितस्य
श्रीब्रह्मसूत्रसग्रहभाष्यस्य टीकाया
वैदिकमार्गदासकृतायानन्दमालाया
चतुर्थोऽध्याय

—o—

समाप्तोऽय ग्रन्थ

---

१ "माऽवमान्य ।" ख "माऽवमान्ये ।" (?) ग
२ "सत्यम्" ग
३ "नमस्तद्दासेभ्य" ग